ज्ञान-विज्ञान विमुक्तये
UGC Care Listed

ISSN 2456-3420



# खगोलः
# (KHAGOLAH)

**Peer Reviewed Annual Research Journal of Jyotish**

Vol. 06 2021

योऽनूचानः स नो महान्।
केन्द्रीयसंस्कृतविश्वविद्यालयः

**VEDAVYAS CAMPUS**
Central Sanskrit University, Balahar
Himachal Pradesh-177108
www.rsksbalahar.ac.in

UGC Care Journal ID-101000044 ISSN 2456-3420

# KHAGOLAH

PEER REVIEWED ANNUAL RESEARCH JOURNAL OF JYOTISH

VOL. 06. 2021

## PATRON

PROF. P.N. SHASTRI
Mob. No. 09425682271
e.mail:-rskspvc@yahoo.com
(Vice-Chancellor, Central Sanskrit University, New Delhi)

## CHIEF EDITOR

PROF. LAXMI NIWAS PANDEY
Mob. No. 9816400536
e.mail:-principal.garli@gmail.com
(Director, Central Sanskrit University, Vedavyas Campus Balahar, Kangra H.P.)

## EDITOR

DR. P.V.B. SUBRAHMANYAM
Mob. No. 9805034336
e.mail:-lagdha@gmail.com
(Associate Professor, Central Sanskrit University, Vedavyas Campus Balahar, Kangra H.P.)

## EDITORIAL COMMITTEE

**Dr. Harinarayandhar Dwivedi**
*Assistant Professor*
*Vedavyas Campus Balahar, Kangra H.P.*
Mob. No. 8894101015
e.mail:-hndwivedi2@gmail.com

**Dr. Deep Kumar**
*Assistant Professor (Cont.)*
*Vedavyas Campus Balahar, Kangra H.P.*
Mob. No. 7005872782
e.mail:-deep29214@gmail.com

**Dr. Pradeep Sharma**
*Assistant Professor (Guest)*
*Vedavyas Campus Balahar, Kangra H.P.*
Mob. No. 7018675090
e.mail:-sharmapradeep1004@gmail.com

Co-ordinated by IQAC Vedavyas Campus, Balahar (H.P.)

| | | |
|---|---|---|
| Title | : | Khagolah ( खगोलः ) |
| Vol. : | : | 06 |
| Year | : | 2021 |
| ISSN | : | 2456-3420 |
| UGC Care Journal ID | : | 101000044 |
| Price | : | 350/- |

© Vedavyas Campus

| | | |
|---|---|---|
| Copy | : | 100 |
| **Printed and Published by** | **:** | Prof. L.N. Pandey, Director<br>Central Sanskrit University, Vedavyas Campus,<br>Balahar, Himachal Pradesh-177108 |
| **Editor** | **:** | Dr. P.V.B. Subrahmanyam |
| **Email** | | pub.vvc@gmail.com |
| **Website** | | http://www.rsksbalahar.ac.in |
| **Fax/Phone** | | 01970-245409 |
| **Printed at** | **:** | Abhi Printers,<br>F-19A, Focal Point Ext. Jalandhar-144103.<br>09465238137 (M) |
| **Composed and Designed By :** | | Ajay Sharma for Abhi Printers. |

**सूचनाः**–प्रकाशित लेखों व शोधपत्रों से प्रकाशक का सहमत होना अनिवार्य नहीं है।

# EDITORIAL

**नाभ्या आसीदन्तरिक्षम्**

The navel point of lord Vishnu or Narayana or Aniruddha or the Purusha is the genesis of this whole universe. Universe comes out of it and will consequently collapse into it. That is the genesis of lord Brahma also. The ring nebulae is considered as the navel point of Vishnu. There are so many nebulae and among them the spiral nebula is known as the Kashyapa nebula, the source of gods and demons.

The visible sky in respect of Earth has been divided into some 85 constellations by both eastern (Vaidic) and western scholars. The number may vary between 85 to ninty. Legendries are in prevalence in both east and west. As the links to Vedic civilization is almost lost, the Vedic legends are now a days termed as mythology. It is not known whether the use of this term is deliberate or accidental. Whereas the same legends prevail in the west are considered as part of science. Weather it is deliberate or intentional or any part of conspiracy, the real concern eludes all is the lack of enthusiasm in eastern researchers to peep into the lost tradition.

Hypothesis play vital role in going ahead with new observations and discoveries. Such write ups give tremendous opportunities to ideas and innovations. The modern academic world encourages writings in scientific fictions where as the past one struck somewhere between the old and new. Writings are invited in a specific area with enough support from the available literature. Peers may approve the same. So such invitations ultimately kill the talent to imagine something beyond limits. So the imagination required to build up a hypothesis is crushed in the initial stage.

This is the high time to imagine something big for Indian Jyotish. This is not a mere translation for astrology as we think. The whole Vedic worlds is Time woven and it includes everything inside it. Unlike any modern discipline, the Vedic disciplines are interwoven and cannot fulfil any intentions alone. They cannot be termed interdependent as they share a common platform and aim for a single motto "the well ness of all". But the words wellness and all hold oceanic depth to explain.

# विषयसूची


| | | | |
|---|---|---|---|
| 1. | जगद्गुरुरामभद्राचार्यस्य ज्योतिषरीत्या जन्मफलम् | शे. ब्रहदा प्रसन्ना | 1-3 |
| 2. | ज्यौतिषे आयुर्विज्ञानम् | डॉ. विष्णुकुमारनिर्मल: | 4-6 |
| 3. | जैमिनीसूत्रे आयुर्दायविचार: | गुलशनकुमार: | 7-8 |
| 4. | षोडशसंस्कारस्वरूपम् | डॉ. सन्तोषकुमारतिवारी | 9-11 |
| 5. | हिमाचलस्थाविविधा: साञ्चाग्रन्थानां लिपय: | नरेश शर्मा | 12-13 |
| 6. | हिमाचले ज्योतिषशास्त्राध्ययने देवमन्दिराणां भूमिकाया: समीक्षात्मकमध्ययनम् | तिलक राज | 14-18 |
| 7. | सुखमयगृहस्थजीवनाय वास्तुशास्त्रस्य उपादेयता | डॉ. मुकेशकुमार: | 19-20 |
| 8. | वृद्धयवनजातके कालिदासस्य पूर्वकालामृते च यात्रादिशकुनविचारा: | डॉ. प्रदीप शर्मा | 21-23 |
| 9. | प्रश्नलग्नधारेण निमित्तशकुनाधारेण च वृष्टिज्ञानम् | वैजयन्ती माला | 24-25 |
| 10. | शार्दूलशकटम्-एकम् अध्ययनम् | डॉ. प्रीतमरुज: | 26-28 |
| 11. | फलादेशे त्रिकोणयोर्वैशिष्ट्यम् | साहिलशर्मा | 29-31 |
| 12. | अष्टावक्रगीतायामुपनिषत्सु च आत्मनिरूपणम् | प्रेम लता | 32-32 |
| 13. | पातञ्जलमहाभाष्ये सूक्तिविमर्श: | डॉ. भूपेन्द्रकुमार ओझा | 33-34 |
| 14. | श्रीमद्देवीभागवते सन्ध्यास्वरूपं तद्विमर्शश्च | डॉ. सुनील कात्यायन: | 35-37 |
| 15. | ज्योतिषशास्त्रायुर्वेदशास्त्रयो:मिथ:सम्बन्ध: | सुनीलकुमार: | 38-39 |
| 16. | पर्यावरणसंरक्षणे वृक्षायुर्वेदस्य योगदानम् | चुनीलाल: | 40-41 |
| 17. | भारतीयज्योतिषशास्त्रे व्यक्तित्वविमर्श: | कपिलदेव: | 42-45 |
| 18. | ज्योतिषशास्त्रे मेलापकस्य आवश्यकता | अरुणा देवी | 46-51 |
| 19. | हरिकथासम्प्रदाये श्रीहरिकथामृतस्य वैशिष्ट्यम् | डॉ. के. वरलक्ष्मी: | 52-55 |
| 20. | यज्ञस्य प्रादुर्भाव: | डॉ. धनेशकुमारपाण्डेय: | 56-57 |
| 21. | ज्योतिषशिक्षणे प्रायोजनविधे: अनुप्रयोग: | धीरज: शर्मा | 58-60 |
| 22. | तात्पर्यनिर्णये निर्णीत बादरायणस्वरूपम् | डॉ. सुनील: के. एस. | 61-62 |
| 23. | गृहनिर्माणे द्वारस्थापनप्रक्रियाया: विवेचनम् | डॉ. हरिनारायणधर द्विवेदी | 63-65 |
| 24. | योगपद्धतौ ध्यानसङ्कल्पना | डॉ. रणजीतकुमार: | 66-68 |
| 25. | अवस्थात्रयविनिर्मुक्त: तुरीय: | डॉ. मंजुनाथ एस. जी. | 69-70 |
| 1. | THE ART AND ARCHITECTURE OF VEDARANYAM VEDARANYESWARAR TEMPLE - A STUDY | *K. SATHEESHKUMAR, **N. MARISAMY | 71-76 |
| 2. | Modern Epistemology and Education in the Light of Samkhya Philosophy | Dr Somnath Das | 77-78 |
| 3. | Effectual analysis of Corporate Social Responsibility Impact and Empirical Study on Indian Corporate Sectors | Dr. Santanu Kumar das1 Prof. Manas Pandey2 | 79-95 |
| 4. | Raghuvansham-A brilliant document of King Dilip's monastic thinking | Prabir Sarkar | 96-98 |
| 5. | Brajendranath Seal&theScience of the Ancient Hindus - A Direction to the Future India | Dr. Nasiruddin Mondal | 99-104 |
| 6. | Understanding the level of adjustment in adolescence during pandemic in southern Rajasthan | Tejal Dhakad[1] Deepika Jain[2] | 105-111 |
| 7. | Cognitive ability among LD and Normal adolescents | Unnikrishnan. A.R1, Dr. R. Neelakandan | 112-114 |
| 8. | Samādhias depicted in Major Purāṇasand through purificatory process of Yoga & Ayurveda: A Critique | Dr. Adrish Brahmadatta Dr.Dinesh Prasad Swain | 115-117 |
| 1. | महाभारत में काल का महत्त्व | डॉ. विवेक शर्मा | 118-120 |
| 2. | महाकविकालिदास की कृतियों में चन्द्रग्रह विमर्श | अनिल कुमार | 121-122 |
| 3. | वर्तमान परिपेक्ष्य में वेदों एवं स्मृतियों में वर्णित कर नीति की प्रासंगिकता | डॉ. अन्जु शर्मा | 123-124 |
| 4. | अद्वैत वेदान्त में ज्ञान के प्रकार | डॉ. मीनाक्षी जोशी | 125-127 |
| 5. | नारी सशक्तीकरण | डॉ. विशाल भारद्वाज | 128-131 |
| 6. | हिन्दी साहित्य में ज्योतिष एवं जल संरक्षण | पीयूष कुमार त्रिपाठी | 132-133 |
| 7. | वैदिक वर्णप्रणाली एवं वर्तमान जातिव्यवस्था | करुणा | 134-136 |
| 8. | वेद एवं अहिंसा की संस्कृति तथा शाकाहार | स्वाति | 137-138 |
| 9. | शिक्षा का आधुनिकीकरण की प्रक्रिया में योगदान | कृष्णानन्द दन्नन्ना | 139-142 |

ISSN 2456-3420

# जगद्गुरुरामभद्राचार्यस्य ज्योतिषरीत्या जन्मफलम्

**शे. ब्रहदा प्रसन्ना**

**Keywords :**

उपोद्घातः–सर्वशास्त्राणां ज्योतिषं प्रधानम्–जन्मकुण्डली–सामान्य फलानि–जन्मनक्षत्र फलानि–लग्नफलम्–स्थानफलं जातकफलञ्च–उपसंहारः।

**Abstract :**

सर्वेन्द्रियाणां नयनं प्रधानं सर्वशास्त्राणां ज्योतिषं प्रधानम्। संशोधनेऽस्मिन् उत्तरप्रदेशप्रान्ते श्रीवैष्णवकुल जलनिधिसोमः, जगद्गुरु-रामभद्राचार्यस्य जातकपरिचयः, विमर्शः, वैशिष्ट्यञ्च विचारितमस्ति। ज्योतिषफलानुसारं दोषाणामपनोदनं गुणानामारोपणञ्च सुलभतया स्थापयितुं शास्त्रोपयोगः क्रियते इत्येव लक्ष्यमस्ति। ग्रहाणां आधिपत्यं तेषां दोषनिवारणाय दर्शनफलं तस्य आवश्यकत्वं स्पष्टि क्रियते। आचार्यस्य जातकं संयग्परिगण्यते यथामतिः। अस्मात् जातकात् ज्ञायते–पुस्तकरचनं, पुस्तक संशोधनं, आचारशीलत्वं, वेदशास्त्रेषु निपुणत्वं, ऋजुता, मृदुभाषी, उदारगुणत्वमित्यादयः सद्गुणाः अस्याचार्यस्य विद्यन्ते इति।

**उपोद्घातः**

अस्ति उत्तरप्रदेशप्रान्ते जगद्गुरुः रामभद्राचार्य इति श्रीवैष्णवकुल जलनिधिसोमः। अस्य आचार्यस्य ज्योतिषरीत्या जन्मफलं किमिति विचारणीये इदं संशोधनं साधयितुं प्रयतते, जातकरीत्या परिचयञ्च प्रस्तूयते। ज्योतिषज्ञैः शर्मादिभिः कविभिः प्रणीतान् ग्रन्थान् संशोधनाय स्वीकृतास्सन्ति। संशोधनेऽस्मिन् आचार्यस्य जातकपरिचयः, विमर्शः, वैशिष्ट्यञ्च विचारितमस्ति। ज्योतिषफलानुसारं दोषाणामपनोदनं गुणानामारोपणञ्च सुलभतया स्थापयितुं शास्त्रोपयोगः क्रियते इत्येव लक्ष्यमस्ति। एवं ग्रहाणां आधिपत्यं तेषां दोषनिवारणाय दर्शनफलं तस्य आवश्यकत्वं स्पष्टि क्रियते।

जन्मप्रभृति ग्रहाणां कारकत्वं तेन कारकत्वेन आचार्यस्य जन्मफलम्, अस्य आचार्यस्य जन्मसाफल्यं, जन्मकृतिरित्यादयः विषयाश्च विचारणीयास्सन्ति। तेन ज्योतिषग्रन्थस्यावश्यकत्वं, एवं अस्य फलानि, तदनुसृत्य जन्मकुण्डलिद्वारा ग्रहाणां फलनिरूपणं क्रियते।

**सर्वशास्त्राणां ज्योतिषं प्रधानम्**

ज्योतिषस्य प्राधान्यं महत्वपूर्णं भवति। ज्योतिषशास्त्रं तु षडङ्गेष्वन्यतमः, वेदपुरुषस्य नयनञ्चास्ति, 'सर्वेन्द्रियाणां नयनं प्रधानं सर्वशास्त्राणां ज्योतिषं प्रधानम्' इत्यपि ज्ञायते। तेन ज्योतिः ज्योतिषञ्च नयनद्वयमस्ति इति ज्ञायते। यथाहि ज्योतिषेनैव ग्रहाणां स्थितिं परिगण्य मनुष्याणां पापपुण्यफलानि च दृष्टुं ज्ञातुं च शक्यते। यथा वेदान्तः जीवसाफल्यं दास्यति तथा इदं शास्त्रमपि चतुर्वर्गफलं दास्यति इत्यत्र नैव संशयः। अतेवोक्तं जननीं जन्मसौख्यानां वर्धनीं कुलसम्पदां पदवीं पूर्वपुण्यानां "लिख्यते जन्मपत्रिका" इत्यनेन औत्कृष्टत्वञ्च ज्ञायते। शास्त्रानुसारेण जीवितस्यास्त्राचार्यस्य जन्मफलं यदिति यथामति परिगण्यते केचेनाचार्येण। अत्र भावफलं, भावस्थितिः, ग्रहफलानि, नक्षत्रफलानि, भावांशस्फुटं, ग्रहमेलनफलानि इत्यादीनि विषयानि अत्र प्रस्तूयन्ते।

**जन्मकुण्डली**

त्रिगणितपञ्चाङ्गद्वारा गणितमिदं जातकम्–




Planetary Positions

$Lag^{155^\circ}_{25^\circ}$ $Sun^{270^\circ}_{49^\circ}$ $Moo^{223^\circ}_{49^\circ}$ $Mar^{163^\circ}_{32^\circ}$ $Mer^{277^\circ}_{31^\circ}$ $Jup^{286^\circ}_{30^\circ}$ $Ven^{295^\circ}_{13^\circ}$ $Sat^{146^\circ}_{3^\circ}$ $Rah^{348^\circ}_{18^\circ}$ $Ket^{168^\circ}_{18^\circ}$

Birth Star : Anuradha (ANIZHAM)
Balance Dasa at Birth : 4 Year 0
Months 15 Days Saturn Dhasa

**सामान्य फलानि**

महाकविः रामभद्राचार्यः राजदेवमिश्र–सूचीदेवीदम्पत्योः अनूराधा नक्षत्रे वृश्चिकराशौ मकरमासे पुत्रत्वेन जनिमलभत। अस्याचार्यस्य जातके कन्यालग्ने केतुकुजयोः मेलनं, तृतीये स्थाने नीचचन्द्रः, पञ्चमस्थाने सूर्यबुधगुरु शुक्राणां संक्रमनं, सप्तमे स्थाने राहुः, द्वादशेस्थाने शनिः इति ग्रहाणां स्थितिरस्ति।

ततः नक्षत्रस्यस्वभावः सामान्यफलं तु। पठनविषयोद्दीपनं बहूनां पुस्तकानां संशोधनं, आचारशीलत्वं वेदशास्त्रेषु निपुणत्वं, उन्नतपदवी, सौभाग्यत्वं, सत्यभाषी, मितभाषी, ऋजुता, बन्धुमित्राणां रक्षणगुणाः, राष्टगौरवं, साधुगुणाः, सङ्गीतज्ञानं, उदारगुणत्वं, विशेषसुगुणाः, सुन्दरत्वं, सङ्गीतप्रियः, मृदुभाषी, कलाज्ञानं, धर्मचिन्तना, सञ्चारी इत्यादयः गुणाः भवेयुः। अतः उपर्युक्त सर्वेगुणाः आचार्यस्ये सन्ति इति नैव वक्तव्यतास्ति। तादृशगुणोपेतोऽयं आचार्यः। एवमेव स्थानफलन्तु–

**लग्नमित्युक्ते–जीवः, देहः, रूपं, आत्मा।**

**द्वितीयस्थानम्–धनवाक्कुटुम्बनेत्रादि स्थानम्।**

तृतीयस्थानम्-सहोदरः, वाक् चातुर्यं, कीर्ति, धैर्यं, श्रोत्रं, भोगादिस्थानम्।

चतुर्थ-स्थानम्-मातृ, सुख, गृह, वाहन, मातुल, मातृवर्गादीनां स्थानं भवति।

पञ्चमस्थानम्-पुत्रस्थानं, पूर्वपुण्यस्थानं, सन्ततिः प्रभुत्वं च।

षष्टमस्थानन्तु-शत्रु, रोग, व्याज्य, ऋष्णां च भवति।

सप्तमस्थानस्य फलन्तु-कलत्रं, मारकं, मित्रादिस्थानं भवति।

अष्टमस्थानन्तु-आयुः, मरणं च फलं द्रष्टुं शक्यते।

नवमेस्थाने-भाग्यस्थानं, देवभक्ति, गुरूपदेशः, धर्मं, शीलञ्च ज्ञातुं शक्यते। विशेषतया पितृस्थानं भवति।

दशमस्थानम्-जीवनं, राज्यं, राज्याधिपत्यं, कर्म, उद्योगस्थानमिति ज्ञायते।

एकादशस्थाने-लाभः कियदिति ज्ञातुंशक्यते।

द्वादशस्थानम्-विरयस्थानं, अयनशयन स्थानमिति ज्ञायते। मोक्षस्थानमिति ज्ञायते।

एवं द्वादशस्थानानां सामान्य फलानि तु बृहज्जातके सुष्ठु भणितमस्ति। तदनुसारेण अस्याचार्यस्य जातकफलं किमिति विचारणीयमस्ति।

**जन्मनक्षत्र फलानि**

तत्र पूर्वोक्तरीत्या अनूराधानक्षत्रजनितोऽयमाचार्यस्य नक्षत्रफलं साधूक्तं भवति। इदानीं जातकफलानुसारेण किमिति द्रष्टव्यमेव लग्नफलन्तु कन्यालग्ने जनितोऽयमाचार्यः धर्मवान्, उदारस्वाभाविक, आचारशीलः, स्वकार्यपरः, अपरे वयसि अधिकधनं संपादितवान्, पञ्चमे-अष्टमे-नवमे-दशमे-अष्टादशे-विंशत्यूने वयसि अग्नि, उदरवेदना, वैसूरी इत्यादिना पीडा भवेत्।

**लग्नफलम्**

अस्य लग्नस्य बुधशुक्रौ योग कारकौ। तयोः मेलनम् सौभाग्यं, कीर्तिः, प्राबल्यञ्च संभवेत्। तेनैव कारणेन अस्याचार्यस्य प्राबल्यं समजायत। किञ्च अस्मिन्नेव लग्ने केतुकुजयोः मेलेनमस्ति। अतः यद्यपि अनिश्चय ज्ञानमस्ति। तथापि धैर्यवान् भवति। एवमेव अस्याचार्यस्य स्वगृहं अस्ति चेदपि तस्मिन् गृहे भेदनं छेदनञ्च भवेत्। परन्तु लग्नाधिपतिबुधः पञ्चमे स्थाने स्थित्वा शुभफलं ददाति ज्ञानञ्च प्रयच्छति।

द्वितीयस्थानाधिपति शुक्रः बाधकाधिपति गुरुणा सह मेलयति, तेन कारणेन आबाल्ये वयसि अन्धत्वं संभवेत्। परन्तु अयमन्धकारेव अस्य ज्ञानस्य कीर्तेः हेतुः भवति। यथाहि तृतीयस्थानन्तु कीर्तिः प्रयच्छति। अस्मिन् स्थाने एकादश स्थानस्य अधिपतिः चन्द्रः अनुराधा नक्षत्रे स्थित्वा कीर्तिं प्रयच्छति, एवमेव तृतीयस्थानाधिपति अङ्गारकः लग्ने स्थित्वा कीर्तिं ददाति अतः अयमाचार्यः कीर्तिमान् इत्यत्रनैव वक्तव्यतास्ति। ततः चन्द्रः तृतीयस्थाने स्थित्वा मृदुभाषणं ददाति, अतः अयं मृदुभाषी भवति।

चतुर्थस्थानाधिपतिः गुरुः पञ्चमस्थाने स्थित्वा सुशीलत्वमुदार-गुणत्वं च प्रयच्छतीति कारणेनायं उदारगुणोपेतः सुशीलाचारशीलश्च भवति। एवं सूर्यशुक्रबुधानां मेलनं आचार्यस्यास्य संशोधने, विचारे, विज्ञाने पुस्तकरचने च निपुणत्वं प्रयच्छति, अत एवोक्तं अयमाचार्यः विचारनिपुणः, पुस्तकरचने नैपुण्यं प्रदर्शयति। बहवः साहित्य ग्रन्थाः अनेन विरचिताः सन्ति।

**स्थानफलं जातकफलञ्च**

ततः अस्याचार्यस्य इष्टदेवः विष्णुः नारायणस्य सारांशे एव भवेदिति सुष्ठु वक्तुं शक्यते। यथाहि दशमस्थानाधिपतिः बुधः। बुधेत्युक्ते नारायणांशादेवैव भवेत् इति शास्त्रेणोक्तं तद्रीत्या नारयणांशः रामः इष्टदेव इत्यपि वक्तुं शक्यते। ततः चतुर्थस्थानाधिपतिः गुरु-बुध-सूर्य-शुक्रैः सह मेलयित्वा इममाचार्यं ज्ञानवान्, बुद्धिचातुर्यं, भाषाकौशलं शास्त्रेनैपुण्यं च प्रदास्यति। एवमेव उन्नतपदवीमलङ्कुर्याद् इति अस्यविधिः। एवं शुक्रः पञ्चमस्थाने स्थित्वा दैवबलं, प्राबल्यञ्च प्रदास्य औन्नत्यं जीवने संभवति इत्यत्र अतिशयोक्तिः नास्ति। न केवलमयं गुरुः तुरीयस्थानाधिपतिः अपितु बाधकाधिपतिः च। तादृश बाधकस्यानाधिपतिना सह सूर्यशुक्रबुधाः संयोज्य पञ्चमस्थाने वर्तन्ते अतः सौभाग्यमस्ति चेदपि तदनुभवितुं न शक्यते। किञ्च षष्टमस्थानाधिपतिः शनिः द्वादशेस्थाने अस्तङ्गतः इत्यनेन कारणेन राजयोगः संभवति। सामान्यतया बाधकाधिपतिना सह ये ग्रहाः मिलन्ति तेऽपि अशुभफलमेव प्रदास्यन्ति इति नियतिः। परन्तु अत्र उभयलग्नस्य सप्तमाधिपतिः अयं गुरुः स्वनीचस्थाने बलहीनः भवतीत्यनेन कारणेन सूर्यशुक्रबुधाः शुभफलप्रदाः भवन्ति । ज्ञानसौभाग्यफलप्रदाः भवन्ति।

एवमेव अस्य जातकस्य गुरुः बाधकाधिपतिरिति वक्तुं न शक्यते, यतो हि गुरुः वराहमिहिर बृहत्जातके उक्तमस्ति यत् राहुकेतोः स्वक्षेत्रं इति नास्ति, अतः यत्र तौ विद्येते तत्क्षेत्रमेव तयोः इति नास्ति, अतः यत्र तौ विद्येते तत्क्षेत्रमेव तयोः स्वक्षेत्रमिति ज्ञायते। अतः अस्मिन् जातके राहुरेव बाधकाधिपतिः न तु गुरुः। परन्तु सप्तमस्थानाधिपति इत्यनेन कारणेन एवं "कारको भाव नास्ति" इत्युक्तरीत्या यत्र गुरुः वर्तते तस्य स्थानफलस्य नाशं भवति इत्यपि वराहमिहिरस्य सिद्धान्तः। तस्य सिद्धान्तानुसारेण पुत्रो वा पितृ भाग्यं वा न स्याद् इति सामान्यधर्मः। किन्तु गुरुदृष्टेः बलं अधिकं स्याद् इत्यपि आचार्यस्य राद्धान्तः एव। तदनुसारेण राजयोगः संभवति, यतो हि पञ्चमस्थानान्नवमैकादशलग्नेषु गुरुदृष्टिः भवति अत एव कारणेन भाग्यं, लाभः आत्मवैराग्यं, आत्मज्ञानं, संस्कृते पाण्डित्यं च भवति।

एवञ्च क्रमेण षष्टमस्थाने नकोऽपि ग्रहः विद्यते, अस्य स्थानस्य कारकत्वं शनैः विद्यते, अयञ्च शनिः द्वादशस्थाने अस्तङ्गत्वा सप्तमदृष्ट्या

स्वक्षेत्रं दृश्यते अत एव शत्रुः न भविष्यति परन्तु रोगस्संभवत्येव। सप्तमस्थाने उभयराशौ राहुः बाधकाधिपतित्वं भूत्वा बाधकान् उत्पद्यते। तेन कारणेन कलत्रं न संभवेत्। अस्यां राहु दशायां बाधकान् संभविष्यत्येव। क्रमेणाष्टमस्थानाधिपतिः कुजः लग्ने स्थित्वा दीर्घायुः कुर्यात् इत्यत्रापि न संशयः। भाग्याधिपतिशुक्रः लग्नात्पञ्चमस्थाने स्थित्वा भाग्यान् प्रदास्यति, भोज्यान् च, किन्तु सर्वदा तान् भोगाननुभवितुं न शक्यते, यतो हि मकरशुक्रस्य तादृशं बलं नास्त्येव किल तस्मात्कारणात् इदं फलम्। किन्तु स्वस्मिन् वर्तमानं सौभाग्यं सर्वं सर्वेषां परोपकारत्वेन व्ययीक्रियते यथा हि अस्याचार्यस्य धर्मकर्माधिपति योगः विद्यते । अयं योगः नवमदशम स्थानाधिपतेः मेलनेन संभवति। तादृशः योगः अस्मिन् जातके शुक्रबुधयोः मेलनं वर्तते तेनैव कारणेन धर्मस्थापनं धर्मकार्यञ्च करोति। अस्य आचार्यस्य जीवनस्थानं नाम दशमस्थानाधिपतिः बुधः पञ्चमस्थाने स्थित्वा पुण्यं प्रदास्यति। यतः उभयराश्याधिपतिः अथवा केन्द्राधिपतिः त्रिकोणे विद्यते चेत् बलाधिकं प्रयच्छेत् इति नियमः, एव मेव अयं बुधः लग्नाधिपतिरपि तेनापि कारणेन बलाद्विकं दास्यत्येव। तेन कारणेन जीवनस्य कष्टं न भवति। धर्मकार्ये चिन्तनं, पुस्तकरचने वृत्तिः च संभवति । अयञ्चाचार्यः जगद्गुरुः इति कथ्यते, अस्य कारणं तु दशमस्थानाधिपतिः बुधः नवांशे मीनराशौ विद्यते, एवमेव राशिचक्रे गुरुणा सह मेलयति तेन आचार्यस्य गुरुत्वं समजायत इत्यपि सुष्ठु दृश्यते।

**उपसंहारः**

अस्मिन् संशोधने श्रीमतः जीवितस्य भगवतः जगद्गुरु रामभद्राचार्यस्य जन्मकुण्डलिमनुसृत्य किञ्चित् तस्य जातकमालोच्यते। प्रथमतः उपोद्घातानन्तरं ग्रहाणां सामान्य फलानि, जन्म नक्षत्र फलानि, लग्नफलं, स्थानफलं, जातकफलं, राशिमहत्वं इति क्रमशः जातकं संयगालोच्य अन्ततः उपसंहारेण संशोधनसमाप्तिः भवति। ग्रहाणां सामान्यफलनिरूपणे वराहमिहिराचार्यानुसारेण बृहज्जातकात् काञ्चन विषयान् उद्धृत्य निरूप्यते यथामतिः। ततः जन्मनक्षत्रफलनिरूपणाय कुटुम्बज्योतिषग्रन्थात् काञ्चन विषयानुद्धृत्य संयग् निरूप्यते। एवमेव लग्नस्थानजातक फलानां निरूपणाय बृहज्जातकम्, उत्तरकालामृतम् इति ग्रन्थद्वय साहाय्येन सुष्ठु निरूप्यते। जातकपारिजातग्रन्थात् विषयान् स्वीकृत्य लग्न स्फुटं कृत्वा भावस्फुटञ्च परिगण्यते । एवमेव पूर्वोक्त ग्रन्थ साहाय्येन आचार्यस्य जातकं संयग्परिगण्यते यथामतिः। अस्मात् जातकात् किं ज्ञायते चेत् पुस्तकरचनं, पुस्तक संशोधनं, आचारशीलत्वं, वेदशास्त्रेषु निपुणत्वं, ऋजुता, मृदुभाषी, उदारगुणत्वमित्यादयः सद्गुणाः अस्याचार्यस्य विद्यन्ते तादृशोत्कृष्टमिदं जातकमित्यस्य नैव संशयः। जलनिधिसोमः इति tr7tr6tyr वाच्यं आचार्यस्य उचितमेव । आचन्द्रार्कं आचार्यस्य आयुर्भवेदिति प्रार्थयामः।

## साहायकग्रन्थानां विवरणम्


1. बृहज्जातकम्
2. जातकपारिजातम्
3. कुटुम्बज्योतिषम्
4. उत्तरकालामृतम्
5. 222.scientificastrology.com



*शोधच्छात्रा एवं सहायकाचार्या*
*संस्कृतविभागः श्रीमद्आण्डवन् कला एवं विज्ञानमहाविद्यालयः*

ISSN 2456-3420

# ज्यौतिषे आयुर्विज्ञानम्

डॉ. विष्णुकुमारनिर्मलः

''शरीरं व्याधिमन्दिरम्'' इति लोके प्रसिद्धिरस्ति वातपित्तकफादिभिः त्रिदोषैः पाञ्चभौतिकं शरीरमिदं व्याधिमनुभवत्येव। आयुर्वेदे नाम चिकित्साशास्त्रे एतेषां त्रिदोषाणां विशेषविचारः तथा त्रिदोषविकारजन्यरोगाः रोगोपशमनोपायाश्च वर्तन्ते। ऋग्वेदे, अथर्ववेदे तथा सुश्रुतसंहिता, चरकसंहितादि-संहिताग्रन्थेषु च आयुर्विज्ञानाख्यचिकित्साशास्त्रं समुपलभ्यते। वैदिककालादेवायुर्वेदस्य बहून् व्यवहारोपायान् भौतिकतत्त्वदर्शिनः ऋषिमुनयश्च स्वस्व शिष्येभ्यः प्रशिक्षेरन्। अनया गुरुशिष्यपरम्परया वैदिककालादाधुनिककालपर्यन्तमस्यायुर्वेदस्य लोकोपकारकता प्रवर्तमानास्ति।

सर्वेषां ग्रहाणां कक्षाकेन्द्राश्रयोऽस्ति भूः। सूर्यकक्षायामपि मेषवृषमिथुनादीनां द्वादशराशीणां तथा अश्विनी-भरणी-कृत्तिकादिसप्तविंशतिनक्षत्राणाञ्च स्थानानि वर्तन्ते। तदर्थं सूर्यचन्द्रादिनवग्रहाणाम्, द्वादशराशीणाम्, सप्तविंशतिनक्षत्राणां च प्रभावेन प्रभाविताः भवन्ति इमे पार्थिवाः। यदि च सर्वे पार्थिवाः ज्योतिश्चक्रद्वारा प्रभाविताः भवन्ति तथापि पाञ्चभौतिकस्य रक्त-मांस-पुरीषादिभिः निर्मितप्राणीमात्रस्य ज्ञानविज्ञानव्यवहारकुशलस्य मानवस्योपरि विशेषप्रभावः वरीवर्ति एव। मानवानामुपरि राशीणाम्, नक्षत्राणाम्, ग्रहाणां च प्रभावमाधारीकृत्य वेदे, वेदाङ्गज्यौतिषे तथान्यज्योतिषग्रन्थेषु च बहवः विषयाः विमृश्यन्ते। तेषु विचारविमर्शविषयेषु शास्त्रोक्तरोगचिकित्साविषयः अन्यतमः।

सामान्यतः ज्योतिषशास्त्रस्य त्रयः स्कन्धाः सन्ति। सिद्धान्त, संहिता, होरा च। होरा शास्त्रे जातकस्य जीवने शुभाशुभघटितघटनानां सविस्तृतरूपेण वर्णनमुपलभ्यते। शास्त्रेऽस्मिन् फलादेशस्य बहवः आधाराः बहवश्च प्रकाराः वर्तन्ते। परन्तु जन्मकालिकग्रहस्थितिम् आधारीकृत्य यः फलादेशः क्रियते तत्फल सूक्ष्मातिसूक्ष्मं भवति। आदौ सृष्टिरचयिता परमेश्वरेण आकाशस्थग्रहाणां निर्माणं चकार। उक्तञ्च-

**''येन द्यौरुग्रा पृथिवी च दृढ़ा येन स्वः स्तभितं येन नाकः।**
**यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम।।''**[1]

आकाशस्थग्रहाणां प्रभावः पृथिव्याः प्रत्येक प्राणिषु अवलोक्यते इति (सर्वसम्मतमतम्) निर्विवादः। सर्वेषु पृथ्वीगतप्राणिषु मनुष्यः एव सर्वश्रेष्ठबुद्धिजीवी च वर्तते। ग्रहाः स्वगुण-धर्म-रूप-रंग-स्वभावादयः शिशुपिण्डोपरि गर्भावस्थातः एव दृश्यन्ते। जन्मनः मृत्युपर्यन्तं ग्रहाणां शुभाशुभफलं प्रतिप्राणिषु अवलोक्यते। श्रीमद्भगवद्गीतानुसारेण मनुष्यः कृताकृतकर्मणां फलं अवश्यमेव प्राप्नुवन्ति। यदा जातकः निषिद्धम् अनुचितं वा कर्म (कार्य वा) करोति तर्हि सः निषिद्धकर्मणां फलं अनेकरूपेण प्राप्नोति। तत्रैव एकं फलमस्ति रोगः। उक्तञ्च केनचित् ''पहला सुख निरोगी काया दूजा सुख गांठ में माया'' यदि कश्चिद् पुरुषः रोगेण ग्रस्तोऽस्ति स कियान् दुःखी वर्तते सैव अभिव्यञ्जयितुं (वक्तुम्) शक्नोति। यदि रोगी रोगमज्ञात्वा अनुचितौषधीं स्वीकरोति चेत् रोगः (शान्ताभावात्) वर्द्धते। इत्यवस्थायां रुग्णमानवस्य जन्मकुण्डलीं दृष्ट्वा रोगज्ञानं निदानञ्च निश्चिनोति (सुनिश्चितं भवति)।

कुशलः वैद्यः नाडीयन्त्रस्य परीक्षां कृत्वा शारीरिकरोगज्ञानं वैद्यकशास्त्रानुसारं कर्तुं शक्नोति किन्तु उत्तमः दैवज्ञः नाडीयन्त्रस्य परीक्षां विना केवलं जातकस्य जन्मकुण्डल्याः अवलोकेन (शारीरिक) रोगाणां ज्ञानं निदानं च कर्तुमर्हति। कुशलः वैद्यः वैद्यकशास्त्रानुसारेण रुग्णमानवस्य जिह्वा-नेत्र-त्वक्-मल-मूत्र-नाडी-स्वर-आकृतिः इत्याद्यष्टभिः विधिभिः निदानं क्रियते तथैव कुशलः दैवज्ञः ज्योतिषशास्त्रानुसारेण रुग्णजातकम् अदृष्ट्वा केवलं तस्य जन्मकुण्डल्याः भाव-राशि-लग्न-ग्रह-युत्यादिभिः रोगनिदानं कर्मुमर्हति। ज्योतिषशास्त्रे ग्रहैः वात-पित्त-कफ इत्यादिदोषाणामुत्पत्तिः जायते। अर्थात् रोगकारकः यदि सूर्यः वर्तते तदा सः पित्तसम्बन्धी दोषं जातके जनयति। एवमेव अन्यैः ग्रहैः अपि ज्ञातव्यः।

| | ग्रहाः | दोषः |
|---|---|---|
| 1. | गुरुः चन्द्रः च। | कफः। |
| 2. | शनिः राहुः केतुश्च | वातः। |
| 3. | सूर्यः भौमश्च | पित्तः। |
| 4. | चन्द्रः शुक्रश्च | वातकफात्मकी। |
| 5. | बुधः | त्रिदोषात्मकः |

उक्तञ्च प्रश्नमार्गे-

**पित्तं वातकफौ पित्तं वातपित्तकफाः कफः।**
**कफवातौ च वातश्च सूर्यादीनां प्रकीर्तिता।**[2]

जातकस्य जन्मकुण्डल्यां द्वादशभावेभ्यः विविधविषयाणां विचारः क्रियते। तेषु भावेषु मुख्यरूपेण षष्ठभावात् रोगविचारः क्रियते तथा हि अष्टमभावात् षष्ठेशतः, द्वादशेशतः षष्ठेशेन च सह यः ग्रहोऽवस्थितो भवेत् इत्येतेभ्यः अपि रोगविषये विचारः क्रियते। विशेषतः रोगोत्पत्तिः अशुभग्रहत्वात् जायते। जन्मकुण्डल्याः द्वादशभावेभ्यः एव ज्ञातुं शक्यते यत् शरीरस्य कस्य भागे पीडा रोगः वा वर्तते। यथा-

| | | | |
|---|---|---|---|
| 1. | प्रथमभावात् | - | मुख-दन्त-गला-जिहा-मस्तकादिषु पीडा। |
| 2. | द्वितीयभावात् | - | दक्षिणनेत्रे। |
| 3. | तृतीयभावात् | - | कर्णे, गीतायाम्, हस्ते च। |
| 4. | चतुर्थभावात् | - | उदरे स्कन्धे च। |
| 5. | पञ्चमभावात् | - | जंघायाम्, कटपुपरिभागे |
| 6. | षष्ठभावात् | - | दक्षिणपादे, गुह्यभागे च। |
| 7. | सप्तमभावात् | - | नाभी उदरस्य मध्यभागे। |
| 8. | अष्टमभावात् | - | वामपाद गुह्यभागे च। |
| 9. | नवमभावात् | - | कटेः उपरिभागे। |
| 10. | दशमभावात् | - | उदरे। |

11. एकादशभावात्- वामहस्ते, कर्णे, ग्रीवायां च।

12. द्वादशभावात् - वामनेत्रे, पादतले च।

उपर्युक्तद्वादशभावेभ्य: कस्मिन्नपि भावे पापग्रह: स्थित: स्यात् अथवा तस्य प्रमाणयुतिम्, प्रतियुतिम्, शुभाशुभयोगम्, दृष्टिञ्च दृष्ट्वा शरीरस्य तस्मिन्नेव भागे रोगनिर्धारणं भवति। ज्योतिषशास्त्रानुसारं प्रथमभावात् वैद्यस्य, चतुर्थभावात् औषध्या:, षष्ठभावात् रोगस्य, दशमभावात् रोगस्य साध्यमसाध्यमिति निश्चितो भवति। जन्मकुण्डल्यां 4/7/8/12 भावेषु यदि चन्द्र: स्थितो भवेत् तर्हि योगोऽयं रोगीवैद्ययो: कृते यशप्रदो नास्ति इति वदन्ति दैवज्ञा:। यदि लग्नाधिपति: शुभग्रहो भवेत् तर्हि वैद्याय शुभ: यशप्रदो च भवति, किन्तु औषधीस्वीकरणात् पूर्वं रूग्णजातकस्य चतुर्थभावस्य स्वामी शुभग्रह: भवेत् अथवा तेन युक्त:, अथवा तद्दृष्टो वा च भवितव्य:। यदि पापग्रहा: गोचरभ्रमणेन (2/6/8/12) द्वितीयषष्ठाष्टद्वादशभावेषु भवेयु: अथवा पापग्रहाणां (2/6/8/12) भावेषु युति-दृष्टि-योगादय: वा स्यु:। यदि च एतेषां महादशाऽन्तर्दशा तदानीमेव प्रारभ्यते तर्हि अशुभफलं निश्चितं (तत्क्षणमेव) प्राप्नोति। रोगज्ञानस्य केचन योगा:-

1. यदि जन्मकाले राहु: केतु: वा षष्ठभावे भवेत् तर्हि दन्ते औष्ठे च रोगो भवति। उक्तञ्च जातकालङ्कारे

श्रीगणेशदैवज्ञेन-''दन्ते दन्तच्छदे वा कुमुदपतिरिपु: संस्थित: षष्ठभावे।''

2. लग्नेश: कुजबुधभवने (राशीषु) द्वावपि कस्मिन्नपि भावे स्थितो भवेत् तथा च स्वशत्रुभि: दृष्ट: चेत् तदा गुदासमीपे रोग: जायते। उक्तञ्च जातकालङ्कारे- केतुर्वा लग्ननाथ: कुजबुधभवने संस्थित: क्वापि दृष्ट:। स्वेन प्रत्यर्थिना वा भवति जनुषि चेदासनार्धे सरोग:।

3. यदि लग्नात् मंगलशनैश्चरौ षष्ठभावे स्यातां तर्हि रक्तवायुविकारा: उत्पन्ना: भवन्ति। उक्तञ्च जातकालङ्कारे-''तौ भूमीसूर्यपुत्रौ यदि रिपुगृहगो तद्भव: स्याद्गदो नु:।''

4. यदि षष्ठेश: स्वगृहे, लग्ने, अष्टमभावे वा स्थितो भवेत् तर्हि जातकस्य शरीरे व्रणो भवति। उक्तञ्च बृहत्पाराशरहोराशास्त्रे-

**स्वभे षष्ठाधिप: पापो देहे वाप्यष्टमे स्थित:।**
**तदा भवेद् व्रणो देहे भावराशिगतेऽङ्के।।**[3]

यदि लग्ने षष्ठेश: अष्टमेश: वा सूर्येण युक्तो भवेत् तदा ज्वरगण्ड:, भौमेन युक्ते सति ग्रन्थिरोग: शस्त्राघात: व्रणो वा भवति, बुधयुते सति पित्तं भवति। गुरुयुक्ते सति रोगाभाव:, शुक्रयुक्ते सति स्त्रीभि: रोगोत्पत्ति:, शनियुक्तत्वात् वायुसम्बन्धिरोग:, राहुयुक्तत्वात् अन्त्यजजाते: गण्डरोग:, केतुयुक्तत्वात् नाभी व्रणो भवति। उक्तश्च बृहत्पाराशरहोराशास्त्रे-

**लग्ने षष्ठाष्टमाधीशौ रविणा यदि संयुतौ,**
**ज्वरगण्ड: कुजे ग्रन्थि: शस्त्रव्रणमथापि वा**
**बुधेन पित्तं गुरुणा रोगाभावं विनिर्दिशेत्**
**स्त्रीभि: शुक्रेण शनिना वायुना संयुतो यदि**
**गण्डश्चाण्डालतो नाभौ तम: केतुयुते भयम्।।**[4]

यदि रोगस्थन गते पापग्रह: रोगेशश्चापि पापग्रहयुक्तो भवेत् तथा च राहुशनैश्चरो युक्तौ स्यातां तर्हि जातक: सदैव रोगी भवति। उक्तश्च बृहत्पाराशरहोराशास्त्रे-

**रोगस्थानगते पापे तदीशे पापसंयुते**
**राहुणा संयुते मन्दे सर्वदा रोगसंयुत:।**[5]

यदि रवि: केतु: 3/6/7 राशीणाम् अष्टमभावे मंगलशनैश्चरयो: दृष्टि: अस्य भावोपरि स्यात् तर्हि जातक: अवश्यमेव ''बवासीर'' इति रोगेण ग्रस्तो भवति। जातकस्य जन्मकुण्डल्यां चन्द्रमस: द्वितीयद्वादशभावयो: शनि: भौमो वा भवेत् अथवा एतयो: स्थानयो: पापराशी भवेत् तदा जातक: अवश्यमेव ''यक्ष्मा'' इत्यनेन रोगेण ग्रस्तो भवति।

**रोगनिदानम्-**

अस्मिन् जगति जीवजन्तूनां सुखदु:खम्, शुभाशुभमित्यादि ग्रहाधीनं भवति। तस्मात् ये जन्तव: सुशान्तिकाम:, श्रीकाम-वृष्टि-आयु-पुष्टि इत्यादिकं वाञ्छन्ति ते श्रद्धाभक्तिपूर्वकं यज्ञं समाचरेत् इति वृहत्पाराशरहोराशास्त्रे उक्तमस्ति। जातकस्य जन्मकण्डल्यां यदि अरिष्टग्रहा: भवेयु: तेषां शान्त्यर्थं निदानार्थं वा ग्रहपूजन-मन्त्र-जप-हवन-ब्राह्मणभोजनदक्षिणा-रत्न-सेवादय: कर्तव्या:।

**ग्रहपूजनम्-**

यस्य ग्रहस्य यथा वर्णं भवति तस्य तथैव पुष्पम्, वस्त्रम्, चन्दनम्, धूपम्, गन्धम्, दीपम्, नैवेद्यम्, अन्नं दक्षिणाञ्च दातव्य:। उक्तश्च वृहत्पाराशरहोराशास्त्रे-

**वर्णानुसारं खेटानां वासांसि कुसुमानि च।**
**धूपदीपसुगन्धादि-द्रव्याणि च ददीत वै।।**
**तत्तद्ग्रहोदितं द्रव्य-मन्नपानादिकं तथा।**
**बलिं च विधिवद् भक्तिपूर्वकं विनिवेदयेत्।।**

1. ग्रहमन्त्रा:-अरिष्टग्रहशान्त्यर्थं ग्रहानुकूलमन्त्रजपं कर्तुं शक्नुवन्ति। यथा-सूर्यस्य कृते ''आकृष्णेन रजसा वर्तमानो'' इति वैदिकमन्त्रस्य सप्तसहस्रसंख्यकजपं (7,000) कृत्वा सूर्यग्रहस्यारिष्ट-कारणानि शान्तं कर्तुं शक्नुवन्ति।

2. चन्द्र:-इमं देवा असपत्न घुम्... इति वैदिकमन्त्रस्य एकादशसहस्रजपं (11,000) कृत्वा चन्द्रग्रहस्य कोपं शान्तं कर्तुं शक्नुवन्ति।

3. मङ्गल:-अग्निमूर्धा दिव.... इति मन्त्रस्य दससहस्र (10,000) जपं कृत्वा ग्रहोऽयं शान्तं भवितुमर्हति।

4. बुध:-उद्बुधस्व....इति मन्त्रस्य नवसहस्रजपं (9000) कृत्वा ग्रहोऽयं शान्तं भवितुमहति।

5. बृहस्पति:- बृहस्पते अति यदर्यो... इत्यादि मन्त्रस्य नवदशसहस्र(19,000) जपं कृत्वा अस्य ग्रहस्य शान्तिं कर्तुं शक्नोति।

6. शुक्र:- अन्नात्परिश्रुतो रसं....इति मन्त्रेण षोडशसहस्र (16,000) जप करणेन ग्रहशान्तिं भवति।

7. शनि:- शन्नो देवीरभीष्टय.... इति मन्त्रस्य त्रयोविंशतिसहस्रजपं कृत्वा ग्रहशान्तिकर्तुं शक्नोति।

8. राहु:- कयानश्चित्र... इति मन्त्रस्य अष्टादशसहस्रजपं (18,000) कृत्वा ग्रहस्य कोपं शान्तं कर्तुं शक्नोति।

ISSN 2456-3420

9. केतु- केतुं कृण्वन्ति... इति मन्त्रेण सप्तदशसहस्रजपं (17,000) कर्तव्यम्। अनेन अस्य ग्रहस्य शान्तिः भवति। उक्तञ्च बृहत्पाराशरहोराशास्त्रे-

**'आकृष्णेन' 'इमं देवा' 'अग्निमूर्धा दिवः' ककुत्।**
**'उद्बुधस्वे' ति मन्त्राश्च जपेदथ बृहस्पते।।**
**'अन्नात् परिश्रुतश्चेति' शन्नो देवीरभीष्टये।**
**कया नश्चित्र इत्येवं केतुं कृण्वन्निमांस्तथा।।**
**सप्तरुद्रा दिशो नन्दा नवचन्द नृपास्तथा....** [7]

**ग्रहशान्त्यर्थं ग्रहसमिधा हवनञ्च-**

ग्रहशान्त्यर्थं ग्रहसमिधा हवनयोः प्रयोगं कर्तुं शक्यते। यथा सूर्याय अर्कः, चन्द्राय पलाशः, भौमाय खदिरः, बुधाय अपामार्गः, बृहस्पतये पिप्पलः, शुक्राय उदुम्बरः, शनैश्चराय शमी, राहवे दूर्वा केतवे कुशा च वर्तते। मधु-घृत-दधि-दुग्ध इत्यादि चत्वारौ सम्मिल्य प्रतिग्रहशान्त्यर्थं 108 अथवा 28 संख्यायां हवनं कुर्यात्।

**ब्राह्मणभोजनम्-**

सूर्यादिग्रहप्रीत्यर्थं श्रद्धया ब्राह्मणभोजनं कारयितव्यम् इति बृहत्पाराशरहोराशास्त्रे उक्तम्। सूर्याय गुडौदनम्, चन्द्राय पायसः, भौमाय हविष्यान्नम्, बुधाय क्षीरषष्टिकम्, बृहस्पतये दध्यौदनम्, शुक्राय हवि, शनैश्चराय चूर्णम्, राहवे माषंः, केतवे चित्रान्नम् (खिचड़ी) इति उक्तञ्च केनचिनत्-

**गुडौदनं पायसं च हविष्यं क्षीरषष्टिकम्।**
**दध्योदनं हविश्चूर्णं माषं चित्रान्नमेव व।।**[8]

**ब्राह्मणदक्षिणा-**

सूर्यादिग्रहप्रसन्नकरणार्थं ब्राह्मणाय दानं दातव्यं क्रमशः। सूर्याय गौ, चन्द्राय शंखम्, भौमाय अनड्वान् (बैल) बुधाय सुवर्णः हेमः वा, बृहस्पतये वस्त्रम्, शुक्राय हयः (अश्वः), शनैश्चराय कृष्णा गौ, राहवे आयसनिर्मितास्त्रम्, केतवे च छागः इत्यादि। उक्तञ्च बृहत्पाराशरे-

**धेनुः शङ्खस्तथाऽनड्वान् हेम वासो हयः क्रमात्।**
**कृष्णा गौरायसं छागः एता रव्यादिदक्षिणा।।**[9]

**रत्नानि-**

अनिष्टग्रहाणां कुप्रभावनिवारणार्थं रत्नानि उपरत्नानि च प्रयुज्यन्ते। यथा सूर्याय माणिक्यम्, चन्द्राय मौक्तिकम्, भौमाय प्रवालः, बुधाय मरकतमणिः (पन्ना), बृहस्पतये पुखराजः, शुक्राय वज्रमणिः (हीरा), अस्य उपरत्नं फिरोजा इति अनेन रत्नेन भूतबाधा दूरी भवति। ओपल इत्यपि शुक्रस्य उपरत्नम् अस्ति। अनेन सदाचार सच्चिन्तने, धार्मिककार्येषु रुचिः भवति। शनैश्चराय नीलमणिः (नीलम), राहवे गोमेदकः, केतवे वैदूर्यः (लहसुनिया) इत्यादि।

**दानानि-**

जातकस्य जन्मकुण्डल्यां उत्पन्नरोगाणां निवारणार्थं ग्रहानुकूलं मूंग-कपूर-कस्तूरी इत्यादिकं दानं कर्तव्यम्। मया अधोलिखितदान-पदार्थाः प्रस्तूयन्ते।

**ग्रहानुसारेण उत्तपन्नरोगाः-**

ग्रहाः स्वप्रकृत्यानुसारेण जातकस्य देहे रोगाः उत्पद्यन्ते। यथा-

1. सूर्यः- तीव्रजलनम्, दाह, वेदना, अन्तरज्वरो च भवति।

2. चन्द्रमा-यदि चन्द्रमा ऊर्ध्वमुखराशौ वर्तते तदा वमनं तिर्यग्मुखराशौ वर्तते तदा मूत्रकृच्छः, अधोमुखराशौ वर्तते तदा अतिसारः तेषां च कारयति।

3. भौमः-जलनदाहरक्तविकारत्वात् व्रणः जायते।

4. बुधः-शीतज्वररक्तविकारत्वात् व्रणः जायते। तथा च बुद्धिभ्रमोऽपि भवति।

5. गुरुः-सन्निपातः, बुद्धौ कुटिलता (मानसिक रोगः) अजीर्णः, श्वासादिरोगाः भवन्ति।

6. शुक्रः-अग्निभयम्, प्रमेहरोगश्च।

7. शनिः- तृष्णा, अरुचिः, शरीरस्थसर्वाङ्गेषु पीडा वर्तते।

यथोक्तं प्रश्नमार्गे-

**अत्यग्नि वेदनामन्तर्ज्वरं चार्कोऽथ चन्द्रमाः**
**छर्दिर्दमूर्ध्वने तिर्यग्वक्त्रे मूत्रादिबन्धनम्।।।।**[10]

रासांशरूपेण वक्तुं शक्यते यत् कुशलः दैवज्ञः जातकस्य जन्मकुण्डलीं दृष्ट्वा शारीरिकरोगवर्णनं निदानञ्च कर्तुं शक्नोति। अशुभग्रहाणाम् अनिष्टफलसमाप्त्यर्थं जपानुष्ठान-उपवास-दान-स्तोत्रपाठ-रत्नधारणादिकं कर्तव्यम्। अनेन स्पष्टो भवति यत् अस्माकं पूर्वजैः ज्योतिषशास्त्रं सर्वेषु शास्त्रेषु अन्यतमम् इति उक्तम्। मनुष्यस्य जन्मकुण्डल्यां यः ग्रहः अनिष्टफलदायको भवेत् जन्मसमये च यावन्त अंशाः भवेयुः तावत्सु अंशेषु गोचरयुक्तोऽथवा दृष्टो भवेत् तत्क्षणमशुभ-फल प्राप्नोति। यथा रोगपीडादयः।

**पादटिप्पणयः**

1. बृहत्पाराशरहोराशास्त्रम्, षष्ठभावफलाध्यायः- पं. देवचन्द्र झा, श्लोक-2 पृ-98।
2. तत्रैव श्लोक-9-12 पृ.-99।
3. तत्रैव श्लोक-13।
4. तत्रैव ग्रहशान्त्यध्यायः श्लोक-15-16।
5. तत्रैव ग्रहणजातदोषशान्त्यध्यायः श्लोक-8

*सहाचार्यः, ज्योतिषविभागः,*
*केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः, जयपुरम्*

ISSN 2456-3420

# जैमिनीसूत्रे आयुर्दायविचारः

गुलशनकुमारः

**प्रस्तावना-**

अस्मिन् ब्रह्माण्डे यत् किमपि विद्यते तत् सर्वः कालाधीनः वर्तते। तत्रापि सृष्टेः निर्मातुः ब्रह्मणः कालोऽपि निर्धारितः यस्य आयुषः अर्धः भागः व्यतीतः। यथोक्तञ्च-

**परमायुः शतं तस्य तयाऽहोरात्रसङ्ख्यया।**
**आयुषोऽर्धमितं तस्य शेषकल्पोऽयमादिमः।।**

तथैव अस्मिन् जगत्यपि प्रत्येकं प्राणीनां कालः निश्चितः वर्तते। वस्तुतः आस्तिकदर्शनदृष्ट्या यदा वयं विचारयामः तदा द्रव्यत्त्वात् कालः एकः नित्यश्च वर्तते। तथापि सिद्धान्तज्योतिषदृशा वयं कालस्य विभागद्वयं कर्तुं शक्नुमः-एकः कालः लोकानामन्तकृतः द्वितीयः कालो गणनात्मकः। तद्यथा-

**लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मकः।**
**स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उत्यते।।**

अतः ये केऽपि प्राणिनः अस्मिन् भूलोके जायन्ते ते पूर्वजन्मकृत-शुभाशुभकर्माश्रिताः एव जन्मं लभन्ते। तथैव शुभाशुभकर्माश्रितेनैव प्राणीनां ईश्वरेण आयुर्निर्धार्यते। तदाधारेण केचन पूर्णायुः प्राप्नुवन्ति केचन मध्यमायुं इतरञ्चाल्पायुम्।

विषयः- अस्मिन् जगति यदा कोऽपि जातकः जन्मं लभते तदा वयं सर्वादौ तस्य जातकस्य जीवनकालस्य ज्ञानं कुर्मः। जातकशास्त्रेषु वर्णितानां विभिन्नफलादेशानां कथनं तदैव सम्भवं यदा जातकस्य जीवनकाल ज्ञातः। यतो हि अल्पजीवनकाले किं तत्फलम्।

भारतीयज्योतिषशास्त्रे आयुर्दायः एकः अनुसन्धेयः विषयः वर्तते। यतो हि भिन्नेषु भिन्नेषु युगेषु अस्माभिः आयुर्मानं भिन्नं प्राप्तम्। साम्प्रतं विविधेषु जातकग्रन्थेषु आयुर्दायस्य निरूपणं वर्तते। तथापि महर्षिजैमिनिप्रणीते जैमिनीसूत्रे आयुर्दायस्य विस्तृतं वर्णनं कृतम्। जैमिनीसूत्रं सूत्रात्मकः ग्रन्थः वर्तते। यत्र प्रत्येकं सूत्राणां विस्तृताशयः वर्तते। जैमिनीमहर्षिणा आयुर्दायस्य यः विधिः प्रोक्तः सः अन्यजातकग्रन्थात् भिन्नः वर्तते।

जैमिनीमतानुसारम् आयुषः विचारं प्रकारत्रयेण क्रियते। प्रथम-सूत्रानुसारं-''आयुः पितृदिनेशाभ्याम्'' अर्थात् लग्नाष्टमेशाभ्यामायुः विचारणीयः। द्वितीयप्रकारेण आयुर्विचारः-''एवं मन्दचन्द्राभ्याम्'' अर्थात् लग्नचन्द्राभ्याम् अथवा शनिचन्द्राभ्याम्। अत्र प्रश्नोऽयमुत्पद्यते यत् कदा लग्नचन्द्राभ्यां तथा कदा च शनिचन्द्राभ्याम्? इति विसंवादे प्राप्ते लग्नगे सप्तमगे वा चन्द्रे सति तदा चन्द्रशनिभ्याम् आयुर्दायः सिद्ध्यते अन्यथा चन्द्रलग्नाभ्याम् विचारः करणीयः। यथोक्तञ्च-''पितृलाभगे चन्द्रे चन्द्रमन्दाभ्याम्।'' तृतीयप्रकारेण आयुर्विचारः-''पितृकालतश्च'' अर्थात् जन्मलग्नहोरालग्नाभ्यां आयुर्विचारः क्रियते।

भारतीयज्योतिषशास्त्रे आयुर्दायविषये यदा वयं विचारं कुर्मः तदा अस्माभिः विभागत्रयं क्रियते। दीर्घायुः, मध्यमायुः, अल्पायुश्च। कदा दीर्घायुः? कदा मध्यमायुः? कदा च अल्पायुः? तत्रोक्तञ्च सूत्रे-''प्रथमयोरुत्तरयोर्वा दीर्घम्'' अर्थात् याभ्यां ग्रहाभ्यामायुषः विचारः क्रियते तौ द्वयमेव चरराशिगतौ तदा दीर्घायुः भवति। अथवा एकस्तु स्थिरे द्वितीयश्च द्विस्वभावे तदापि दीर्घायुः भवति।''प्रथमद्वितीययोरन्त-योर्वा मध्यमम्'' अर्थात् याभ्यां ग्रहाभ्यामायुषः विचारः क्रियते तौ द्वयमेव चरराशौ अथवा स्थिरराशौ भवेतां तदा मध्यमायुर्योगः भवति। अथवा द्वयमेव विचारणीयौ अन्तिमराशौ अर्थात् द्विस्वभावराशौ गतौ तदापि मध्यमायुः भवति।''मध्ययोराद्यन्तयोर्वा हीनम्'' विचारणीयौ द्वौ एव स्थिरराशौ तदाल्पायुः भवति। तथा च यदि एकस्तु आद्यराशौ अर्थात् चरराशौ, अपरश्च अन्तयोः अर्थात् द्विस्वभावराशौ तदा अल्पायुयोगः भवति। यथोक्तञ्च बृहद्पाराशरहोराशास्त्रे-

**चरे स्थिरे तथैकैको मध्यमायुस्तदा भवेत्।**
**उभौ द्विभे प्रयातौ चेत् तदाप्यायुस्तु मध्यमम्।।**
**चरे त्वेको द्विभे चान्यः स्थिरगौ चेदुभावपि।**
**तदा स्वल्पायुरेव स्याज्जन्मिनो नात्र संशयः।।**

उपर्युक्तप्रकारत्रयेण आयुषि विचारे यदि प्रकारत्रयेणैव एकायुरेव प्राप्यते तदा तु सैव दीर्घः, मध्यः, अल्पायुः वा भवति। यदि प्रकारद्वयेन तु एकैव आयुः दीर्घ-मध्य-अल्पः वा भवेत् परञ्च तृतीयप्रकारेण भिन्नायुः तदा''संवादात् प्रामाण्यम्'' सूत्रानुसारं प्रकारत्रयेषु प्रकारद्वयेन यदायुर्भवति सैव आयुः तस्य जातकस्य भवति। परं यदि प्रकारत्रयेणैव एकेन तु दीर्घायुः, द्वितीयप्रकारेण मध्यमायुः तथा च तृतीयप्रकारेण अल्पायुः जायते। प्रकारत्रयेण भिन्न-भिन्नायुषि सत्वे ''विसंवादे पितृकालतश्च'' अर्थात् तदा तु जन्मलग्नहोरालग्नाभ्यामायुषः विचारानुसारमेव आयुं जानीयात्।

प्रकारत्रययोगेन दीर्घायुःभवति चेत्तदा एकविंशतिवर्षाणि (120) आयुर्भवति। तथैव योगद्वयेन अष्टोत्तरैकशतं (108) वर्षाणि आयुर्भवति। एकेन प्रकारेण दीर्घायुः भवति चेत्तदा षण्णवति (96) वर्षाणि भवन्ति। मध्यमायुषि योगत्रयेण अशीतिवर्षाणि (80) भवन्ति। योगद्वयेन द्विसप्ततिवर्षाणि (72) तथा च योगेनैकेन चतुष्षष्टिवर्षाणि (64) भवन्ति। अल्पे आयुषि योगत्रयेण द्वात्रिंशद्वर्षाणि (32) भवन्ति।

योगद्वयेन षट्त्रिंशत् योगैकेन च चत्वारिंशद्वर्षाणि (40) भवन्ति। यथोक्तञ्च–

**दीर्घे योगत्रयेणैवं नखचन्द्रसमाब्दकाः।**
**योगद्वयेन वस्वाशाः योगैकेन रसाङ्ककाः।।**
**मध्ये योगत्रयेणैवं खाष्टतुल्याब्दकाः स्मृताः।**
**द्व्युगाः योगद्वयेणात्र योगैकेनाब्धिषण्मिताः।।**
**अल्पे योगत्रयेणात्र द्वात्रिंशन्मितवत्सराः।**
**योगद्वयेन षट्त्रिंशत् योगैकेन च खाब्धयः।।**

निष्कर्षः–जैमिनीसूत्रे आयुर्दायस्य विस्तृतं विवरणं सूत्ररूपेण महर्षिणा प्रोक्तम्। जैमिनीमहर्षेः आयुर्दायं साधयितुं महत्त्वपूर्णः सिद्धान्तः वर्तते। आयुर्दायनिर्णये प्रकारत्रये लग्नाष्टमचन्द्रशनिग्रहाणां महत्त्वपूर्णं स्थानं वर्तते। एतेषां सर्वेषाम् आयुर्दायनिर्धारणे कारणमस्ति यत् लग्नात् जातकस्य देहस्य विषये विचारः भवति, अष्टमस्थानात् मृत्योः विचारः, चन्द्रात् मनसः विचारः तथा च शनिः मृत्योः स्वामी यमस्य स्वरूपः। जातकस्य जन्माङ्गचक्रे आयुर्निर्धारणे एतेषां त्रयाणां महत्त्वं सर्वाधिकं वर्तते। एतेषां स्थित्यनुगुणमेव वयं जातकस्य दीर्घ–मध्य–अल्पायुषः निर्णयं कर्तुं पारयामः इति जैमिनिमहर्षेः मतम्।

## सहायकग्रन्थाः


1. जैमिनीसूत्रम्, व्या.–पं. श्रीसीतारामशर्मा, चौखम्बा विद्याभवन–वाराणसी, 2015
2. जैमिनीसूत्रम्, व्या.–पं. गणपति लाल शर्मा, हंसा प्रकाशन जयपुर–2019
3. बृहत्पाराशरहोराशास्त्रम्, व्या.–दैवज्ञः पं देवचन्द्र झा, चौखम्बा प्रकाशन वाराणसी, 2015
4. बृहज्जातकम्, व्या.–पं. केदारदत्त जोशी, मोतीलाल बनारसीदास वाराणसी, 2013
5. सूर्यसिद्धान्तः, व्या. डॉ.सत्येन्द्रमिश्र, चौखम्बा संस्कृत भवन वाराणसी, 2012
6. भावमन्जरी, आचार्यमुकुन्ददैवज्ञः, रंजनपब्लिकेशन, 2003
7. भावप्रकाशः, श्रीजीवनाथः, चौखम्भा संस्कृत सीरीज–वाराणसी, 1998
8. भुवनदीपकः, पद्मप्रभुसूरिः, रंजनपब्लिकेशन, 2009
9. मानसागरी, श्रीमानसागरः, भारतीयविद्याप्रकाशन–दिल्ली, 1999
10. लघुजातकम्, वराहमिहिराचार्यः, चौखम्भासुरभारती–वाराणसी, 2004
11. वेदाङ्गज्योतिषम्, महर्षिलगधः, रंजनपब्लिकेशन, 2005



*शोधच्छात्रः*
*केन्द्रियसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, हिमाचलप्रदेशः*

ISSN 2456-3420

# षोडशसंस्कारस्वरूपम्

डॉ. सन्तोषकुमारतिवारी

**संस्कारशब्दार्थः**-समुपसर्गपूर्वकं 'डुकृञ् करणे' इत्यस्माद्धातोः भावे घञि इत्यवस्थायां सम्परिभ्यां करोतौ भूषणे च' इति सूत्रेण भूषणेऽर्थे सुटि कृते, अचोञ्णिति इत्यनेन अजन्ताङ्गस्य ञिति परे वृद्धौ कृतायां संस्कारशब्दो निष्पद्यते। संस्क्रियते अनेनेति संस्कारः। कथमिति संस्क्रियते श्रौतेन कर्मणा स्मार्तेन वा। ऋग्वेदे संस्कार इत्यस्य पवित्रीकरणमित्यर्थः। एवञ्च भूषणार्थकसुडागमविधानेन अस्य अलंकरणमित्यर्थोऽपि भवति। येन कर्मणा किञ्चिद् वैशिष्ट्यं शोभनं वा जायते, तदेव संस्कारपदवाच्यम्। संस्कारस्याभिप्रायोऽस्ति सा शुद्धा धार्मिकक्रिया, या जनैः दैहिक-मानसिक-बौद्धिकपरिष्काराय अनुष्ठीयते। संस्काराणां मूलभूतं प्रयोजनमस्ति मानवेषु नैतिकगुणानामाधानम्।

**संस्कारसंख्याविमर्शः-**

**गौतमेन तु चत्वारिंशत् संस्काराः वर्णिताः अपि च अष्टौ आत्मगुणाः।**

**वैखानसः अष्टादशशारीरिकसंस्काराणां परिगणनं कृतवान्।**

**मनुना गर्भाधानात् मृत्युपर्यन्तं त्रयोदशसंस्काराः वर्णिताः।**

**अङ्गिरास्तु पञ्चविंशतिसंस्कारानाह।**

**सुमन्तुमहर्षिणा अपि पञ्चविंशतिसंस्काराः।**

परवर्तिस्मृतिकाराः षोडशसंस्कारानेव स्वीकुर्वन्ति। व्यासस्मृत्यनुसारेण एते षोडशसंस्काराः-

**गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।**
**नामक्रिया निष्क्रमणोऽन्नाशनं वपनक्रिया।।**
**कर्णवेधो व्रतादेशो वेदारम्भक्रिया विधिः।**
**केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः।।**
**त्रेताग्निसंग्रहश्चेति संस्काराः षोडश स्मृताः।।**[1]

**संस्कारस्वरूपम्-**

**1. गर्भाधानम्**-गर्भ आधीयते येन कर्मणा तद्गर्भाधान कर्मनामधेयम्। तत्रर्तौ गर्भाधानं कार्यम्। रजः प्रभृतिषोडशरात्रान्त ऋतुकालः। गर्भ संधार्यते येन कर्मणा तद् गर्भाधानमित्यनुगतार्थ कर्मनामधेयम्।[2]

**निषिक्तो यत्प्रयोगेण गर्भः संधार्यते स्त्रिया।**
**तद् गर्भालम्भनं नाम कर्म प्रोक्तं मनीषिभिः।।**[3]

तच्च शिशोः मातुर्गर्भे बीजरूपेण प्रतिष्ठापनमेव गर्भाधानम्। बृहदारण्यकोपनिषदि विशिष्टगुणैः समन्वितान् पुत्रान् प्राप्तुं विशिष्टभोजनानां विधानं वर्तते। परवर्तियुगे गर्भाधानाय तिथीनां नक्षत्राणां च शुभाशुभत्वं पर्यालोचितम्। विज्ञानसम्मतं प्रतिभाति विधानम् इदम्। गर्भे स्थाप्यमानः शिशुर्मातुर्मानसपटलाङ्कितपुरुषस्य सादृश्यं प्राप्नोति।

**2. पुंसवनम्**-पुंसवनं नाम गर्भस्थशिशोः पुरुषत्वप्रदानम्। पुमान् प्रसूयते येन कर्मणा तत् पुंसवनम्। गर्भचलनात्पुरा तृतीये चतुर्थे मासे वा पुंसवनं कार्यम्।

**पुमान् प्रसूयते येन कर्मणा तत् पुंसवनमीरितम्**[4]
**आ ते योनिं गर्भ एतु पुमान् बाण इवेषुधिम्।**
**आ वीरोऽत्र जायताम् पुत्रस्ते दशमासस्य।।**[5]

अस्मिन्नवसरे गर्भ रक्षणार्थं पुत्रोत्पत्तये चायुर्वेदोक्तौषधीनां प्रयोगश्च क्रियते। पुंसवनसीमन्तोन्नयनसंस्कारविधिषु समायोजितं सोल्लासं कृत्यं स्वास्थ्यसंवर्धनाय भवति, एतेन गर्भस्यशिशोः कल्याणं जायते इति सुनिश्चितमेव। वैष्णवसंस्कृतौ पुंसवनार्थं वर्षपर्यन्तं विष्णोः स्तुतिः तस्याराधना पूजा च कर्तव्या इति विहितम्।

**3. सीमन्तोन्नयनम्**-यस्मिन् कर्मणि सीमन्तः केशेषु पृथगाकृतिसन्नीयते तत् सीमन्तोन्नयनम्। सीमन्त उन्नीयते यस्मिन् कर्मणि तत् सीमन्तोन्नयमिति कर्मनामधेयम्।[6] सीमन्तोन्नयनं गर्भाधानात् चतुर्थे मासे संपाद्यते, यदा शुक्लपक्षे पुंसानक्षत्रेण चन्द्रमायुक्तो भवति। **प्रथमगर्भायाश्चतुर्थे मासि सीमन्तोन्नयनम्।**[7] सीमन्तोन्नयनसंस्कारः प्रायो गर्भाधानस्य षष्ठे, अष्टमे वा मासे क्रियते। षष्ठेऽष्टमे वा सीमान्तः।[8] संस्कारस्यास्य प्रमुखोद्देश्य गर्भस्त्रावो न भवेद् इत्यपि अस्ति।

**पत्न्याः प्रथमजं गर्भमत्तुकामाः सुदुर्भगाः।**
**आयान्ति काश्चिद्राक्षस्यो रुधिराशनतत्पराः।**
**तासां निरसनार्थाय श्रियमावाहयेत् पतिः।**
**सीमन्तकरणी लक्ष्मीस्तामावहति मन्त्रतः।।**[9]

अस्मिन्नवसरे पतिः पत्न्याः केशपाशमलङ्कुर्वन् तस्मिन् सीमान्त रचयति।

**4. जातकर्म**-पुत्रे जाते सति जातस्य यत् कर्म तज्जातकर्म उच्यते। येन कर्मणा जातकस्य शिशोः गर्भवासजनितसकलदोषो निवर्तते, आयुर्मेधा च वर्द्धते तदेव जातकर्माख्यः। जाते पुत्रे पिता स्नात्वा रात्रौ संध्ययोर्ग्रहणे वा वृद्धिश्राद्धं हिरण्येण कृत्वा जातकर्मदानादि दुरितक्षयाय प्रजापतिप्रीत्यै च कुर्यात्।

**प्राङ् नाभिवर्धनात् पुंसो जातकर्म विधीयते।**
**मन्त्रतः प्राशनञ्चास्य हिरण्यमधुसर्पिषाम्।।**[10]

'जाताशौचान्तर्मध्ये च जाते जातकर्मादि कुर्यात्। मृताशौचमध्ये जाते तु तदाऽशौचान्ते वा कुर्यात्।

**मृताशौचस्य मध्ये तु पुत्रजन्म यदा भवेत्।**
**आशौचापगमे कार्यं जातकर्म यथाविधि।।**[11]

प्रथमं तावत् वैश्वानरस्य परितुष्टिः सम्पाद्यते। वैश्वानरस्य परितोषेण जातस्य शिशोकालान्ते तेजस्वितायाः समृद्धेः शक्तेश्च संभावना अभिमता। नाभिवर्धनात्प्रागेव पंचभिर्ब्राह्मणैः शिशोरनुप्राणनमस्क्रियते। अनेन विधानेन तस्य पूर्णजीवनस्याभ्युदस्य चाशा संभाविता। पुत्रजन्मोत्सवे पिता प्रायशो दानमकरोत्।

**5. नामकरणम्**-नाम्न: करणं नामकरणम्। इहलौकिकसमस्त-कार्यसम्पादनार्थं नामकरणम्। नामकरणं जातकर्मानन्तरं वा द्वादशेऽह्नि वाऽन्यस्मिंशुभेऽह्नि वा कुर्यात्।

**नामाखिलस्य व्यवहारहेतुः शुभावहं कर्मसु भाग्यहेतुः।**
**नाम्नैव कीर्तिं लभते मनुष्यस्ततः प्रशस्तं खलु नामकर्म।।**[12]

नामकरणसंस्कारे नाम्नोऽतिमहत्त्वमिति विहितं सर्वेषाम्। जन्मनो एकादशे दिने पुण्ये मुहूर्ते नक्षत्रे वा सर्वजनप्रकाशनीयं नाम क्रियते। **अहन्येकादशेनाम**[13] नाम्नो मधुरध्वनिः स्पृहणीय एव। चतुक्षरं द्वयक्षरं वा घोषवदाद्यन्तस्थं पुंसाम् ईकारान्तसुखाक्षरं च स्त्रीणामेव कृते सति तत्कुलं कीर्तिसमन्वितं जायते। स्त्रीणां नामान्यधिकृत्य मनुना निर्दिष्टम्-

**स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम्।**
**मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्।**[14]

**6. निष्क्रमणम्**-निष्क्रमणं नाम शिशोर्गृहात् प्रथमं बहिर्गमनम्। निष्क्रमणं चन्द्रदर्शनं सूर्यदर्शनं देवनमस्कारं वा द्वादशेऽह्नि तृतीये चतुर्थे मासे वा कुर्यात्।

**ततस्तृतीये कर्त्तव्यं मासि सूर्यस्य दर्शनम्।**
**चतुर्थमासि कर्त्तव्यं शिशोश्चन्द्रस्य दर्शनम्।।**[15]

जन्मश्चतुर्थमासे शिशोर्गृहान्निष्क्रमणं भवति। निष्क्रमणदिवसे सूर्यस्य दर्शनं प्रथमं समासाधितम् सूर्यस्तु भारतीयचिन्तनदृष्ट्या ज्ञानविज्ञानयोः परमं निधानमेव। रात्रौ निष्क्रमणविधौ चन्द्रदर्शनं कारयति। पिता एतेषां दिव्यविभूतीनां दर्शनस्य शिशोः संवर्धने हितकरः प्रभावो भवति।

**7. अन्नप्राशनम्**-शिशोः षष्ठमासेऽन्नप्राशनं कर्तव्यम्। आयुर्वेदानुसारं लघुहितमन्नं शिशवे दातव्यम्। अन्नस्य न केवलं जीवनधारणायैव महत्त्वमपितु व्यक्तित्वस्य विकासायान्नस्योपयोगिताभिमता। अन्नप्राशनं षष्ठेऽष्टमे वा दन्ते जाते कार्यम्। तद्यथा- **''आहारशुद्धौ सत्त्वशुद्धिः ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रंथीनां विप्रमोक्षः'**[16]

**षण्मासञ्चैनमन्नं प्राशयेल्लघु-हितञ्च।**[17]
**षष्ठे अन्नप्राशनं जातेषु दन्तेषु वा।**[18]

अस्यां दशायां स्पष्ट एव प्रतिभाति यत् शिशवे प्रदत्तं प्रथमं भोजनं व्यक्तित्वस्य विकासमुद्दिश्यैव निर्णीतं भवति। सामान्यतोऽन्नप्राशनाय दधिमधुघृतमिश्रं भक्तमेव दीयते स्म। केचिद्धर्मशास्त्रकाराः समांसं भोजनमन्नप्राशनाय निर्दिशन्ति। कालान्तेऽन्नप्राशनावसरे शिशोर्भाविजीवनस्य जीविकोपायस्य निर्णयः क्रियते स्म। देवानां सान्निध्ये बहूनां व्यवसायानां प्रतीकाः समुपस्थापिताः। तेषु यानि कानिचित् शिशुरचिनोत् तैरेव शिशोर्जीविका सम्भाव्यते।

**8. चूडाकर्म**-चूडानां केशपाशानां करणं संस्कारो येन कर्मणा तच्चूडाकरणमिति। चौलं प्रथमे वर्षे तृतीये वा कार्यं बहुमतत्वाद्यथाकुलधर्मं वा। एते संस्काराः बीजगर्भस्य दुरितक्षयाय यथास्वाचारं कार्याः।

**तृतीये पंचमे वाऽब्दे चौलकर्म प्रशस्यते।**
**प्राग्वाऽसमे सप्तमे वा सहोपनयनेन वा।।**[19]
**तृतीये वर्षे चौले तु सर्वकामार्थसाधनम्।**
**संवत्सरे तु चौलेन आयुष्यं ब्रह्मवर्चसम्।।**
**पञ्चमे पशुकामस्य युग्मे वर्षे तु गर्हितम्।।**[20]
**गर्भिण्यां मातरि शिशोः क्षौरकर्म न कारयेत्।**[21]

चूड़ाकरणात्प्रभृति शिखाग्रहणं भवति आयुर्वेदानुसारं शिखाया महत्वम् अस्ति। तथा हि-**''शिरसः शिखरे शिरा-संधीनां सम्मेलनं भवति। अस्य स्थानस्य अधिपति रोमावर्तः। तत्र केनापि प्रहारेण शीघ्रमेव मृत्युर्भवति''**[23] अस्य कोमलस्थानस्य रक्षा शिखया भवति। एतस्याः संबंधः मस्तिष्के विद्यमानज्ञानेन सहापि वर्तते।

**9. कर्णवेध**-लौहशलाकया द्वयोः कर्णयोः चिन्हं क्रियते। अमुना कल्याणं भवति सन्ततीनाम्।

**रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येत्।**[24]
**शातकुम्भमयी सूची वेधने शोभनप्रदा।**
**राजती वाऽयसी वाऽपि यथा विभवतः शुभा।।**[25]

संस्कारोऽयं यावद्व्यवहारिकोऽस्ति तावदेव दार्शनिको वैज्ञानिकश्चापि वर्तते। चिकित्साविज्ञानदृष्ट्यापि कर्णवेधसंस्कारस्य महद्वैशिष्ट्यं वर्तते। ''हाइड्रोसील'' इति नामकाद्रोगाद् मुक्तिरपि अनेन संस्कारेण संभवोस्ति।

**शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम्।**
**व्यत्यासाद्वा शिरां विध्येदन्त्रवृद्धिनिवृत्तये।**[26]

**10. उपनयनम्**-उपनयनं नाम आचार्यसमीपनयनाङ्गको गायत्र्युपदेशप्रधानकः कर्मविशेषः। उपनयनं गर्भप्रभृति जन्मप्रभृति वाऽष्टमेऽब्दे एकादशे द्वाद्शे विप्रादीनां क्रमात्कार्यम्। आषोडशाद्द्वाविंशादाचतुर्बिंशाद्विप्रादीनां क्रमात्कार्यम्। अत ऊर्ध्वं सावित्रीपतिता व्रात्याः स्युः।

**गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम्।**
**राज्ञामेकादशे सैके विशामेके यथाकुलम्।**[27]

काम्ये विशेष-

**ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।**
**राज्ञो बलार्थिनः षष्ठे वैश्यस्याप्यर्थिनोऽष्टमे।।**[28]

यावत् बालकस्य उपनयनसंस्कारो न भवति तावत् से वेदाध्ययनार्हः न भवति। अपि च उपनयनसंस्कारविहीनो बालकः नित्यनैमित्तिकर्माणि कर्तुम् अधिकारः न भवति।

**11. वेदारम्भ**-वेदस्यारम्भः वेदारम्भः। वेदारम्भसंस्कार-स्योल्लेखः केवलं व्यासस्मृतौ वेदारम्भक्रियाविधौ द्वितीयचरणे प्राप्यते। गृह्यसूत्रे स्मृतिग्रन्थे च अस्य प्रत्यक्षतया नामोल्लेखः न प्राप्यते। तथापि संस्कारस्य स्पष्टसंकेतः सर्वत्र प्राप्यते। संस्कारेऽस्मिन् बालकः ज्ञानसागरान् वेदान् गुरुकुले नियमानुसारं पठितुमारभते।

**12. केशान्तः**-संस्कारोऽयं शीरीरेण व्यवहारेण च सम्बद्धोऽस्ति। शिष्यः युवावस्थायां समागतः तस्य सूचकोऽयं संस्कारः। संस्कारोऽयं स्नातकशिक्षां समाप्य विधीयते। यतो हि अध्ययनकाले ब्रह्मचर्याश्रमस्य पालन कुर्वता विद्यार्थिना केशादिवपनं न क्रियते। अत्र शिष्यस्य क्षौरकर्म क्रियते। तदनन्तरं गोदानं भवति। केशान्तसंस्कार एव गोदानसंस्कार इति नाम्ना ज्ञायते।

**13. समावर्तनम्**-'सम + आ' उपसर्गपूर्वकात् 'वृतु' धातोः ल्युट् प्रत्यये कृते सति 'समावर्तन' शब्दः निष्पद्यते। यस्यार्थः भवति वेदाध्ययनानन्तरं गुरुकुलात् स्वगृहागमनम्।

**तत्र समावर्तन नाम वेदाध्यनानन्तरं गुरुकुलात् स्वगृहागमनम्।**[29]
**विद्यान्ते गुरुमर्थेन निमन्त्र्य कृतानुज्ञानस्य वा स्नानमिति।**[30]

भारतीयसंस्कृतौ मनुष्यस्य चतसृणाम् अवस्थानां कृते चतुर्णाम् आश्रमाणां परिकल्पना कृता अस्ति। आचार्याश्रमेऽध्ययनं परिसमाप्य प्रायशो विद्यार्थिनः स्वगृहं गच्छन्ति। आश्रमाद् गृहागमनं हि समावर्तनम्। अस्मिन्नसवरे समावर्तनसंस्कारः सम्पाद्यते। समावर्तनसंस्कारे विद्यासंपन्नस्य ब्रह्मचारिणो यथाविधिः स्नानं भवति। इदं परिलक्ष्यं समावर्तनस्यापरं नाम स्नानमस्ति। समावर्तनसंबंधिस्नानमिदं कृत्वा एव छात्रः स्नातको भवति।

**त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्या-व्रतस्नातक इति।**[31]

ब्रह्मचर्यकाले विद्यार्थी सर्वथा भोगविलासादिभ्यो विरक्तो भवति स्म। समावर्तनकाले स शरीरस्य प्रसाधनं करोति। स्नातकस्य केशविन्यासः गृहस्थानामिव भवति।

**14. विवाहः**-'वि' उपसर्गात् 'वह्' धातोः घञ् प्रत्यये कृते विवाहशब्दः सिद्ध्यति। वहनं वाहः, विशिष्टो वाहो विवाह इति। विवाहशब्दो योगरूढत्वेन साम्प्रतं दारपरिग्रहार्थ एव प्रयुज्यते। विवाह अष्टधा-1. ब्राह्मः, 2. दैवः, 3. आर्षः, 4. प्राजापत्यः, 5. आसुरः, 6. गान्धर्वः, 7. राक्षसः, 8. पैशाचः।

**ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः।**
**गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः।।**[32]

विवाहसंस्कारः षोडशविधसंस्कारेष्वन्यतमः संस्कारो वर्तते। समाजे विवाहसंस्साकरस्य सर्वाधिकं महत्त्वम् वर्तते। अपि च सर्वेषु संस्कारेषु विवाहसंस्कारः प्रधानः इति सर्वैरङ्गीक्रियते। विवाहस्तु सन्तनकामाय प्रकृतिसुखाय धर्मसंपादनाय च भवति। अधिकांशगृह्यसूत्राणामारंभः विवाहसंस्कारदेव भवति, यतो हि संस्कारोऽयं समस्तगृह्ययज्ञानां अन्यसंस्काराणां वा केन्द्रमस्ति।

**15. अग्न्याधानम्**-विवाहसंसेकारे लाजाहोमादिक्रियासु यस्मिन् अग्नौ होमाहुतिः सम्पाद्यते तस्य नाम आवसथ्यः अग्निरिति। अस्यैव नाम विवाहाग्निरपि। अस्याग्नेः आहरणं परिसमूहनम्, स्थापनम् इत्यादिक्रियाः संस्कारेऽस्मिन् सम्पाद्यन्ते।

**16. अन्त्येष्टिः**-अन्तिमोऽयं संस्कारः। मनुष्यस्य मृत्योः पश्चात् संस्कारोऽय भवति। अन्त्येष्टिसंस्कारः धर्म-सम्प्रदायानुसारेण भवति। अयञ्च संस्कारः मानवमात्रस्य कृते ध्रुवः संस्कारो भवति। अत्र च ज्योतिषशास्त्रानुसारं संस्कारस्यास्य किमपि मूहुर्तं न भवति। मृत्योरनन्तरं मनुष्यस्य तत्सम्बधिनः जनाः परलोके तत्कल्याणं सुखं वा स्यादितिधिया तस्य अन्तिमसंस्कारं कुर्वन्ति मरणानन्तरमपि संस्कारस्यास्य महत्वमस्ति।

**संस्काराणां महत्त्वम्**-जीवनस्य सार्थकता न केवलं बाह्यसौन्दर्यपर्यन्तमेव सीमितास्ति, अपि तु सा आभ्यन्तरतत्त्वरूपेण मानसतले स्थित्वा संपूर्णजीवनम् अभिलक्ष्य संस्काररूपं गृह्णाति। भारतीसंस्कृतौ संस्काराणां सुमहत्त्वं वैदिकालाद् आरभ्य इदानीं यावत् दृष्टिगोचरं भवति। गर्भाधानात् प्रभृति मरणपर्यन्तं मनुष्यस्य संस्कारविधिना शीररस्य मनसश्च शुद्धिर्जायते। अपि च तस्य भाविजीवनस्योत्त्थानमयी परम्पराविष्क्रियते। व्यक्तित्वस्य विकासाय तत्सम्बन्धितत्त्वानुशीलनम्, उपदेशश्रवणम्, गुरुजनानां वैदिकमंत्रैः शुभाशंसा चावश्मेव प्रभावोत्पादकानि, इति भारतीयानां धारणा। संस्कारणामनेकेषाम् अङ्गानां मूलेऽयमैव विश्वासः दृष्टिगोचरो भवति।

## पादटिप्पणी

1. व्याससमृतिः १.१३-१५ 2. पूर्वमीमांसा १.४.२
3. शौनकः, वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या १४१
4. शौनकः, वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या १६७
5. अथर्ववेदः ३.२३.२
6. वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या १७२
7. बौधायनगृह्यसूत्रम् १.१०.१, आपस्तम्बगृह्यसूत्रम् १४.१
8. याज्ञवल्क्यस्मृतिः १.११
9. आश्वलायनाचार्यः, वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या १७२-७३
10. वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या १८७
11. जातुकण्यः, वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या २०१
12. बृहस्पतिः, वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या २४१
13. याज्ञवल्क्यस्मृतिः १.१२
14. मनुस्मृतिः २.३३
15. यमः, वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या २५०
16. छान्दोग्योपनिषद् ७.२६.२
17. सुश्रुतः, शरीरस्थानम् १०.६४
18. वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या २६७, याज्ञवल्क्यस्मृतिः १.१२
19. आश्वलायनः, वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या २९७
20. अत्रिः, वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या २९८
21. बृहस्पतिः, वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या ३१२
22. आश्वलायनगृह्यसूत्रम् १.१७
23. सुश्रुतः, शरीरस्थानम् ६.७३
24. सुश्रुतः, शरीरस्थानम् १६.१
25. बृहस्पतिः, वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या २६२
26. सुश्रुतः, चिकित्सास्थानम् १९.२१
27. याज्ञवल्क्यस्मृतिः १.१४ 28. मनुस्मृतिः २.३७
29. वीरमित्रोदयः, संस्कारप्रकाशः, पृष्ठसंख्या ५७२
30. आश्वलायनगृह्यसूत्रम् ३.८, गौतमधर्मसूत्रम् १.२.५४-५५
31. पारस्करगृह्यसूत्रम् २.५.३३

*अंशकालिकसहायकाचार्यः, धर्मशास्त्रविभागः*
*ब्रजभूषणसंस्कृतमहाविद्यालयः, खरखुरा, गया, बिहार*

ISSN 2456-3420

# हिमाचलस्थाविविधाः साञ्चाग्रन्थानां लिपयः

नरेश शर्मा

हिमाचलस्था सिरमौरशिमलासोलनजनपदेषु तथा च उत्तराखण्डस्थजौनसारबाबरादिषु जनपदीयग्रामेषु असंख्या साँचाग्रन्थ-पाण्डुलिपयः उपलब्धाः वर्तन्ते। इमे साञ्चाग्रन्थाः पाबुची, भटाक्षरी, पाण्डवाणी, चन्दाणी आदि लिपिषु निबद्धाः विद्यन्ते। आसु लिपिषु प्रकाशनात् पूर्वत्र एतेषु साञ्चेषु निबद्धविषयवस्तुनः रेखाङ्कनम् अपेक्ष्यते। वस्तुतः वैदिकवाङ्मयस्य विषयवस्तु एव सुत्ररूपेषु एतेषु साँचा ग्रन्थेषु विद्यमाना वर्तन्ते।



वेदब्राह्मणग्रन्थारण्यकोपनिषद्वेदाङ्गाश्च वैदिकवाङ्मयस्य आधारभूताः प्रकारस्तम्भाः वर्तन्ते। सम्पूर्ण वैदिक ज्ञानम् अथवा वैदिक मन्त्रेषु निहितम् ज्ञानम् परवर्ति स्मृतिग्रन्थेषु तत्र यथा रामायणम् माहाभारतम्-दर्शन ग्रन्थेषु अन्यञ्च पुराणेष्वपि निबद्धं वर्तते। एतत् एव ज्ञानम् आदिकालात् समाजस्य जीवनदर्शनस्य निर्माणं कुरुते। ज्ञानस्य ये आधारभूतग्रन्थाः प्राप्य विद्यारूपेषु विश्वसमुदायस्य समक्षं विद्यन्ते। वैदिक ज्ञानम् अथवा मन्त्राः त्रिषु विभागेषु विभाजिता वर्तन्ते। ऐभ्यः वयं त्रिकाण्डनाम्ना जानीमः, एतानि त्रिकाण्डानि क्रमशः ज्ञानकाण्डम्, कर्मकाण्डम्, उपासनाकाण्डम्, इत्यादिरुपेषु प्रसिद्धानि वर्तन्ते। प्रथमं ज्ञानकाण्डे सृष्टिः स्थितिः लयश्च इत्यस्य दार्शनिक सिद्धान्तेन निबद्धाः वर्तन्ते। वेदाङ्गज्योतिषम् त्रिकालज्ञानस्य कालगणनायाः सिद्धान्तानुरूपं विवरणं करोति। कर्मकाण्डे आदिदैविक-आदिभौतिक-अध्यात्मिकञ्च एतेभ्यः त्रितापेभ्यः उपजदुःखानां निवारणाय सिद्धान्ताः निहिताः वर्तन्ते। षोडशसंस्काराणाम् कर्माणि एतस्य प्रबल प्रमाणानि वर्तन्ते। उपासना काण्डे जीवनदर्शनस्य दार्शनिक सूत्रैः सह तन्त्रमन्त्रयन्त्राणां सिद्धान्ता अपि निबद्धाः वर्त्तन्ते।

भारतस्य ऐतेषु महत्सु ग्रन्थेषु निहित ज्ञानम् प्रतिग्रामं विद्याविद् विद्वद्भिः कालक्रमेण लिपिबद्धाः कर्तुं प्रयासो विहितो वर्तते। यः पाण्डुलिपिरूपेण सर्वत्रापि दरीदृश्यते। अस्मिन्नैवक्रमे हिमाचलस्य सिरमौरः, शिमला, सोलन, जनपदे एवं च उत्तराखण्डस्य जौनसार-बावर जनपदेषु कतिपयग्रामेषु ज्ञानकाण्डम्, उपासनाकाण्ड, एवं च अन्यग्रन्थानां पाण्डुलिपय उपलब्धाः वर्तन्ते। याः लिपयाः साञ्चा ग्रन्थरूपेण प्रसिद्धाः वर्तन्ते। एतासु साञ्चा पाण्डुलिपिषु वैदिक ज्ञानम् अथवा मन्त्राः ये त्रिकाण्ड रूपेण विभाजिता वर्तन्ते। तथा एतेषां त्रितापाणां निवारणाय सिद्धान्तानां प्रयोगः कृतः वर्तते। एतेषु साञ्चा गन्थेषु मुख्यतः सूत्राणि निबद्धानि वर्तन्ते। एताः पाण्डुलिपयः शारदालिप्याः उद्धूताः पाबूची, भट्टाक्षरी, पण्डवाणी तथा चन्दाणी एतासु चतुर्षु लिपिषु निबद्धाः सन्ति। वर्तमाने कतिपय साञ्चा देवनागरी लिप्याम् अपि परिवर्तिताः दृश्यन्ते।

पाबूची, भट्टाक्षरी, पाण्डवाणी, चन्दाणी, लिपयः एतेषु क्षेत्रेषु कथमागता एतदपि कश्चन रोचक विषयो वर्तते। हिमाचलस्य सिरमौरः, शिमला, सोलन, जनपदानां ग्रामेषु पाबूच, पाण्डेयः, भाट, चन्दाण ऐतेषां वंशजा कालक्रमेण स्थापिता अभवन्। राजतन्त्रात्मक शासन व्यवस्थायाम् राजाभिः एतेभ्यः विद्वान्ब्राह्मणेभ्यः संरक्षणं प्रदत्तं येन विद्यासु निहित ज्ञानं प्रतिजनं प्राप्येत। कालक्रमेण एतेषु वंशेषु प्राच्यविद्यायाः ज्ञानं साञ्चेषु लिपिबद्धेन आक्रियतः एतान् वंशान् ब्राह्मण गुरुकुल पद्धति द्वारा अर्जयितुं काश्मीरम् अथवा वाराणसीं गमयते स्म। काश्मीरदेशः प्राचीनकालादेव प्राच्यविद्यायाः महान् केन्द्रमासीत्। काश्मीरदेशे नवमी, दशमी, शताब्द्यां शारदा लिपेः प्रचलनम् प्रारब्द्धम् आसीत्।

पाबूच, भाटोः, पाण्डेयः अपि च चन्दाणां वंशजैः वेदमन्त्राणां ज्ञानं शारदामिश्रितवाणिषु निबद्धं कृतम्। लिपिबद्धं कृत्वा-कृत्वा कालक्रमेण वाणीषु, अक्षरेषु च परिवर्तनम् स्वभाविकम् आसीत्। परवर्ती कालेन शारदायाः स्फुटित वर्णाक्षराणि मात्राः अङ्का वाक्यानि च एतेषां वंशजानां गुरुकुलेषु परिवर्त्य समक्षं आगच्छत्। एतदैव परिवर्तनम् पाबूची, भट्टाक्षरी, पाडवाणी, चन्दाणी, लिपिषु समागतम्।

एतासु चतुर्षु लिपिषु वंशजानां स्थापनाया दिग्दर्शनम् अपि प्रासंगिकम् अस्ति। पाबुचानां वंशावली द्वारा ज्ञायते यत् एतस्य वंशस्य पूर्वजा पूर्वं काश्मीरस्य निवासिन आसन्। काश्मीरम् ब्रह्मविद्यायाः केन्द्रम् आसीत्। तस्मात् विद्या ग्रहित्वा एतेषां वंशजः जैसलमैर राजस्थाने आगत्य निवसन्तः आसन्। राजा सिरमौरस्य विशेषाग्रहे पाबूच बाह्मणः सिरमौरं आगत्य बडवाला नामक स्थाने वसन्तासन्। तस्मात् पाबूचानां वंशजः सतौन इत्यस्य निकटे चान्दनी नामक स्थाने निवसन्तः स्मः।

ISSN 2456-3420

चान्दन्या: एकस्य घटनाया: कारणात् पाबूच वंशजानां निष्कासनम् अभूत् अपि च ये कुमारसेनस्य पाबूची इति ग्रामे गत्वा अवसन्। तत: पाबूचानां वंशजा चौपाल–कुपवी इत्यस्य नगरस्य निकटे धारचाँन्दना नामक ग्रामे गत्वा अपि च महासुदेवस्य आराधका: अभवन्। धारचाँन्दनात् पाबूचानां एका शाखा सिरमौर जनपदस्य बगनौल नामक ग्रामे तथा च एका शाखा खडकांह: नामक ग्रामे अवसन्। भाटानां वंशजा चौपाल मण्डलस्य खद्दर, भजरोठ, जगरा, हियूण, विजौल, सरांह तथा सिरमौर जनपदस्य क्याणा, कुसैणु, धीरग, सिद्धोटी, घाटी, किणु, आदि ग्रामेषु तथा च रोहडू मण्डलस्य नंडला, मसली, दोगली, पावडीचियुणी, पारसा, ग्याचट्टा, भमनोली इत्यादिषु स्थापिता विद्यन्ते। चन्दाणी नामक लिपे: भट्टाक्षरी इत्यस्मादैव निष्कासिता एका शाखा वर्तते। चन्द्राण नामक ब्राह्मणा: शिमला जनपदस्य चौपाल मण्डलस्य भाटेऊडी नामक ग्रामे निवसन्त सन्ति चन्दाणाऽपि मूलत: भाट ब्राह्मणैव वर्तन्ते। चन्द्राण ब्राह्मणानां ज्योतिषीय गणितम् चन्द्रमानस्य आधारोपरि प्रचलितम् आसीत्। एतस्मादैव कारणात् एष: ब्राह्मण: चन्द्राण इति कथ्यन्ते तथा च एतेषां लिपि चन्दाणी इति प्रसिद्धा अभवत्। ऐतेषां पूर्वजाणामपि विद्या काश्मीरादेव स्वीकृता। पण्डवाणीलिपे विद्वान् ब्राह्मणा: उपमण्डलठियोगे जनपदशिमलाया: बलगक्षेत्रे तथा च उपमण्डल चौपालस्य ग्राममणेयोर्व्यां स्थापिता: विद्यन्ते। एतेषां पार्श्वे पाबूची, भट्टाक्षरी, पण्डवाणी, चन्दाणी च लिपिनां साञ्चाग्रन्था: एवञ्च लिपिविज्ञानम् अद्यापि सुरक्षितं विद्यते। एतेषां केचन वंशजा: ठियोगमण्डले शिमला जनपदानां तथा च उत्तराखण्डस्य कतिपय ग्रामेषु अपि उषितवन्त: सन्ति। एतेषां ब्राह्मणानां ब्रह्मविद्यापरक स्थापना: एतेषु क्षेत्रेषु स्थिता: वर्तन्ते।



पाबूची, भट्टाक्षरी, पण्डवाणी, चन्दवाणी च लिपिनां वर्णानाम्, अक्षराणां मात्राणाम् अङ्कानां वाक्यानाञ्च विश्लेषणेन सिद्धं भवति यत् एता: लिपय: शारदालिपेरुद्धृता: सन्ति। एतेषां वंशजानां गुरुकुलेषु शारदाया: स्वरूपमिदं चतसृणां लिपीनां उद्भावने सहायकमस्ति साम्प्रतम् एतेषां लिपीनां भाषा अपि च भाषायां निबद्ध: विषयवस्तुन: उपरि विचार: अपेक्षितोऽस्ति। साञ्चा शब्दस्य व्युत्पत्या एतेषां पाण्डुलिपीनां भाषायां उपरि स्वत: एव प्रकाश: जायते। साञ्चा अर्थात् सञ्चय संग्रोहो वा। पाबूची, भट्टाक्षरी, चन्दाणी,चेति एतेषां लिपीनां निबद्धसाञ्चासु वेदोपनिषदायुर्वेदज्योतिषरामायणमहाभारतखगोलविज्ञानपुराणानां महत्वपूर्णज्ञानस्य पक्ष: सूत्ररूपेण निबद्धो वर्तते। एतेषां ग्रन्थानां विषयवस्तु संस्कृतभाषायां विद्यमानो अस्ति। मध्यकालीन युगे यदा संस्कृतभाषावाङ्ग्मये वैदेशिकानां प्रहारा: सञ्जाता तदा एतेषु गुरुकुलेषु लिपीनां प्राच्य विद्याया: अस्य महाज्ञानस्य संञ्चयं कृत्वा संस्कृत मिश्रित स्थानीयोपभाषायाम् अपि च प्राकृतभाषायां निबद्धं कृतम्। साञ्चा पाण्डुलिपे: एकं उदाहरणम्। पाबूची साञ्चायां एकस्मिन् स्थाने उल्लेख: समायाति ''प्रदं प्रदं तु चेव अक्षाणि पतिता तवम्॥ पुत्र–जन्म–धन लाभ॥ इष्ट सुखागम॥ सर्वसुखं इञ्च कल्याणम्॥ जते मनसे वर्तते॥ उदाहरणेऽस्मिन् संस्कृतभाषाया वाक्यानि सन्ति परन्तु मध्ये–मध्ये स्थानीयभाषानां शाब्दा अपि निबद्धा: सन्ति। एतेषां समेषामपि साञ्चा ग्रन्थानां भाषा मूलत: संस्कृतमेव परन्तु कालक्रमेण अस्यां भाषायां परिवर्तनं प्राकृतभाषायां अथवा स्थानीय उपभाषायाम् अजायत।

## सन्दर्भग्रन्थ:


1. स्व. मनीयाराम पाबुच का मूल साञ्चाग्रन्थ ग्राम बगनौल त. शिलाई जिला सिरमौर हि. प्र.
2. देवीराम पाण्डे का मुल साञ्चाग्रन्थ ग्राम मण्योटी त. चौपाल जि. शिमला हि. प्र.
3. स्व लछीराम का मूल साञ्चाग्रन्थ ग्रा. भटेयोडी त. चौपाल जि. शिमला हि. प्र.
4. श्री केदार दत्त पाबुच का पाबूची ज्योतिष चन्द्रिका ग्रा. बगनौल त. शिलाई जि. सिरमौर हि. प्र.



*शोधच्छात्र:*

*केन्द्रियसंस्कृतविश्वविद्यालय:, वेदव्यासपरिसर:, हिमाचलप्रदेश:*

ISSN 2456-3420

# हिमाचले ज्योतिषशास्त्राध्ययने देवमन्दिराणां भूमिकायाः समीक्षात्मकमध्ययनम्

तिलक राज

देवमन्दिराणि भारतीयसंस्कृतेः मूलाधाराः मन्यन्ते। देवमन्दिरैस्सह जनसमुदायस्य आत्मीयसम्बद्धो भवति। यतोहि देवालयाः मानवस्य कृते प्रज्ञायाः ज्ञानविज्ञानस्य च स्त्रोतस्स्थलानि भवन्ति। भारतीयसंस्कृतौ प्राचीनकालादेव जगन्नियामकानां शक्तीनां ज्ञानं पर्याप्तमासीत्। अतः जनाः जगत्सञ्चालकम् ईश्वरं तथा तस्य अङ्गोपाङ्गभूतानां देवानां विशिष्टं गुणं स्वरूपं च विश्लेषय, तेषां साकारोपासनां प्रवृता अभवन्। अतः देवप्रतिमानां निर्माणस्य विधानं विहितं शास्त्रकारैः। तासां देवप्रतिमानां स्थापनार्थं निवासार्थञ्च देवप्रासादानां निर्माणं सञ्जातम्। देवालयाः मन्दिराणि वा न केवलं देवानां वासस्थानम् अपितु देवप्रासादस्य सम्पूर्णं विग्रहमेव देवतुल्यम्मन्यते। यथोक्तमपि विश्वकर्मा प्रणीते क्षीरार्णवे नाम्नि वास्तुविषयके ग्रन्थे–

**प्रासादो देवरूपः स्यात् पादौ पादशिलास्तथा।**
**गर्भश्चैवोदरं ज्ञेयं जङ्घा पादोर्ध्वम् उच्यते।।**
**स्तम्भाश्च जानवो ज्ञेया घण्टा जिह्वा प्रकीर्तिता।**
**दीपः प्राणः रूपो ज्ञेया ह्यपाने जलनिर्गतः।।**
**ब्रह्मस्थानं यदैतच्च तन्नाभिः परिकीर्तिता।**
**हृदयं पीठिका ज्ञेया प्रतिमा पुरुषः स्मृतः।।**
**पादजास्त्वहङ्कारो ज्योतिस्तच्चक्षुरुच्यते।**
**तदूर्ध्वं प्रकृतिस्तस्य प्रतिमात्मा स्मृतौ बुधैः।।** इति।।

देवालयानां निर्माणं प्राचीनकालादेव पुरुषार्थचतुष्टयदायकं शास्त्रकारैरङ्गीक्रियते। जनानां विश्वासोऽस्ति यत् यन्मन्दिरनिर्माणेन पुण्यलाभो भवति। अतः देवप्रासादकार्यं यज्ञकार्यमिव एकं धार्मिककार्यं भवति। यादृशस्य फलस्याप्तिः यज्ञयागादिरेव तादृशं फलं देवप्रासादनिर्माणेनापि भवतीति संहिताकारस्य आचार्यवराहमिहिरस्य वचनम्।

**इष्टापूर्तेन लभ्यन्ते ये लोकास्तान् बुभूषता।**
**देवानामालयः कार्यो द्वयमप्यत्र दृश्यते।।**

अतः देवप्रासादनिर्माणस्य नियमाः फलानि च पुराणशास्त्रादिषु बहुत्रोपलभ्यन्ते एव। देवालयस्थापत्यकलायाः विकासः धार्मिकचेतनया आध्यात्मिकतया च सञ्जातम्। मन्दिरेषु सांस्कृतिकानि सामाजिकानि लोकोपकारककार्यानि सम्पद्यन्ते। मन्दिरपरिसरेषु धार्मिक-सामाजिकविषयानां विवेचनं शास्त्रार्थं वा क्रियते स्म। अस्य कार्यक्रमस्य सञ्चालनाय विदुषां परिषद् भवति स्म। पुनः धार्मिककथानां श्रवणाय स्थलमिदमत्यन्तमुचितं भवति, अतः कथा स्थलत्वेनापि प्रयुज्यते स्म। ज्ञानविज्ञानप्राप्त्यर्थमपि देवप्रासादस्थलमेव समुचितं मन्यते। अतः प्राचीनकाले बहुत्र शिक्षणकार्यं मन्दिरेष्वेव प्राचलत्। वर्तमानेऽपि पारम्परिकं ज्ञानं मन्दिरादीनां सहाय्येनैव प्रचलति। यतोहि देवालयादीनां पुण्यक्षेत्रेषु पठनपाठनस्य उत्तमं वातावरणमुपलभ्यते। जनानां नैकासां समस्यानां समाधानार्थम् अलौकिकोपायेन परिहारार्थं मन्दिरमेव समुचितं स्थलं विद्यते।

देवालयानां नैकानि प्रकाराणि विद्यन्ते तथा तेषां निर्माणस्य क्षेत्रविशेषवशात् परम्परावशात् सम्प्रदायवशाच्च कुत्रचित् विशिष्टाः नियमा अपि प्राप्यन्ते। परञ्चात्र मन्दिरनिर्माणस्य वास्तोः सामान्यनियमाः समवलोक्यन्ते।

सर्वप्रथमतया देवालयनिर्माणार्थं भूखण्डस्य चयनमपेक्षितं भवति। तत्रोचितस्य भूखण्डस्य चयनं मृत्तिकापरीक्षणाधारेण, दिगाधारेण च सम्भवति। देवालयनिर्माणार्थं सलिलोद्यानयुक्ता भूमिः प्रशस्ता मन्यते। यथोक्तमपि आचार्यवराहेण–

**वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु।**
**रमन्ते देवता नित्यंपुरेषूद्यानवस्तु च।।**

अर्थात् देवाः सरोवरनिर्झरोपवनपर्वतादीनां निकटे वसन्ति। अतः नैकेषु क्षेत्रेषु सरोवरपर्वतादयः देवस्थलत्वेन प्रसिद्धास्सन्ति। मन्दिरनिर्माणात् प्राक् विविधशास्त्रीयविधिभिः भूखण्डस्य परीक्षणं विधीयते। परीक्षणानन्तरं तस्मिन् भूखण्डे चतुष्षष्टिपदवास्तोरथवा शतपदवास्तोः विन्यासः क्रियते। चतुरस्त्रे भूखण्डे षोडशभागे कृते सति, तन्मध्यस्थेषु चतुर्षु भागेषु गर्भस्थानं शेषभागेषु च भित्तिः निर्मीयते। तस्याः भित्तेर्द्विगुणस्य शिखरस्य विधानमस्ति। शिखरस्य चतुर्थांशं यावन्मन्दिरपरिक्रमाया उच्छृतिर्भवेत्। मन्दिरस्य सभामण्डपं गर्भगृहाद् द्विगुणितं स्यात्। देवालयस्य विस्ताराद् द्विगुणा देवालयस्योन्नतिर्भवेत्। उच्छृतेः तृतीयांशं यावद् प्रासादस्य कटिर्भवति। देवालयविस्तारार्धतुल्यं गर्भगृहं, गर्भगृहस्य चतुर्थांशं यावद् द्वारस्य विस्तारः, विस्तारस्य द्विगुणिता द्वारस्योच्छ्रतिः भवेत्। पुनः द्वारमपि त्रिपञ्चसप्तचनेवशाखायुक्तं भवेत्। शाखायाश्चतुर्थांशे अधोभागे प्रतिहारौ भवेताम्। देवप्रासादस्य जगतिनिर्माणस्यापि विधानमस्ति। विभिन्नदेवानामनुगुणमपि निर्माणकार्ये नैके नियमाः शास्त्रकारैरुल्लिखितास्सन्ति।

पश्चिमोत्तरहिमालयस्थे हिमाचलप्रदेशे प्राचीनकालादेव देवपरम्परा अतीवप्राचीना वर्तते। अत्र देवस्थलानि पर्वतेषु, नदीतटेषु, सरस्थलेषु, निर्झरस्थलेषु, गुहासु चोपलभ्यन्ते। हिमाचले प्रचुरमात्रायां देवस्थलानि देवमन्दिराणि देवक्षेत्राणि च विद्यन्ते। अत्र तादृशान्यपि क्षेत्राण्यपि सन्ति यत्र वनविशेषः पर्वतविशेषः सरोवरविशेषश्च देवविशेषस्याधिकार-क्षेत्रगतं भवति। बहूनि देवस्थलानि तादृशानि अपि यत्र देवानां देवीनाञ्च केवलं स्थलमेव वर्तते, तत्र कश्चन देवप्रासादो न लभ्यते। परञ्च शोधेऽस्मिन् ज्योतिषाध्ययनाध्यापनदृशा अध्ययनाय प्रसिद्धानि प्राचीनानि मन्दिराणि चितानि सन्ति। हिमाचले देवप्रासादानां वास्तुदृष्ट्या पञ्चप्रकारकानां शैलीनाम् उपलब्धिर्जायते। सर्वप्राथम्येन वास्तुशास्त्र-ग्रन्थेषु देवप्रासादाः मुख्यतया त्रिषु कोटिषु विभक्ता आसन्। तद्यथा–नागरद्राविडबेसरशैल्यश्चेति।

**नागरं चतुरस्त्रं स्यादष्टास्त्रं द्राविडन्तथा।**
**वृत्तञ्च बेसरं प्रोक्तमेतत्पीठाकृतिस्तथा।।**

अर्थात् नागरशैल्याः चतुर्भुजानि, द्राविडशैल्याः अष्टभुजानि, बेसरशैल्याः वृत्तानि मन्दिराणि चोच्यन्ते। एतेषां शैलीनामुत्तरोत्तरविकासेन नैकाः देवप्रासादप्रकाराः कालान्तरे विकसिताः। तत्परिणामतः हिमाचलेऽपि देवप्रासादाः प्रमुखतया पञ्चसु प्रकारेषु वास्तुकलादृष्ट्या वर्गीकृता। प्रायः क्षेत्रविशेषे विशेषपरिस्थितिषु विभिन्नानां शैलीनां विकासस्सञ्जायते। तद्वदेव हिमाचले मुख्याभ्यः शैलिभ्यः किञ्चित् भिन्ना शैल्याः अप्युपलभ्यन्ते। शिखरशैली, बहुछदियुता-पैगोडाशैली, वक्राछदियुताशैली, गुम्बदशैली, गोम्पाशैली च।

**शिखरशैली**

इयं शिखरशैली प्रायः भारते प्रत्येकम् कोणे प्राप्यते एव। अस्याः शैल्याः निर्माणकलायाः उल्लेखः अग्निमत्स्यपुराणयोः तथा अन्यशास्त्रीयग्रन्थेष्वप्युपलभ्यते। शिखरशैली नागरशैल्याः सममेव वर्तते। अस्यां शैल्यां बाह्यदृष्ट्या अष्टाङ्गानां प्राधान्यं भवति, यथा- मूलाधारः, मसूरकः, जङ्घा, कपोतः, शिखरः, ग्रीवा, आमलकं, कलशश्चेति। एवमेव मन्दिरस्य मुख्यभागाः मुख्यद्वारं जगतिः मण्डपं शिखरश्चेत्यादयस्सन्ति। मन्दिरस्य मूलाधारः चतुरस्रः, अष्टास्रः वर्तुलः सर्वतोभद्रश्च भवति। मुख्यद्वारादारभ्य गर्भगृहं यावद् तथा मूलाधाराद् कलशं यावद् मानपरिमाणादिकं वास्तुशास्त्रीयग्रन्थेषूपलभ्यते। हिमाचलप्रदेशस्य कुल्लुजनपदस्य बजौरानाम्नि स्थले विश्वेश्वरमहादेवस्य मन्दिरं शिखरशैल्याः उत्कृष्टमुद्धरणं विद्यते। अस्य निर्माणकालविषये मतैक्यं नास्ति। जे.एन.बनर्जीमहोदयानुसारं सप्तमाष्टमशताब्द्यां निर्मितमिति। परञ्च पुरातत्त्ववेत्ता डा.वोगलमहोदयः अस्य मन्दिरस्य निर्माणकलायामुपरि विस्तृतमध्ययनं कृतवान्। तेन विवेचितं यत् कालविषये किमपि वक्तुन्न शक्यते। यतोहि अस्य मन्दिरस्य निर्माणशैल्याः मूर्तिकलायाश्च निर्माणकालं विद्वद्भिः शोधितकालात् प्राचीनमिति प्रतिभाति। कुल्लुजनपदस्य शिखरशैल्यां निर्मितेषु मन्दिरेषु गौरीशङ्करमन्दिरं जगतसुखस्थं, निरमण्डस्थं शिवमन्दिरं, दशाल-नगरस्थे गौरीशङ्करमन्दिरे, मणिकर्णस्थं महादेवमन्दिरं, शैंशरस्थं महादेवमन्दिरञ्च विशेषोल्लेखनीयास्सन्ति।

एतदतिरिच्य शिखरशैल्याः मन्दिरेषु बैजनाथस्थस्य शिवमन्दिरस्य विशिष्टं स्थानमस्ति। उन्नतभूमौ स्थितेऽस्मिन् मन्दिरे प्रारम्भे मुखमण्डपं तदग्रे मण्डपं गर्भगृहञ्च विद्यते। मुखमण्डपसम्मुखे नन्दीद्वयोः प्रतिमे स्तः। तयोरेकस्याम् उपविशन् वृषभः, द्वितीयायां गुर्वीप्रतिमायाम् उत्तिष्ठन् वृषभः सुशोभते। मण्डपस्य छदि चतुर्षु स्तम्भेषु स्थिताऽस्ति। मन्दिरस्य शिखरे आमलकमस्ति यस्योपरि त्रिशूलं स्थापितमस्ति। अस्य मन्दिरस्य गर्भगृहस्य बहिर्मानं द्वादशहस्तवर्गपरिमितं तथा अन्तर्मानं षट्हस्तवर्गमितं वर्तते। गर्भगृहे शिवलिङ्गं प्रतिष्ठितमस्ति। गर्भगृहस्य बाह्यभित्तिषु लघुप्रतिमास्थापनार्थं स्थानानि सन्ति। तत्र सूर्यस्य, चतुर्भुजब्रह्मणः, सिंहवाहिनीचतुर्भुजदुर्गायाश्च प्रतिमाः सुशोभन्ते।

एवमेव शिखरशैल्याः मन्दिरेषु काङ्गड़ाजनपदस्य वज्रेश्वरीमन्दिरं, ज्वालामुखीमन्दिरं, बगलामुखीमन्दिरं, महाराणाप्रतापसागरस्था बाथु-दी-लड़ी इतिनामधेया मन्दिरशृंखला च विशेषोल्लेखनीया विद्यते। बिलासपुरजनपदे जलमग्नं रङ्गनाथमन्दिरं, चम्बाजनपदे हरिरायमन्दिरं लक्ष्मीनारायणमन्दिरञ्च वर्तते। एतदतिरिच्य हमीरपुरजनपदे सुजानपुरस्थं गौरीशङ्करमन्दिरं, मण्डीजनपदे पञ्चवक्त्रमन्दिरं त्रिलोकीनाथमन्दिर-ञ्चोत्कृष्टोद्धरणानि सन्ति।

**बहुछदियुता पैगोडाशैली-**

हिमाचलस्य पैगोडाशैल्यां निर्मितानि मन्दिराणि महत्त्वपूर्णानि मन्यन्ते। यतोहि मन्दिराणाम् इयं शैली सर्वथा भिन्नैव। एतेषां निर्माणं पाषाणकाष्ठाभ्यां सम्भवति। अस्यां शैल्यां भित्ति पाषाणकाष्ठाभ्यां तथा छदिनिर्माणं काष्ठेन पट्टिकाभिः सञ्जायते। पैगोडाशैल्याः वैशिष्ट्यमस्ति प्रासादे नैकेषां छदिनां निर्माणम् इति। तत्राधस्था छदिः ऊर्ध्वस्थितछदितः विस्तृता भवति। परञ्च छदिद्वयमध्ये उन्नता प्रायः समाना एव भवति। एवमेवान्ते अन्तिमाछदिः केवलं स्तूपाकारं शिखरमेव भवति। अस्याः शैल्याः प्रचलनं हिमक्षेत्रे एव वर्तते। हिमपतनकाले हिमं अनेकछदिगतं भवति येन भवनस्य सुरक्षा भवति। अतः हिमक्षेत्रे प्रासादमिदमत्यन्त-मुपकारकं भवति। ऐतिहासिकदृशा बहुछदियुतमन्दिरेषु कुल्लुजनपदस्थं त्रिजुगीनारायणमन्दिरं प्राचीनतममस्ति। हरकोर्टमहोदयानुसारं राजाविशुद्धपालस्य शासनकाले मन्दिरमिदमासीदिति शिलालेखैः ज्ञायते। अनेन अस्य कालः प्रायः द्वितीय-तृतीयशताब्द्यां सिद्ध्यति। तिस्रश्छदियुतं काष्ठप्रस्तराभ्यां निर्मितं मन्दिरमिदं वर्तते। परञ्च कुल्लुजनपदस्यैव हिडिम्बामन्दिरम् अत्यन्तं प्रसिद्धमस्ति। बृहद्पाषाण-शिलायां संस्थितं पैगोडाशैल्याः मन्दिरमिदं 27 हस्तमितं दैर्घ्यं 18 हस्तमितं विस्तृतं 54 हस्तमितञ्चोन्नतं वर्तते। अस्य देवदारूपट्टिकाभिः निर्मिताः चतस्रः छदयस्सन्ति। अन्तिमा छदि शङ्क्वाकारा वर्तते, यस्याः शिरसि कलशः तथा कलशस्योपरि त्रिशूलं संस्थापितमस्ति। एतदतिरिच्यापि मनुमन्दिरं, नग्गरस्थं त्रिपुरासुन्दरीमन्दिरं, खोखनस्थम् आदिब्रह्मामन्दिरञ्च अस्याः शैल्या उद्धरणानि सन्ति।

मण्डीजनपदे पैगोडाशैल्याः चत्वारि मन्दिराणि विशेषरूपेण उल्लेखनीयानि सन्ति। तानि पराशर-कामाख्या-गौरीशङ्कर-आदिब्रह्ममन्दिराणि च सन्ति। निर्जनवनस्थिते ऋषिपाराशरस्य मन्दिरे तिस्रः छदयस्सन्ति। तस्मिन् मन्दिरे प्रथमाद्वितीया छदि वर्गाकारा तृतीया शङ्क्वाकारा वर्तते, यस्या उपरि कलशः सुशोभते। ऋषिपाराशरस्यैव एकमन्यं मन्दिरं कुल्लुजनपदस्थं कमान्दग्रामे वर्तते। तस्य मन्दिरस्यापि स्वरूपं परिमाणं संरचना च समाना एव विद्यते। येन प्रतीयते यत् द्वयोः निर्माणकारः अभिन्न एवासीत्। एवमेव शिमलाजनपदेऽपि हाटेश्वरीमन्दिरं, माननेश्वरमन्दिरं, कोटेश्वरमन्दिरञ्च पैगोडा शैल्यां विद्यन्ते। एतदतिरिच्य किन्नौरजनपदेऽपि पैगोडामन्दिरेषु निचारस्थं उखादेवीमन्दिरं, रकछमस्थं भगवतिमन्दिरं, चगाओस्थं महादेवमन्दिरञ्चोल्लिख्यन्ते।

**तिर्यक्छदिशैली ( ढलवां ) अथवा एकछदियुतंमन्दिरम्**

इयं शैली हिमाचलप्रदेशे एव विकसिता। शैल्यामस्यां छदिः अवनता भवति। परिणामतः अस्याः शैल्याः मन्दिराणि सामान्यगृहमिव

दृश्यते। एतादृशानि मन्दिराणि आयताकारस्य काष्ठपाषाणाभ्यां निर्मीयते। भित्तिष्वपि देवदारोः काष्ठस्य प्रयोगः प्राप्यते, अतः इयं शैली काष्ठकुणीनाम्ना ज्ञायते। अस्यां शैल्यां काष्ठस्तम्भादिकानां प्रयोगः अत्यन्तोत्तमरीत्या भवति, येन भवनं भूकम्परोधी जायते। 1905 ईश्वीये वर्षे काङ्गडाक्षेत्रे भूकम्पनेन बृहद्क्षतिः सञ्जाता, परञ्च कुल्लुक्षेत्रे अस्य प्रभावो नाभवत् यतोहि तत्र भवनानि काष्ठकुणीशैल्या निर्मितानि आसन्। कुल्लुजनपदस्य जगतसुखस्थं संध्यादेवीमन्दिरम् अस्याः शैल्याः एकमुत्कृष्टमुद्धरणमस्ति। मन्दिरस्य भित्तौ लेखे राज्ञा उद्धरणपालेन मन्दिरमिदं 1428 ईश्वीये वर्षे निर्मितमिति। एवमेव कुल्लुजनपदे अस्या शैल्याः बिजलीमहादेवमन्दिरं, अम्बिकादेविमन्दिरं, निरमण्डस्थं परशुराममन्दिरञ्च प्रसिद्धानि उद्धरणानि सन्ति।

मण्डीजनपदेऽपि अस्याः शैल्याः न्यूनान्येव मन्दिराणि सन्ति। एतेषु प्रमुखास्सन्ति– माहुनागमन्दिरं, कमरूनागमन्दिरं हुरंगनारायण–मन्दिरञ्चेति। सिरमौरजनपदे चूडधारस्थं श्रीगुलदेवमन्दिरम् अस्या शैल्याः उत्कृष्टमुद्धरणं विद्यते। एतदतिरिच्य चम्बाजनपदे साहोग्रामस्थं चन्द्रशेखरमन्दिरं वर्तते। पाषाणकाष्ठाभ्यां निर्मितदेवालयस्य गर्भगृहे शिवलिङ्गं प्रतिष्ठितमस्ति। चम्बाजनपदे भरमौरस्थं लक्षणादेवीमन्दिरं, छतराडीस्थं शक्तिदेवीमन्दिरञ्च एकछदेः मन्दिरप्रकारस्य, काष्ठकलायाः, मूर्तिकलायाश्च उत्कृष्टमुद्धरणं वर्तते। एतदतिरिच्य लाहौलस्पितौ उदयपुरस्थं मृकुलादेव्याः मन्दिरमपि अस्यां शैल्यां निर्मितमस्ति।

### गुम्बदशैली

गुम्बदशैल्याः विकासः मध्यकाले एव सञ्जातः। इयं शैली मुस्लिमशैल्याः प्रभाविता दृश्यते। अस्यां शैल्यां प्रासादस्य निर्माणं इष्टिकाभिः सम्पत्स्यते, परञ्च हिमाचले प्रायः भवननिर्माणे पाषाणकाष्ठयोरेव प्रयोगः दृश्यते। अतो अन्येभ्यः शैलीभ्यः इयं शैली अर्वाचीनेति। गुम्बदशैलीयुक्तमन्दिराणि पञ्जाबप्रदेशसम्बद्धक्षेत्रेष्वेवो–पलभ्यन्ते। एतादृशानां मन्दिराणां दर्शनं काङ्गडा–बिलासपुर–हमीरपुर–सिरमौरजनपदानां समतलक्षेत्रेष्वेव सञ्जायते। गुम्बदशैल्यां मुस्लिमसभ्यतायाः प्रभावानन्तरमपि प्रासादान्तर्गताः गर्भगृहमण्डपादिनां व्यवस्थाः पूर्ववदेव प्रचलिताः।

बिलासपुरे षण्मुखेश्वरमन्दिरं तथा तस्यैव समीपस्थानि लघुमन्दिराणि गुम्बदशैल्याः उत्कृष्टान्युद्धरणानि सन्ति। षण्मुखेश्वरमन्दिरं भगवते कार्तिकेयाय समर्पितं वर्तते। अस्य प्रवेशद्वारे सुन्दरचित्रकला मण्डपे कलशश्च सुशोभते।

काङ्गडाजनपदे भगवत्या ज्वालादेव्याः गुम्बद्धशैल्यां निर्मितं भव्यं मन्दिरं वर्तते। अस्य गुम्बद्धोऽपि स्वर्णमण्डितोऽस्ति। मन्दिरमिदमत्यन्तं प्राचीनं वर्तते। परञ्च यदा अस्य मन्दिरस्य पुनर्निर्माणं सञ्जातं तस्मिन्काले गुम्बद्धशैल्याः प्रचलनमधिकमासीत्। नूरपुरस्य कोटलाग्रामस्थ बगलामुखीमन्दिरमपि गुम्बद्धशैल्यां निर्मितं वर्तते।

सिरमौरजनपदे भगवतः परशुरामस्य द्वे मन्दिरे स्तः। एकं एकावनतछदियुतं मन्दिरं परशुरामसरस्य तीरेऽवस्थितम्। द्वितीयं मन्दिरं वर्गाकारं गुम्बद्धशैल्याः निर्मितमस्ति। सिरमौरे एव त्रिलोकपुरनाम्नि स्थले देव्याः बालासुन्दर्याः प्रसिद्धं मन्दिरं वर्तते। अस्य निर्माणं राज्ञा दीपप्रकाशेन 1573 ईशवीये वर्षे कारितम्। गर्भगृहे भगवत्याः अष्टभुजाप्रतिमा तथा देव्याः पिण्डीस्वरूपश्च प्रतिष्ठितोऽस्ति।

हमीरपुरजनपदस्य सुजानपुरस्थं नर्वदेश्वरमन्दिरं वास्तुकलायै भित्तिचित्रकलायै च प्रसिद्धम्। अस्य स्वरूपं मुगल–राजस्थानशैल्योः मिश्रणं वर्तते। अस्य निर्माणं राज्ञः संसारचन्द्रस्य पत्न्या प्रसन्नादेव्या 1802 ईश्वीयेवर्षे कारितम्। गुम्बद्धशैल्याः एतत् उत्कृष्टमुद्धरणं विद्यते।

### गोम्पाशैली

हिमाचलप्रदेशस्य लाहौलस्पीति–किन्नौरक्षेत्रादिषु देवालयानां शैली अन्योभ्यो क्षेत्रेभ्यो भिन्नैव प्राप्यते। निर्माणशैल्या सह पूजापद्धत्याम–प्यन्तरं निहितमस्ति। गोम्पा इति शब्दः भोटभाषायाः उद्धृतोऽस्ति। यस्यार्थः भवति एकान्तस्थलमिति। गोम्पा प्रायः तादृशे स्थले भवति, यत्र शान्तं वातावरणं तथा दुर्गमस्थलं भवेत्। येन धार्मिकसाधनायां विघ्नानि नागच्छेत्। अतः गोम्पाः प्रायः उन्नतशैलानामधोभागे, पर्वतकन्दरासु, गुहासु चावस्थितास्सन्ति। गोम्पायाः परिकल्पना अध्यात्मिकी वर्तते, सामाजिकपरिकल्पनायाः अभाव एव दृश्यते। वस्तुतः गोम्पा मन्दिरविहारयोः द्वयोः पर्यायवाची न प्रतीयते। तत्र साधकानां कृते केवलं साधनास्थलमेव भवति।

स्पीतिनद्यास्तीरे ताबोगोम्पा वर्तते। अस्य निर्माणं ९९६ ईशवीयेवर्षे रत्नभद्रेण कारितम्। अस्य परिसरस्य ९६ मीटरमिता दैर्घ्या ८० मीटरमिता विस्तृता 2 मीटरमितञ्चोन्नता पाषाणमृत्तिकाभ्यां निर्मिता भित्तिः वर्तते। अस्मिन् गोम्पापरिसरे प्रमुखा नवकक्षास्सन्ति। एतदतिरिच्य किब्बरकाजास्थलयोः मध्ये उन्नतपर्वतशिखरे कीगोम्पा स्पीतीक्षेत्रस्य विशालतमं गोम्पा वर्तते। एवमेव जनजातीयक्षेत्रेषु बहूनि गोम्पाभवनानि सन्ति, येषां प्रयोगः साधनाप्रशिक्षणस्थलत्वेनैव मुख्यतया भवतिस्म।

ज्योतिषाध्ययनदृशा अवलोकयामश्चेत् हिमाचलस्य देवमन्दिराणि विषयेऽस्मिन् महत्त्वपूर्णां भूमिकान्निर्वहन्ति। मन्दिरस्य निर्माणस्य चिन्तनादारभ्य विधिवद्सञ्चालयितुं ज्योतिषशास्त्रस्य प्रयोगः भवतीति वास्तुविज्ञानां वास्तुशास्त्रग्रन्थानाम्मतमिति। यतोहि प्रासादारम्भमुहूर्त–विचारादारभ्य प्राणप्रतिष्ठां यावत् प्रत्येकस्मिन् पदे ज्योतिषीयकालगणनैव प्रयुज्यते।

एतदतिरिच्यापि विभिन्नैः प्रकारैः ज्योतिषदृष्ट्या प्रासादनिर्माणे विचारः भवति। वस्तुतः वास्तुविद्या ज्योतिषशास्त्रस्य संहितास्कन्धस्यैवाङ्गमस्ति। संहितापारगश्च दैवचिन्तको भवतीति शास्त्रवचनानुगुणं ज्योतिषशास्त्रवेत्ता वास्तुविद्ययाऽपि अलङ्कृतो भवेदित्याशयः। हिमाचलस्थानां मन्दिराणां सर्वेक्षणेन ज्ञायते यत्क्षेत्रेऽस्मिन् देवमन्दिराणां बाहुल्यमस्ति। प्रायः सर्वेषां साम्प्रदायानां मन्दिराणि उपलभ्यन्ते, यत्र वास्तुशास्त्रानुगुणं निर्माणं विहितम्। देवप्रासादस्यापि केचन प्रकाराः विभिन्नपरिस्थतिषु अस्मिन्नेव क्षेत्रे पल्लविताः विकसिताश्च। तस्यां शैल्यां प्रासादनिर्माणेऽपि वास्तुशास्त्रीयाः नियमाः परिपाल्यन्ते। अतः समीक्षणार्थं वर्तमाने हिमाचले द्वादशजनपदगताः प्रमुखाः प्राचीनाश्च देवालयाः सर्वेक्षितास्सन्ति।

चम्बाजनपदे अत्यन्तप्राचीनानि देवस्थलानि सन्ति। तानि मन्दिराणि स्वशिल्पकलया प्राचीनतया चात्यन्तोपादेयानि सन्ति। सप्तमशताब्द्यां निर्मितं छतराडीस्थं भगवत्या शक्तिदेव्या: मन्दिरम् एकछदिशैल्या निर्मितम्। अस्य निर्माणं राज्ञामेरूवर्म्मणा विजयानन्तरं कारितम्। मन्दिरस्य गर्भगृहे मानवप्रमाणमिता शक्तिदेव्या: कांस्यप्रतिमा प्रतिष्ठिताऽस्ति। अस्य मन्दिरस्य वास्तुकला पूर्णतया हिमाचलीया वर्तते।

भरमौरक्षेत्रे मुख्याकर्षणस्य केन्द्रं भवति चतुरशीति: मन्दिराणां समूह:। यत्र शिखरशैल्या निर्मितानि मन्दिराणि उपलभ्यन्ते। एतानि मन्दिराणि सप्तमशताब्द्या: आरभ्य दशमशताब्दीं यावत् निर्मितानि इति इतिहासविदाम्मतम्। भारतीयपरम्परायां मन्दिरेषु त्रैकालिकपूजार्चनाया: अनिवार्यताऽस्ति। तदर्थं अर्चकानां नियुक्तिर्भवतिस्म। तेषाम् अर्चकानां कुलानि अद्यावधि परम्परया मन्दिरेषु पूजनकार्यं सम्पादयन्ति। चम्बाक्षेत्रस्य देवालयानां दर्शनेन ज्ञायते यत् अत्रत्या वास्तुविदा: प्रतिमानिर्माणं प्रतिमालक्षणविषयेऽपि ज्ञानशीला: आसन्। भरमौरे शिखरशैल्यां निर्मितस्य मणिमहेशमन्दिरस्य प्राङ्गणे नन्दीवृषभस्य कांस्यप्रतिमा, गणेशमन्दिरे अष्टधातुनानिर्मिता गणेशप्रतिमा, कार्तिकेयमन्दिरे मानवप्रमाणमिता षण्मुखी कृष्णपाषाणप्रतिमा च अत्रत्यं प्रतिमाविषयकं ज्ञानं प्रदर्शयति। इतोऽपि शिखरशैल्यां निर्मिते नृसिंहमन्दिरेऽपि अष्टधातुना निर्मिता भव्या प्रतिमा विद्यते। लक्षणादेव्या: मन्दिरं सप्तमशताब्द्यां निर्मितं तत्रापि अष्टधातुना निर्मिता महिषासुरमर्दिन्या: अतुलनीया प्रतिमा विराजते।

एतदतिरिच्य चम्बानगरे लक्ष्मीनारायणमन्दिरं हरिरायमन्दिरञ्च शिखरशैल्या: निर्मितानि मन्दिराणि सन्ति। तानि मन्दिराणि वास्तुशास्त्रनियमानुगुणमेव निर्मितानि सन्ति। लक्ष्मीनारायणमन्दिरमिदं प्राचीनकालादेव शास्त्राध्ययनाध्यापनस्य केन्द्रमासीत्। अत्र ज्योतिषशास्त्रस्यापि अध्ययनं भवति स्म। लोकोपकाराय एतेषां मन्दिराणाम् अर्चकवर्गो अपि ज्योतिषकर्मकाण्डाभ्यां जनसमस्या: समादधति स्म। वर्तमानेऽपि आधुनिकरीत्या पारम्परिकशास्त्रानां शिक्षणाय लक्ष्मीनारायणमन्दिरन्यास: प्रयतमानो अस्ति।

काङ्गड़ाजनपदे संस्थितानि शक्तिपीठमन्दिराणि प्राचीनकालादेव शास्त्राध्ययनाध्यापनस्य केन्द्राणि आसन्। तेषु मन्दिरेषु प्रमुखकेन्द्राणि आसन्, श्रीवज्रेश्वरीमन्दिरं ज्वालामुखीमन्दिरं, श्रीचामुण्डादेवीमन्दिरञ्चेति। एतेषां मन्दिराणामुपादेयता अध्ययनोपसनोभयदृष्ट्या विद्यते। अन्यानि मन्दिराणि उपासनास्थलत्वेनैव प्रसिद्धानि सन्ति। तेष्वपि प्रमुखा: कालेश्वरमन्दिरं, बैजनाथमन्दिरं, जयन्तीमातामन्दिरं, एकाश्ममसरूर-मन्दिरं, श्रीबगलामुखीमन्दिरञ्च सन्ति। काङ्गडाजनपदे एव बाथु-दी-लडीनाम्ना प्रचलिता मन्दिरश्रृंखला वर्तते। मन्दिरसमूहोऽयं प्रतिवर्षे प्राय: अष्टमासान् यावत् जलमग्नो भवति। तदापि अस्य मन्दिरसमूहस्य वास्तुकला दर्शनीया वर्तते तथा शिखरशैल्या उत्कृष्टमुद्धरणं विद्यते। अनेन स्पष्टम्भवति यत्क्षेत्रेऽस्मिन् वास्तुविषयकज्ञानमत्यन्तम् उन्नतमासीत्।

मण्डीजनपदे सर्वाणि मन्दिराणि वास्तुशास्त्रविदितान्येव सन्ति। ज्योतिषाध्ययनाध्यापनदृशा पराशरमन्दिरमत्यन्तं महत्त्वपूर्णं विद्यते। ऋषिपाराशर: ज्योतिषशास्त्रस्य अष्टादशप्रवर्तकेषु गण्यते। वर्तमाने होरास्कन्धस्य प्राय: सर्वे सिद्धान्ता: ऋषिपराशरेण उपदिष्टा:। मण्डीजनपदस्थ पराशरमन्दिरं पराशरसरोवरस्य तीरेऽवस्थितम्। पैगोडाशैल्या निर्मितस्य मन्दिरस्य गर्भगृहे ऋषिपराशरस्य प्रतिमा तथा मैत्रेय-विष्णु-शिव-महिषासुरमर्दिन्य: प्रतिमा: प्रतिष्ठितास्सन्ति। तत्र विशेषरूपेण पराशरमैत्रेययो: प्रतिमे पराशरहोराशास्त्रनाम्नि ग्रन्थे उपलब्धं ज्ञानमङ्गीकरोति। अनेन ज्ञायते यत् ज्योतिषविषयक: पराशरमैत्रेयसंवाद: अस्मिन्नेव स्थले सञ्जात:। यतोहि पराशरहोराशास्त्र-ग्रन्थस्यारम्भे एव निर्दिष्टमस्ति यदयं होराशास्त्रीयोपदेशात्मक: सम्वाद: हिमालयक्षेत्रे सञ्जात:।

**अथैकदा सुखासीनं पार्श्वे हिमवतश्शुभे।**
**महर्षिप्रवरं पूज्यं पराशरमुदारधी:।।**

हिमालयक्षेत्रे स्थानमिदं विहाय पाराशरसम्बद्धम् अन्यस्थानं नोपलभ्यते। अत: पाराशरीपद्धत्या: प्रसार: इत: एवाभवदिति प्रतीयते।

एतदतिरिच्य मण्डीजनपदे उत्कृष्टवास्तुकलया युक्ता: देवालयास्सन्ति। भूतनाथमन्दिरं, श्यामाकालीमन्दिरं, मगरुमहादेवमन्दिरं, पद्मसंभव-मन्दिरं पञ्चवक्त्रमन्दिरञ्च प्राचीनानि मन्दिराणि सन्ति। एतेषु मन्दिरेषु नैके ब्राह्मणा: पूजाकार्ये रता: आसन्, ये ज्योतिषशास्त्रस्य ज्ञातार: भवन्ति स्म। एतदतिरिच्य देवालयानां वास्तुकला क्षेत्रेऽस्मिन् वास्तुशास्त्राध्यय-नस्य प्रमाणमपि प्रस्तौति।

कुल्लूक्षेत्रस्य देवपरम्पराऽपि विश्वप्रसिद्धा वर्तते। अत्र देवस्थलानां बाहुल्यं वर्तते, तत्र देवमन्दिराणि अपि नैकानि सन्ति। अत्रत्या: प्रमुखा: देवालयास्सन्ति-बिजलीमहादेवमन्दिरं, हिडिम्बादेवीमन्दिरं, बजौराशिवमन्दिरं, जामलुमन्दिरं, गौरीशङ्करमन्दिरञ्च। एतेषु मन्दिरेषु ज्योतिषदृशा अवलोकयामश्चेत् अत्र जनानां सर्वविधानां समस्यानां समाधानम् अर्चकै: दीयते स्म। मन्दिरस्य अर्चक: क्षेत्रेऽस्मिन् गुरनाम्ना सम्बोध्यते। स: गुर: विभिन्नप्रकारकानां विद्यानां प्रयोगं करोति जनानां समस्यानां परिहाराय। मुख्यत: गुरा: अर्चका: वा रमलशकुनप्रश्नविद्यानां प्रयोगं कुर्वन्ति।

हमीरपुरबिलासपुरजनपदयोरपि नैकानि मन्दिराणि सन्ति। हमीरपुरस्य सुजानपुरनगरे महादेवाय समर्पित: शिवालय: विद्यते नर्वदेश्वरमन्दिरं। मन्दिरमिदं राजस्थानीशैल्यां निर्मितम्। सुजानपुरं राजासंसारचन्द्रस्य काले राजनगरमासीत्। एतदतिरिच्य दियोटसिद्धनाम्नि स्थले बाबाबालकनाथस्य मन्दिरमस्ति। यत्र प्रतिवर्षं चैत्रसङ्क्रान्तित: मासं यावत् उत्सवो भवति। एतदतिरिच्य बिलासपुरनगरे नैकानि मन्दिराणि आसन् परञ्च कृत्रिमगोबिन्दसरनिर्माणकारणात् तेषु मन्दिरेषु प्राय: बहूनि मन्दिराणि जलमग्नानि सन्ति। क्षेत्रेऽस्मिन् रङ्गनाथ-मुरलीमनोहर-गोपालमन्दिराणि च सन्ति। वस्तुत: स्थलेऽस्मिन् वैष्णवसम्प्रदायस्यैव प्रभावो आसीदिति। अत्रस्थेषु देवालयेष्वपि उत्कृष्टवास्तुविद्याया: दर्शनं भवति। बिलासपुरजनपदे एव श्रीनयनादेव्या: मन्दिरमस्ति, यस्य गणना प्रमुखशक्तिपीठेषु भवति। अस्य निर्माणं शिखरशैल्यां सञ्जातम्। देवीस्थलेऽस्मिन् प्राचीनकालादेव

ISSN 2456-3420

शास्त्राध्ययनाध्यापनं प्रचलतिस्म। बिलासपुरजनपदे एव घाघसनामक-स्थलात् 7 कि.मी. मितं दूरं मार्कण्डेयऋषे: तपोस्थलं वर्तते। यत्र शिखरशैल्या मार्कण्डेयमन्दिरं निर्मितं वर्तते। स्थलेऽस्मिन् वर्तमानेऽपि भृगुसंहितानुगुणं फलादेश: क्रियते। प्राय: जना: ज्योतिषीयपरामर्शं स्वीकर्तुम् अत्रागच्छन्ति।

ऊनाजनपदे भगवत्या: दुर्गादेव्या: प्रसिद्धं शाक्तिपीठं विद्यते। अत्र छिन्नमस्तिकादेव्या उपासना भवति। क्षेत्रेऽस्मिन् मन्दिरमिदं चिन्तपुर्णीनाम्ना प्रसिद्धमस्ति। ऊनाजनपदस्यैव गगरेटक्षेत्रे स्वांनद्यास्तीरे द्रोणशिवमन्दिरमस्ति, यत् शिवबाडीनाम्ना प्रसिद्धं स्थलम्। एतदतिरिच्य दौलतपुरक्षेत्रे भगवत्या: भद्रकाल्या: पाण्डवै: निर्मितम्मन्दिरमस्ति। ऊनाजनपदस्य सर्वेषु मन्दिरेषु श्रौतस्मार्तप्रतिपादितानुष्ठानानामायोजनं भवति। अत्रत्य पण्डितवर्गोऽपि ज्योतिषाध्ययनध्यापनशीलो भवति।

सोलनजनपदे शूलिनीदेव्या: मन्दिरं विद्यते। शूलिनीदेवी नगरस्यास्य अधिष्ठात्रीदेवी मन्यते। सोलनजनपदस्यैव जटोलीनाम्निस्थले विशालम् उन्नतञ्च शिवमन्दिरं वर्तते। देवालयोऽयं शिखरद्राविडमिश्रित-शैल्या निर्मित:, यत् वास्तुकलादृष्ट्या अद्वितीयमुद्धरणमस्ति।

शिमलाजनपदे नैकानि प्राचीनानि देवमन्दिराणि सन्ति। शिमलात: 7 कि.मी. यावद्दूरं भगवत्या तारादेव्या: मन्दिरं वर्तते। यत्र शाक्तग्रन्थोक्ता अष्टादशभुजाप्रतिमा सुशोभते यत् अष्टधातुना निर्मिता वर्तते। सराहनक्षेत्रेऽपि प्राचीनं देव्या: मन्दिरं विद्यते। एतत् सराहननामकं स्थलं पुराकाले शोणितपुरनाम्ना ज्ञायते स्म। अस्या: देव्या: ख्याति भीमाकालीनाम्नाऽस्ति। भगवतीभीमाकाली बुशहरराज्यस्य शासकानां कुलदेवी भवति। मन्दिरमिदं पर्वतीयवास्तुकलाया: उत्कृष्टमुद्धरणमस्ति। एतदतिरिच्य रोहडुक्षेत्रेऽपि महिषासुरमर्दिन्या: मन्दिरमस्ति, यत्र उत्तमवास्तुकलाया दर्शनं भवति। शिमलानगरसन्निकटमेव जाखुनाम्नि स्थले हनुमत्मन्दिरं वर्तते। वस्तुत: तत्र याकऋषे: आश्रम आसीत्। शिमलानगरमध्ये भगवतीमहाकालीदेव्यै समर्पितं कालीबाडीमन्दिरं विद्यते। रामपुरनगरस्य नीरथनाम्नि स्थले प्राचीनं सूर्यमन्दिरं विद्यते यत् शिखरशैल्यां निर्मितं वर्तते। एवमेव ज्योतिषशास्त्रदृशा शिमलाक्षेत्रस्य मन्दिराणि अतीवोपकारकानि सन्ति। क्षेत्रस्यास्य देवमन्दिराणि अत्रत्यं वास्तुविषयकं ज्ञानं प्रस्तुवन्ति तथा देवमन्दिरेषु पूजार्चनकर्तार: पण्डिता अपि ज्योतिषशास्त्राध्ययनाध्यापनरता: भवन्ति।

सिरमौरजनपदे रेणुकादेव्या: मन्दिरं वर्तते, यत्र रेणुकासरोवर: अपि विद्यते। सिरमौरस्यैव त्रिलोकपुरे श्रीबालासुन्दरीदेव्या: मन्दिरं वर्तते। एतदतिरिच्य नाहननगरे प्रसिद्धं जगन्नाथमन्दिरमस्ति। यत्र भगवत: जगन्नाथस्य नीमदारुणा निर्मिता प्रतिमा सुशोभते तथा तस्या: प्रतिमाया: द्वादशवर्षानन्तरं नवकलेवरोत्सवोऽपि मन्यते। क्षेत्रेऽस्मिन्नपि देवमन्दि-राणामध्ययनाद् वास्तुविषयकं फलादेशविषयकञ्च ज्ञानमुपलभ्यते।

लाहौलस्पीतिजनपदे मृकुलादेव्या: त्रिलोकीनाथशिवस्य च मन्दिराणि सन्ति। एतदतिरिच्य बौद्धगोम्पास्सन्ति। किन्नौरजनपदे मुख्यत: कामरूमन्दिरसमूह: विद्यते।

निष्कर्ष:- हिमाचलप्रदेशे बहूनि प्राचीनानि मन्दिराणि सन्ति। तानि सर्वाणि वास्तुकलादृष्ट्या अत्यन्तोपकारकानि सन्ति। एतदतिरिच्य किन्नौरजनपदस्थे लिप्पागोम्पायां लामादेवराम: प्रसिद्ध: भोटज्योतिषी आसीत्। अनेन ज्ञायते यत् भोटजनेष्वपि ज्योतिषाध्ययनपरम्परा आसीत्। वस्तुत: वर्तमाने जना: शुभाशुभज्ञानाय अथवा शुभप्राप्त्यर्थम् अशुभपरिहारार्थं देवस्थलं प्रतिगच्छन्ति, यतोहि वर्तमाने मन्दिरेष्वेव ज्योतिषज्ञा: कर्मकाण्डज्ञाश्च उपलभ्यन्ते। ते एव वर्तमाने जनान् फलादेशं ज्ञापयन्ति तथा इष्टप्राप्त्यर्थम् धार्मिकानुष्ठानानां सम्पादनङ्कुर्वन्ति। एतेषु देवमन्दिरेषु कतिपयेषु ज्योतिषशास्त्रशिक्षणस्यापि व्यवस्था वर्तते। तेषु प्रमुखास्सन्ति-श्रीज्वालादेवीमन्दिरं, श्रीचामुण्डादेवीमन्दिरं, श्रीनयनादे-वीमन्दिरञ्चेति। प्राय: विगतद्विंशतवर्षेभ्य: केवलं देवमन्दिरसंस्थैव शास्त्राध्ययनाध्यापनसंरक्षणे च रता: आसन्निति। अत: ज्योतिषशास्त्रा-ध्ययनाध्यापने संरक्षणे च हिमाचलीयदेवमन्दिराणाम् अद्वितीया भूमिका वर्तते।

## सन्दर्भग्रन्था:


1. बृहत्संहिता
2. बृहत्पाराशरहोराशास्त्रम्
3. मानसार:
4. क्षीरार्णव:
5. बृहद्वास्तुमाला
6. अलौकिक हिमाचलप्रदेश ; जगमोहन बलोखरा
7. हिमाचल की लोककलाएं और आस्थाएं ; मौलूराम ठाकुर
8. देवमन्दिर-वास्तु


## पादटिप्पणी

1. क्षीरार्णव: 1,1-5
2. बृहत्संहिता प्रासादलक्षणाध्याय: 2
3. बृहत्संहिता प्रासादलक्षणाध्याय: 8
4. मानसार: 53-27
5. हिमाचल की लोककलाएं और आस्थाएं पृ. 70
6. हिमाचल की लोककलाएं और आस्थाएं 73
7. बृहत्पाराशरहोराशास्त्रम् सृष्टिक्रमवर्णनाध्याय: 1


*शोधच्छात्र:*

*केन्द्रियसंस्कृतविश्वविद्यालय:, वेदव्यासपरिसर:, हिमाचलप्रदेश:*

ISSN 2456-3420

# सुखमयगृहस्थजीवनाय वास्तुशास्त्रस्य उपादेयता

डॉ. मुकेशकुमारः

संसारेऽस्मिन् धर्मार्थकाममोक्षादिपुरुषार्थचतुष्टयद्वारा जीवन-साफल्यनिमित्तं सर्वेणापियतनीयमितिधर्मशास्त्राणि निगदन्ति। धर्माधारितं जीवनं जीवनीयं चेत् वेदादिशास्त्रेषु निरूपितानां सर्वेषां तत्वानाम् अङ्गीकारः कर्तव्यः इति आचार्यः मनुः ब्रवीति। तद्यथा- 'वेदोऽखिलो धर्ममूलं' इति। 'सर्वज्ञानमयो हि सः' इत्यभियुक्तवचनात् ज्ञायते यत् वेदास्तु सर्वविद्यानां सारभूताः सन्ति। तस्यैवाङ्गं वर्तते कालविधान-शास्त्रनाम्ना सुविख्यातं ज्योतिश्शास्त्रम्। ज्योतिषशास्त्रं जीवनस्य नित्यक्रियाणां यज्ञयागादिविशेषकर्मणां च साधनार्थं कालनिर्धारणक्रमं सूचयति। कालान्तरे इयं ज्योतिर्विद्या सिद्धान्तसंहिताहोरेतिस्कन्धेषु विभक्ता अभूत्। एतेषु संहितास्कन्धान्तर्भूतः वर्तते वास्तुशास्त्रम्।

वास्तुशास्त्रमिदं सुखमयगृहस्थजीवनस्य मूलमिति अस्माकं पूर्वजाः ऋषयः प्रतिपादितवन्तः। ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाख्यभारतीयसंस्कृतेः प्रधानभूतायां जीवनपरम्परायां सर्वाश्रमाणां मूलं गार्हस्थ्यं इति निरूप्यते। तद्यथा-

**वानप्रस्थो ब्रह्मचारी यतिश्चैव तथा द्विजः।**
**गृहस्थस्य प्रसादेन जीवन्त्येते यथाविधिः।**
**गृहस्थ एव यजति गृहस्थस्तप्यते तपः।**
**ददाति च गृहस्थस्त तस्याच्छ्रेयो गृहाश्रमी।।** इति

गृहस्थपदस्य अर्थो वर्तते गृहे स्थितः इति। गृहं विना गृहस्थस्य न कापि क्रिया सिद्ध्यति अत एवोक्तं-'गृहस्थस्य क्रियाः सर्वाः न सिद्ध्यन्ति गृहं विना' इति। गृहरचनायाः आवश्यकताविषये इदमप्युच्यते-

**स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदं**
**जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम्।**
**वापीदेवह्लदादिपुण्यमखिलं गेहात्समुत्पद्यते**
**गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः।।**

गृहनिर्माणेन नानाविधपुण्यप्राप्तिरपि सम्भवति इत्यतः गृहरचनार्थं वैदिककालादेव ऋषयः उपदेशमकुर्वन्। गृहं कुत्र करणीयम्? कया रीत्या च करणीयमिति बहुविधानां प्रश्नानामुत्तररूपेणैव ऋषिभिः वास्तुशास्त्रस्य रचना विहिताः।

किं नाम वास्तु? किञ्च तत्स्वरूपमिति प्रश्ने समुद्भूते तत्समाधानं शब्दशास्त्रविज्ञातारः इत्थं प्रदर्शयन्ति-

'वसन्ति प्राणिनो यत्र तद्वास्तु' इति व्युत्पत्तिः। निवासार्थकात् वस् धातोः तुण्प्रत्ययेन वास्तुपदमिदं सिद्ध्यति। अस्य शाब्दिकार्थं गृहस्थानम् अर्थात् भवनम्, भूखण्डः गृहमावासः निवासभूमिर्वा सिद्ध्यति। संस्कृतशब्दार्थकौस्तुभानुसारं यस्यां भूमौ किमपि भवनं स्यात् तत्स्थानम् अथवा गृहनिर्माणयोग्यभूमिरपि वास्तु इत्युच्यते। भूमौ देवानां वासकारणादेव वासयोग्या भूमिः वास्तु पदेनाभिधीयते इति मत्स्यपुराणवचनम्। वाचस्पत्य-शब्दकल्पद्रुम-अमरकोष-शब्दार्थभानु-इत्यादिषु कोषग्रन्थेषु वासयोग्यभूमिः आहोस्वित् गृहनिर्माणार्थं योग्यभूमिरेव वास्तुपदेन निरूपिता वर्तते।अन्ततो वासयोग्यभूमौ वासयोग्यगृहरचनासम्बद्धानां नानाविषयानां विविधतत्त्वानां च सूक्ष्मतया विवेचनं वास्तुशास्त्रस्य प्रधानकार्यमिति सिद्ध्यति।

वास्तुशास्त्रीयग्रन्थेषु वास्तुपदस्य यद्व्याख्यानं क्रियते तदत्र क्रमशः निरूप्यते-

यत्र देव-मनुष्य-गो-गज-अश्वादयो प्राणिनः निवसन्ति तद्वास्तु इति विश्वकर्मवास्तुशास्त्रभणितिः। देवानां मनुष्यानां च निवासस्थलमेव वास्तु इति मयमत-मानसारग्रन्थयोः मतम्। कौटिल्यार्थशास्त्रानुसारं गृहक्षेत्रं, वाटिका, बन्धः, सेतुः, विविधप्रकारकभवनानि, तडागवाप्यादि-सर्वाण्यपि वास्तुनि एव अन्तर्भवन्ति। एतेषां ग्रन्थानाम् अवलोकनेन स्फुटं प्रतिभाति यत् वास्तुपदं केवलं मानववासयोग्यभवनाय एव न प्रयुज्यते अपि तु मानवस्य सुव्यवस्थितेन सुखमयजीवनेन सह सम्बद्धानां सर्वेषामपि तत्त्वानां यथा ग्राम-नगर-मार्ग-राजभवन-मन्दिर-मण्डप-यज्ञवेदी-सभागृह-कूप-वापी-विद्यालयादि-विषयाणामपि समावेशः वास्तुनि एव भवेदिति।

वास्तुशास्त्रेऽस्मिन् वासयोग्यगृहाणां देवालयानां राजप्रासादानाम् अन्यावश्यकभवनानां सुव्यवस्थिततया निर्माणस्य सर्वे विधयः सूक्ष्मातिसूक्ष्मरूपेण प्रतिपाद्यन्ते। भवनरचनेयं वास्तुपदेनाभिधीयते। कस्यापि वास्तुरचनायाः कृते आवश्यकतत्त्वानि क्रमशः शास्त्रेऽस्मिन् निरूप्यन्ते। तद्यथा- भूमिचयनम्, भूमिपरिशोधनम्, दिक्साधनम्, गृहस्वरूपनिश्चयः, गृहरचनायै आवश्यककाष्ठादिचयनम्, वास्तुपदरचना, गृहद्वारस्तम्भालिन्दादीनां स्वरूपम्, शिलान्यासविधानम्, विविध-प्रकारकशालानिर्माणक्रमः गृहप्रवेशविधानादिकम्।

मानवस्य सुलभजीवनव्यवहारं सूक्ष्मतया अवलोक्यैव प्राचीनाः महर्षयः व्यवस्थितगृहनिर्माणाय कांश्चन परमवैज्ञानिकसिद्धान्तान्

नैकग्रन्थेषु निरूपितवन्तः। वास्तुशास्त्रमिदं न केवलं वैज्ञानिकपक्षानाधारीकृत्य प्रवर्तते अपितु पूर्णतः धार्मिकम् आध्यात्मिकं दार्शनिकस्वरूपमपि अवाप्य समग्रमानवजातेः किं वा समग्रजगतः प्राणिनां सुखमयजीवनमार्गं प्रशस्तीकरोति। पूर्णतः प्रकृतिसम्बद्धमानवाय गृहनिर्माणादिनिमित्तमपि प्राकृतिकान् एव सिद्धान्तान् ऋषयः न्यनिरूपयन्। तद्यथा- यत्किमपि भवनं निर्मीयेत यत्र सूर्यप्रकाशस्य शुद्धवायोश्च प्रवेशः सुगमतया स्यात्। मानवजीवनस्य प्रत्येकमपि दैनिककार्यसाधनाय उपयुज्यमानः कक्षः तत्कार्यस्य प्रकृत्याधारेण निश्चितदिशि एव भवेत् तद्यथा-आग्नेयदिशि अग्निकार्यसम्बन्धिपाकशाला निर्मातव्या इत्यादिकम्। एतैः व्यवस्थितप्राकृतिकसम्बन्धोपेते गृहे यः वसति निश्चयेन तस्य देह-मनो-बौद्धिकविकासः जायेत। सुख-शान्तिपूर्वकं च जीवनमयं गृहस्थः जीवेदिति। वास्तुशास्त्रीयसिद्धान्ताधारितं गृहं तद्गृहस्थं सकारात्मोर्जया आपूरयति नानाविघ्नव्याधीन् च निवारयति। धर्माधारितस्वकर्मरतः मानवः तां सकारात्मिकाम् ऊर्जां लब्ध्वा स्वजीवनं धन्यं कुर्यादित्येव वास्तुशास्त्रोद्भवलक्ष्यमपि वर्तते।

आधुनिकाः वैज्ञानिकाः अपि गृहरचनायाः वास्तुशास्त्रीयसिद्धान्तान् पूर्णतया मानवहिताय निरूपयन्ति। तद्यथा- गृहरचना पूर्णतया प्राकृतिकव्यवस्थानुरूपा भवति चेत् प्रकृतिप्रदूषणस्य समस्यायाः निदानं भवेत् सार्धमेव मानवः विविधानि जीवनभूततत्त्वानि विनापरिश्रममेव प्राप्नोति। तद्यथा- प्राच्यामुदीयमानस्य भास्करस्य प्रातःकालीनकिरणाः समग्रगृहं प्रविशन्ति चेत् तत्रस्थाः विटामिन-डी, एफ,ए तत्त्वं स्वत एव प्राप्नुवन्ति, यस्य प्रभावेन रक्तमाध्यमेन समग्रशरीरं व्याप्नोति। एवमेव भवनस्य पूर्वदिशः उत्तरदिशश्च क्षेत्रं उद्घटितं भवति चेत् व्यवधानं विना वायुप्रवेशः समग्रभवने भवति। एवमेव आग्नेयकोणे पाकशालानिर्माणस्य प्रमुखं कारणं पूर्वभागात् सूर्यकिरणानां प्रवेशेन दक्षिणक्षेत्राच्च वायुप्रवेशेन खाद्यपदार्थेषु अपि विटामीन-एफ्.डी. सम्मिलितं भवति। सूर्यांशुभिः परिशुद्धं भोजनं आरोग्यप्रदं भवेत्। उत्तरपूर्वक्षेत्रे जलस्त्रोतसां रचनया जलप्रदूषणस्य समस्यानिवारणं शक्यम् अत्रापि रविकिरणप्रभावात् इलेक्ट्रोमेग्नेटिकसिद्धान्तद्वारा सूर्यतापात् जलं शुद्धं भवति। इत्थं वास्तुशास्त्रोक्ताः सर्वेऽपि गृहरचनासिद्धान्ताः आधुनिकवैज्ञानिकैरपि समादृताः मानवकल्याणकारकाः सन्ति।

पूर्वोक्तान् वास्तुशास्त्रसम्बद्धविषयान् सूक्ष्मतया परिशीलयामश्चेत् शास्त्रमिदं प्रकृत्यनुरूपं जीवनयापनाय सुनिश्चितशिक्षां प्रददाति। तदर्थञ्च येषां वस्तूनाम् अपेक्षा वर्तते तेषां सुव्यवस्थितरूपेण प्राप्तये, पर्यावरणेन सार्धं समुचितसम्बन्धस्थापनाय, प्राकृतिकपञ्चमहाभूतैः सह मानवस्य विविधगतिविधीनां सामञ्जस्यार्थं प्रत्येकमप्यंशं बोधयन् शास्त्रमिदं प्राणिनां सुखमयं जीवनाय परमोपयोगी वर्तते इति।

## सन्दर्भग्रन्थसूची

1. बृहत्संहिता, सं. सुरकान्तझा, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी (2012)
2. बृहद्वास्तुमाला,डॉ. ब्रह्मनन्दत्रिपाठी, चौखम्बासुरभारतीप्रकाशन, वाराणसी, संस्करण-2003
3. मनुस्मृतिः,डॉ. श्रीमतीउर्मिलारूस्तगी, जे.पी. पब्लिशिंगहाऊस, 27/28शक्तिनगर, दिल्ली-7, संस्करण-2002
4. मयमतम्, सं. श्रीकृष्णजुगनू, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी (2008)
5. वास्तुसारसंग्रहः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी (2002)

## पादटिप्पणी

1. मनुस्मृतिः, 2.6
2. ज्योतिर्निबन्धः, 3.1
3. बृहदैवरञ्जनम्, पृ.सं. 6.3
4. बृहद्वास्तुमाला, 1.4
5. वाचस्पत्यम्, भाग-6, पृ. 4777

*सहायकाचार्यः, ज्योतिषविभागः,*
*सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,*
*डोहगी,ऊना, हिमाचलप्रदेशः*

ISSN 2456-3420

# वृद्धयवनजातके कालिदासस्य पूर्वकालामृते च यात्रादिशकुनविचाराः

डॉ. प्रदीप शर्मा

संस्कृतवाङ्मये नानाकवयः समभिदृश्यन्ते। तेषु कविषु महाकविकालिदासः अन्यतमः। कालिदासः नाट्यकारः साहित्यिकश्च आसीत्। अस्य कालिदासस्य समयः ख्रीष्टपूर्वषष्ठः शतकः आसीदिति प्रमाणमुपलभ्यते। अयं कालिदासः विक्रमादित्यस्य सभां भूषयामास। विक्रमादित्यस्य सभायां न केवलं कालिदासः अपितु धन्वन्तरिः, क्षपणक, अमरसिहः, शङ्कुः, वेतालभट्टः, घटकर्परः, वराहमिहिरः, वररूचिः इत्येते नव नव पण्डिताः, स्थानं समलञ्चक्रुः। यथोक्तं ज्योतिर्विदाभरणे-

**धन्वन्तरिः क्षपणकमरसिंह शङ्कु**
**वेंतालभट्टघटखर्पर कालिदासाः ।।**
**ख्यातो वराहमिहिरो नृपतेः सभायां ।**
**रत्नानि वै वररुचिर्नव विक्रमस्य ।।** (ज्यो.वि -22/10)

विक्रमादित्यस्य सभायां नवसुधियः आसन्-ते स्वस्वशास्त्रे निष्णाताः आसन्। किन्तु तेषां सर्वेष्वेव शास्त्रेषु गतिः आसीत्। यथा काञ्चनसंसर्गेण काचोऽपि सुवर्णायते तथैव वराहमिहिरस्य संसर्गेण कालिदासोऽपि ज्योतिषशास्त्रमर्मज्ञः सञ्जातः। असौ महाकविः कालिदासः स्वजीवनावधौ कुमारसम्भवरघुवंशः इति महाकाव्यद्वयं, मेघदूतम् ऋतुसंहारम् इति खण्डकाव्यद्वयम्, अभिज्ञानशाकुन्तलं, मालविकाग्निमित्रं विक्रमोर्वशीयम् इति नाटकत्रयं च अरचयत्। अस्य कालिदासस्य महाकाव्येषु ज्योतिषशास्त्रसम्बन्धिनः नैके विषयाः सन्दृश्यन्ते। तत्र तावत् कुमारसम्भवे प्रथमसर्गे पार्वत्याः यौवनवर्णन-प्रसङ्गे या वर्णना कालिदासेन कृता सा एव ज्योतिर्विदाभरणे ऋतुमतीनां स्त्रीणां दृश्यते। तत्र कुमारसम्भवस्य पंक्तिः इत्थं भवति यथा-

**दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा।**
**पुपोष लावण्यमयान्विशेषाञ्ज्योत्स्नान्तराणीव कलान्तराणि।।**

(कु.सं 1/15)

ज्योतिर्विदाभरणे मुहूर्तसंस्कारादीनां चर्चा कविना बहुधा कृता। तथैव कुमारसम्भवेऽपि संस्कारैः मानवाः संस्कृताः भवन्ति इति व्यञ्जयति। तद् विषये स्वमतं कालिदासः इत्थं प्रतिपादयति कुमारसम्भवे महाकाव्ये-

**प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः।**
**संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च।।**

(कु.स. 1/18)

एतेभ्यः प्रमाणेभ्यः स्पष्टं प्रतिभाति यत् ज्योतिर्विदाभरणस्य ग्रन्थस्य यः रचयिता स एव कालिदासः काव्यनाटकादीनां कर्ता भवेदिति निःसन्देहेन वक्तुं पार्यते। यतो हि कालिदासेन ज्योतिर्विदाभरणे स्वयमेवोक्तं यत्-

**शंक्वादिपण्डितवराः कव्यस्त्वनेके**
**ज्योतिर्विदः सम्भवश्च वराहपूर्वाः।**
**श्रीविक्रमार्कनृपसंसदि मान्यबुद्धि-**
**स्तैरप्यहं नृपसखा किल कालिदासः।।**
**काव्यत्रयं सुमतिकृद्रघुवंशपूर्वं**
**पूर्वं ततो ननु कियच्छ्रुतिकर्मवादः।**
**ज्योतिर्विदाभरणकालविधानशास्त्रं**
**श्रीकालदासकवितो हि ततो बभूव।।**

(ज्यो.वि.-22. 19-20)

यद्यप्ययं ज्योतिर्विदाभरणाख्यं ज्योतिषशास्त्रग्रन्थं रचितवान् तर्हि स एव कालामृतम् इत्येतं ग्रन्थं नूनं कृतवान् स्यात्। अतः स एव कालिदासः वराहमिहिरस्य समकालिकः ज्योतिर्विदाभरणं कालामृतमित्यनयोः द्वयोः ग्रन्थयोः रचयिता आसीत् इति ज्ञायते। पूर्वकालामृते कालिदासेन मुहूर्तविचारः, संस्कारविचारः, वास्तुविचारः, यात्राशकुनविचारः प्रभृतिः विषयाः समुपस्थापिताः। यवनदैवज्ञेषु मीनाराजेनापि वृद्धयवनजातके यात्राशकुनविषये प्रतिपादितम् अस्ति। ज्योतिर्विदां मतमिदं यत् ज्योतिषस्य न केवलं त्रय एव स्कन्धा अपितु अस्य पञ्चस्कन्धा इति। यथा-

**पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिताः।**
**केरलिः शकुनञ्चेति ज्योतिः शास्त्रमुदीरितम्।।**

(ज्योतिर्निबन्धावली)

शकुनशास्त्रं पूर्वजन्मकर्मणः शुभाशुभफलं सूचयति। तदुक्तं हि यथा वृद्धयवनजातके-

**प्राग्ब्रह्मणा प्रोक्तमनेकरूपं यच्छाकुनं पूर्वजकर्मसाक्ष्म्।**
**तन्मीनराजो यवनाधिराजः समासतः सारतरं चकार।।**

(वृ.य जा 67/1)

कालिदासस्य पूर्वकालमृते मीनराजस्य वृद्धयवनजातके च यात्राशकुनविचारेषु कुत्रचित् समता उपलभ्यते किञ्च पूर्वकालामृते कालिदासेन यात्राशुकनविषये विशिष्टरूपेण प्रतिपादितं यत्र भेदाःदृश्यन्ते।

1. शकुनविचारस्यावश्यकता ।
2. यात्राकालिकशुभशकुनम्।

3. क्रोष्टुरूतशकुनम्।

4. गोक्षुतम्।

5. काकरूतस्य फलम्।

इत्यादिविषयेषु समता दृश्यते। पूर्वकालामृते कालिदासेन यात्रातिथिवारनक्षत्रनिर्णयः वारनक्षत्रशूलनिर्णयः, द्वादशलग्नेषुगमनफलम्, यात्रापञ्चकशुद्धिस्वरूपं गमनवर्ज्यकालः, सूर्यचन्द्रनाडीनिर्णयः, पल्लिवाक्पतनयोः फलं प्रभृति विशेषरूपेण प्रतिपादिताः।

यात्रास्त्रिप्रकारकाः भवन्ति। प्रथमा धार्मिकयात्रा, यस्या विचारः नवमस्थानात् क्रियते। द्वितीया नित्ययात्रा (रेलयान-पद-मोटरयानेषुयात्रा) यस्याः विचारः सप्तमात्-तृतीयाच्च क्रियते। तृतीया विशेषप्रकारका जलयात्रा, समुद्रयात्रा, यस्याः विचारः तृतीय- सप्तम-अष्टम-द्वादश स्थानेभ्यः क्रियते। आधुनिककाले चतुर्थप्रकारकः यात्रा-वायुयात्रा विमानयात्रा। अपि प्रचलति यस्याः विचारः लग्न-तृतीय-दशम्-द्वादशभावेभ्यः क्रियते।

यात्राकाले प्रश्नवशात् जातकवशाच्च शुभाशुभं विज्ञाय यात्रार्थं प्रवर्तेत। प्रश्नलग्ने यात्रालग्ने वा शुभग्रहाणां दृष्टौ अथवा योगे, ताराचन्द्रबलान्विते, मङ्गलगीतवाद्यादिध्वनिभिः रम्यशकुनै सह शुभदिने, पञ्चाङ्गशुद्धिदिवसे दैवज्ञोक्तशुभमुहूर्ते प्रश्नकर्ता यात्रां व्रजेत्। अतः उच्यते कालिदासेन पूर्वकालामृते यात्राप्रश्ने षष्ठाष्टद्वादश-भावेषु अन्यतमः स्थितः चन्द्रः यदि शुभग्रहैरदृष्टः तर्हि यात्रायां विघ्नो भवति। लग्नगतः अथवा अष्टमभावगः पापग्रहः अशुभफलदायको भवति। अशुभः बलवान् चेत् विशेषेण अशुभं भवति। प्रश्नलग्ने एकः शुभग्रहः धनदायकः, द्वौ शुभग्रहौ रत्नस्त्रीपशुभूमिसुखदायकौ भवतः।

यात्रालग्नात् सप्तमे शुभग्रहः स्यात् तदा सः सुखं धनं च प्रापयति। द्वितीये लग्नात् तृतीये शुभश्चेत् मित्रकारकः भवति येन पुत्रबन्धूनां साहाय्यमपि लभ्यते। चतुर्थस्थः शुभग्रहः यात्रायां सुखं शान्तिं च प्रयच्छति। दशमगतः शुभः सत्कार्येषु साफल्यं करोति। नवमगतः शुभग्रहः क्षेत्र-आयुर्धनानां वृद्धिं च सूचयति एकादशे शुभाशुभो वा ग्रहः साफल्यमेव ददाति। पूर्वोक्तस्थानेषु पापग्रहाणां स्थितिवशात् विपरीतफलानि भवन्ति।

**यात्रातिथिवारनक्षत्रनिर्णयः -**

रिक्तातिथयः (4,9,14) पञ्चपर्वाणि नाम-अमावस्या-पूर्णिमा संक्रान्ति तथा ग्रहणदिनानि, भद्रायां षष्ठाष्टमद्वादशीषु तिथिषु भौमशनिरविवासरेषु यात्रा वर्ज्या। परं हस्तपुनर्वसुश्रवणधनिष्ठारेवतिमृग-शिराश्विनीपुष्यानुराधा नक्षत्रेषु यात्रा शस्ता भवति। उक्तञ्च-

**रिक्तापर्व दिनादि विष्टि तिथयः षष्ठाष्टमी द्वादशी।**
**वर्ज्या भूमिजभानुपुत्रदिनकृद्वाराश्च यात्राक्षणे।।**

(पू.का.5/5)

**वारनक्षत्रशूल निर्णयः-**

सोमशनिवारयोः ज्येष्ठानक्षत्रे च पूर्वदिशं, गुरुवासरे पूर्वाभाद्रपदान-क्षत्रे च दक्षिणदिशं, शुक्ररविवारयोः रोहिणीनक्षत्रे च पश्चिमदिशं भौमबुधवासरयोः पुष्यनक्षत्रे च उत्तरदिशं व्रजति चेत् प्रयाणं रोगकृद् भवेत्।

**कालिदासेन द्वादशलग्नेषु गमनफलमपि उक्तं यथा-**

**मेषे भद्रमवाप्नुयाद् गवि सुखं युग्मे मृतिं कर्कटे**
**लाभं शोकभयं हरौ ज्वरभयं कन्यागृहेऽर्थं धटे।**
**कीटे विग्रहमेव चापनिलये क्षेमं मृगे स्त्रीधनम्**
**कौटिल्यं कलशे तु भोजनसुखं मीने प्रयाणेऽध्वगः।।**

(पू.का.5/9)

मेषलग्ने प्रयाणं मंगलं ददाति,वृषलग्ने सुखं, मिथुनलग्ने मृतिं, कर्कटे लाभं, वृश्चिके विरोधं, धनुर्लग्ने क्षेमं, मकरे स्त्रीधनं कुंभे कौटिल्यं,मीने भोजनसुखं च ददाति।

**कालिदासेन गमनवर्ज्यकालविषये उक्तं यत्-**

स्वस्यगृहस्य दाहे सति, कलत्रेणसह कलहे, भार्यायां रजस्वलायां, आरब्धे शुभकार्ये, सम्प्राप्ताशौचे, जन्ममासादष्टमेमासि, स्वभार्यायां गर्भान्वितायामपि यात्रां विवर्जयेत। पितुर्मरणात् एकसम्वत्सरपर्यन्तमपि यात्रा निषिद्धा।

**इतोऽपि यात्राकाले सूर्यचन्द्रनाड़ी निर्णयविषये उक्तं यत्-**

नासायाः यो दक्षिणभागः तत्र जातो यः वायुः सः सूर्याख्यः। सः युद्धव्यापारमिथुनकर्मराजभयमंगलस्नान अन्नसग्रहे पराजयपीडासु शुभप्रदः भवति अन्या नाड़ी नासावामभागजात वायुः चन्द्रसम्बन्धी नाड़ीत्युच्यते। सा नाड़ी गमनालङ्कार-विवाहे कृषिकर्मसु च शुभाभवति। यद्भागेवायुचलनं भवति तत्पादेन पूर्वं व्रजेत।

**यात्रायां शुभशकुनानि-**

भारद्वाज, मयूर, गौरैया, नकुलाः मुख्याः सन्ति। किञ्च काकदयः ते अमुख्याः सन्ति तेषां ऊर्ध्वगतिः दक्षिणगतिश्च सम्यक् भवति। पुनश्च एतेषु एकाकी कोऽपि गच्छति चेत् शुभदायकं भवति। श्रृगालः, कुक्कुटः, शुनकः एतेषां तु वामगतिः अर्थदा भवति।

**पल्लीवाक्यपतनयोः विषये कालिदासेन विशेषतयाः उक्तं यत्-**

गृहगोधिका याः रूतः प्रागाद्यष्टदिक्षु श्रोतुः क्रमेणभाग्यादिफलं भवति यथा-प्राच्यां भाग्यकृत्, आग्नेय्यां श्रीकृत्, दक्षिणस्यां जयकृत्, नैऋत्या युद्धकृत्, प्रतीच्यां लाभकृत्, वायव्यां गमनकृत्, उदीच्यां क्षेत्रकृत्, ईशान्यां कष्टकृत्-भूमौ पीडाकृत्, स्वोर्ध्वभागे चेत् अर्थकृत् श्रोतुरिति भवति।

पल्लीपतनं शिरसि भवति चेत्-लक्ष्मीं, कण्ठे बन्धुलाभं, उदरे पुत्रलाभं, पार्श्वे कुक्षौ सन्तोषं, कटयां वाहनं, पादे अर्थलाभं ददाति। एते सर्वे विषयाः मीनराजस्य वृद्धयवनजातके न प्राप्यन्ते। नाम वयं

ISSN 2456-3420

वक्तुं शक्नुमः यत्ः यवनकाले एतेषु विषयेषु महत्वं नासीत्।

**वृद्धयवनजातके क्रोष्टुरूतफलविषये उक्तं यत्-**

प्रयाणकाले सृगालिका याम्यदिशि शब्दं करोति चेत् तदा मृत्युः धनहानिः, अनिष्टफलञ्च भवति। उक्तञ्चः-

**सृगालिका यस्य करोति शब्दं चाम्यस्थिता यानविधौ नरस्य।**
**तस्यार्थ हानिर्मरणं त दुःखं भवेदनिष्टं फलमेव कृत्स्नम्।।**

(वृ.य.जा 67/27)

कालिदासेनाऽपि क्रोष्टुरुतफलविषये तथैव उक्तं वर्तते। गोक्षुतविषये मीनराजेन प्रतिपादितं यत्-प्रयाणकाले गोक्षुतं प्राणनाशनं भवति।

कालिदासेन पूर्वकालामृते उक्तं यत्-मृत्युस्सदा गोक्षुतं वृद्धयवन-जातके मीनराजेन काकरूतस्य यत् फलम् उक्तं तदैवं कालिदासेनापि पूर्वकालामृते प्रतिपादितम्। किञ्च वृद्धयवनजातके मीनराजेन काकरूताध्याये काकशकुनादिविषये भूमिस्थितकाकस्यशुभाशुभफलं रात्रिकाकरूतफलं मृत्यतुल्यकष्टकरम् इत्यभिहितम्। काकेन शिरस्पर्शः बन्धुनाशकम् इति चोक्तम्। काकस्य नीडवशात् शकुनमपि उत्तमरीत्या प्रतिपादनं कृतम्।

शकुनं स्वतः भवति चेत तदा एव तस्य प्रभावः भवति। प्रयाणकाले शकुनस्य बहुमहत्त्वं विद्यते।

**वृद्धयवनजातके उक्तं यत्-**

प्रयाता शुद्धमनसि, शुभदिने, शुभमुहुर्ते शुभशकुने च प्रयाणं करोति चेत् समस्तवैभवं,यशः प्राप्य शत्रून् हत्वा प्रत्यागच्छति इति।

**शकुनस्य महत्त्वं मीनराजः प्रतिपादयति यत्-**

यथा देवेषु विष्णु श्रेष्ठो भवति, नदीषु गंगा श्रेष्ठा भवति, मनुष्येषु ब्राह्मणः श्रेष्ठः भवति, तथा सूचकपदार्थेषु शकुनं श्रेष्ठम् भवति। उक्तञ्च-

**यथा सुराणां प्रवरो मुरारिर्गङ्गा नदीनां द्विपदां च विप्रः।**
**तथा प्रधानः शकुनः प्रदिष्टो वाक्यम्भवो गर्गपराशरादैः।।**

(वृ.य.जा 67/5)

इतोऽपि शकुनविषये जगति अन्धविश्वासस्य भावना प्रस्फुटिता परं न इदं समीचीनम। मीनराजेन तु मनोवैज्ञानिककारणमपि उक्तं यथा-

**मनोविशुद्धिःसकलस्य मूलं नीतिर्यथा सद्विभवस्य पुंसाम्।**
**तस्माद्धि शुद्धया मनसःप्रकार्यं कृत्यं विशेषेण विदेशयानम्।।**

(वृ.य.जा 67/2)

कालिदासेन पूर्वकालामृते, बाल्मीकिना रामायणे, व्यासेन पुराणेषु शकुनानां शुभाशुभं प्रतिपादितम्। ज्योतिषशास्त्रे अशुभशकुनस्य परिहारविषयाणां वर्णनं प्राप्यते। अतः वयं वक्तुं शक्नुमः यत् कालिदासः उत्तमः दैवज्ञः आसीत् येन कालामृते सम्यक् आधुनिकसमाजकल्याण-कारिशकुनविषयाः प्रतिपदिताः।।

इति शम्।।

**सन्दर्भग्रन्थाः**


1. कालामृतम्-कालिदासविरचितम्
2. वृद्धयवनजातकम्-आचार्यमीनराजविरचितम्
3. वृहतसंहिता-श्रीवराहमिहिरेण विरचिता।
4. ज्योतिर्विदावरणम्-कालिदासविरचितम्।
5. रघुवंशम्-कालिदासविरचितम्।
6. कुमारसम्भवम्-कालिदासविरचितम्।



*सहायकाचार्यः (अतिथि)*
*केन्द्रियसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, हिमाचलप्रदेशः*

ISSN 2456-3420

# प्रश्नलग्नधारेण निमित्तशकुनाधारेण च वृष्टिज्ञानम्

वैजयन्ती माला

**शोधसारांशः**-वृष्टिसंसूचने यानि वैज्ञानिककारणानि गर्ग-पराशर-कश्यप- वशिष्ठ-नारदादिमनीषिभिः प्रतिपादितानि तानि सर्वाणि अद्यतनीय महघवैज्ञानिकोपकरणेभ्यः सरलानि अल्पव्ययसाध्यानि च सन्ति। यत्राधुनिकवैज्ञानिकैः वर्तमानपरिस्थित्याधारेण वर्षणं विचार्यते, तत्र षड्मासपूर्वमेव वायोः आधारेण, मेधाधारेण, ग्रहस्थित्याद्याधारेण च वृष्ट्याः भविष्यवाणी आचार्योपदिष्टदिशा कर्त्तुं शक्यते। एतेषु अपरौ आधारौ वर्तेते प्रश्नलग्नाधारः, निमित्त-शकुनाधारश्च। प्रश्नलग्नाधारेण, निमित्त-शकुनाधारेण च प्राचीनाचार्यैः अतिसारल्येन वृष्टिज्ञानं कथं कर्तुं शक्नुवन्ति स्म तदैव अस्मिन् शोधपत्रे प्रस्तूयते।

**शोधपत्रम्**-वेदिककालिकज्योतिषादारभ्यः अद्यावधी पर्यन्तं ज्योतिषशास्त्रस्यनैका: भेदा: अभवन्। परञ्च मुख्यरूपेण शास्त्रमिदं स्कन्धत्रयात्मकं वर्तते, सिद्धान्तसंहिताहोराश्च। सिद्धान्ते ग्रहगणितविषयाः, संहितायां शकुनादिनां विवेचनं, होरास्कन्धे जन्मकुण्डल्याधारितशुभा-शुभफलानां विवेचनं भवति। केषाञ्चितमतमिदं यत् ज्योतिषं न केवलं स्कन्धत्रयात्मकम् अपितु शास्त्रमिदं पञ्चस्कन्धात्मकमिति, सिद्धान्त-संहिताहोराकेरलिशकुनञ्च। परञ्च प्राचीन कालादारभ्यार्वाचीनकालं यावद् मुख्यतया स्कन्धत्रयस्यैव गणना आचार्यैः कृता। अन्याः भेदाः त्रिस्कन्धेष्वेव अन्तरभूताः भवन्ति। यथा-

सिद्धान्तस्य-सिद्धान्त-तन्त्र-करणश्च

संहितायाः-वास्तु-शकुन-मूहर्तश्च।

होरास्कन्धस्य-जातक-ताजिक-प्रश्न-स्वपन-रमलादिश्च।

**प्रश्नशास्त्रम् नाम किम्**-यत्र प्रश्नलग्नमाश्रित्य फलादेशः क्रियते तत्प्रश्नशास्त्रम्। प्रश्नग्रन्थाश्च प्रश्नमार्ग-प्रश्नतन्त्रम्-प्रश्ननारदी-प्रश्नज्ञानम्-प्रश्नमाणिक्यमाला-प्रश्नचण्डेश्वर-प्रश्नसारादयः सन्ति। इदं तत्काल-फलादेशात्मकं शास्त्रमस्ति। यत्र प्रश्नकर्तृणाम् उच्चारित-अक्षरोपरि फलस्य प्रतिपादनं क्रियते। अस्मिन् शास्त्रे प्रश्नाक्षर-सिद्धान्तः, प्रश्नलग्न-सिद्धान्तः, स्वरविज्ञान-सिद्धान्तः, इति त्रयाणां सन्निवेशो भवति। अस्मिन् शास्त्रे चर्चा, चेष्टा, हाव-भावादि माध्यमेन मनोगत-भावानां वैज्ञानिक-दृष्ट्या विश्लेषणं कृत्वा फलादेशः क्रियते।

*** तात्कालिकप्रश्नकुण्डल्यां चन्द्रस्थितिवशात् वृष्टिज्ञानम्**-

कृष्णपक्षे वृष्टिप्रश्ने सति तात्कालिककुण्डल्यां जलचरराशिषु (कर्क-वृश्चिक-मीनेषु) स्थितः चन्द्रः लग्ने स्यात् तदा वृष्टियोगः भवति। एवमेव शुक्लपक्षे वृष्टिप्रश्ने सति जलचरराशिषु (कर्क-वृश्चिक-मीनेषु) स्थितश्चन्द्रः केन्द्रेषु (1-4-7-10) स्यात् तदापि वृष्टियोगः भवति । वनमालायां नारदसंहितायाञ्चाप्युक्तम्-

**वर्षाप्रश्ने वारिभेऽब्जे पूर्णे वै लग्नगेऽपि वा।**
**केन्द्रगे वा शुक्लपक्षे चातिवृष्टिः शुभेक्षिते॥**

एतयोः उभयोः योगयोः यदा प्रावृट्काले चन्द्रः शुभग्रहदृष्टः भवेत् तदा अतिशीघ्रं प्रचुरवृष्टिः भवति। यदा पापग्रहदृष्टः भवेत् तदा अल्पवृष्टयेव भवति। सामसंहितायामप्युक्तम्-

**वर्षाप्रश्ने प्रावृषि जलराशौ कण्टके शशी बलवान्।**
**भृगुजो वा शुभदृष्टो बहुजलकृत् स्वल्पदः पापैः॥**

भुवनदीपके अप्युक्तं यदा विवाहलग्ने दशमभावे शुभग्रहः भवेत् तदा विवाहकाले वृष्टिः भवति। लग्ने यदा शुभग्रहत्रयं भवेत् तदा मध्वी वृष्टिर्भवति।

**प्रश्नकालस्य लक्षणाधारेण वृष्टिज्ञानम्**-प्राश्निकः जलार्द्रं द्रव्यम् अथवा जलपूर्णं घटं स्पृष्ट्वा, जलासन्ना-गतः अथवा अम्बुकार्योन्मुखः प्रश्नं पृच्छति चेत्तदानीं शीघ्रमेव वृष्टिर्भविष्यति। वराहाचार्येणाप्युक्तम्-

**आर्द्रं द्रव्यं स्पृशति यदि वा वारि तत्संज्ञकं वा तोयासन्नो**
**भवति यदि वा तोयकार्योन्मुखो वा।**
**प्रष्टा वाच्यः सलिलमचिरादस्ति निःसंशयेन पृच्छाकाले**
**सलिलमिति वा श्रूयते यत्र शब्दः॥**

प्राश्निकः यस्मिन् घट्यां प्रश्नमकरोत्, तां घटीं द्विगुणितं कृत्वा गुणनफले त्रिसंख्यातः भागं कुर्यात्। शेषफलं यदा 1,2,3,0 भवेत् तदा क्रमशः शीघ्रवृष्टिः, विलम्बेन वृष्टिः, दूरस्थस्थाने च वृष्टिः भवतीति।

**निमित्तशास्त्रम्-शकुनशास्त्रशम् नाम किम्**-अस्य शास्त्रस्य विषयसीमायां प्रत्येक-कार्यस्य पूर्वं शुभाशुभयोः ज्ञान-प्राप्तिः मुख्यं लक्ष्यं वर्त्तते। तत्र पशुपक्षिमनुष्यादीनां हावभाव-चेष्टादिभिः प्राकृतिक-परिस्थितिवशेन च परीक्षणं शुभाशुभफलज्ञानाय भवति।

**निमित्तवशात् वृष्टिज्ञानम्**-यदा आकाशं तित्तिरपत्रवर्णीयं दृश्यते, अथ च पक्षिसमूहाः शब्दायमानाः भवन्ति तदा सूर्योदयास्तकालिकाः मेघाः शीघ्रमेव जलमुत्सृजन्ति। अत्रायं विशेषः यत् उदयकाले दृश्यन्ते तदा दिवा वृष्टिः, अस्तकाले दृश्यन्ते चेत् रात्रौ वृष्टिः भवतीत्यर्थः। अयमेव विचारः वनमालायामपि निरूप्यते-

**तित्तिरच्छदनिभं गगनं वा पक्षिणोऽपि मुदिताः प्रलपन्ति।**
**उद्गमास्तसमये सवितुश्चेदादिगन्तमतुला जलवृष्टिः॥**

वृष्टिकाले यदि वायुः न वाति, सूर्यः प्रचण्डकिरणैः उदेति, मीनाः समूहं निर्माय तटस्थभूमौ आयान्ति, जले मण्डूकाः कोलाहलं कुर्वन्ति तदा बुधजनाः अत्र समन्ततः अचिरादेव वृष्टिं निरूपयन्ति। यदा मण्डूकाः पश्चिमदक्षिणदिशोः कूर्दनं कुर्वन्ति तदा शीघ्रमेव वृष्टिर्भवति। यदा जलं रसरहितम् अनुभूयते, मेघाः काकाण्डसदृशाः, दिशः निर्मलाः, लवणे विकारः, वायोः निरोधः, मत्स्यानां शुष्कक्षेत्रेष्वागमनं, मण्डूकानां पुनःपुनः शब्दकरणम् इत्यादीनि लक्षणानि दृश्यन्ते तदा अवश्यमेव वृष्टिः भवति इति। वनमालायामप्युक्तम्-

**दश दिशो विमला विरसं पयो भवति वा लवणं किल यद्दिने।**
**तदिह गोनयनाभमलं पयः पतति वायसकाण्डनिभं नभः॥**

वृष्टिकारकः एव अपरः अपि योगः इत्थं प्रतिपाद्यते वराहाचार्येण यत् यदा पिपीलिकाः स्वीयाण्डानि एकस्मान् स्थानात् अपरं स्थानं नयन्ति, सर्पाणां मैथुनं दृश्येत, सर्पाणां वृक्षावरोहणं तथा गोकूर्दनादीनि लक्षणानि दृश्यन्ते तदा शीघ्रमेव वृष्टिर्निपतति। यथोक्तं वनमालायाम्-

**उपघातमृते पिपीलिकानां महदण्डक्रमणं यदा तदाऽपि।**
**अहिरङ्घ्रिपमस्तकप्रचारी दिवसे वाऽथ भुजङ्गमव्यवायः॥**

यदा रात्रौ खद्योताः (स्वयं प्रकाशमानः जीवविशेषः) मेघसन्निकटं गच्छन्तः दृश्यन्ते तदा शीघ्रमेव वृष्टिर्भवति। कृकलासाः (गिरगिट) वृक्षेषु

संस्थिता: आकाशमेव निरीक्षन्ति, धेन्वादय: पशव: आकाशस्थं रविं पश्यन्ति तदा सद्य एव वर्षणं जानीयात्। यदि गवादयो पशव: गृहात् निष्क्रमणं न वाञ्छन्ति अपि च ते वारम्वारं कर्णौ पादौ च कम्पयन्ति तथा पशुवदेव कुक्कुरोपि चेष्टां करोति तदा सद्य एव वृष्टि: भविष्यतीति विजानीयात्। यदा लतावल्लीनाम् अभिनवपत्राणि ऊर्ध्वमुखानि स्यु:, पक्षिण: जलेन धूल्या पंकेन वा स्नानं कुर्वन्ति, कृमिजातय: सरीसृपा: तृणाग्रगता दृश्यन्ते तदा शीघ्रमेव वर्षणं भवतीति। यथोक्तं वनमालायाम्–

**भुवो रजसि पक्षिणो यदि लुठन्ति तोयागमे। नटन्ति च**
**शिखण्डिनो दिवि लपन्ति शब्दं पिका:।**
**लताऽपि गगनोन्मुखी कलितपुष्पगर्भा यदा। तदा भुवि**
**समन्ततो ददति वारि धाराधरा:॥**

**शकुनाधारेण वृष्टिज्ञानम्**–विविधशकुनाधारेणापि आचार्यवराहमिहिरादयो नैके संहितातज्ज्ञा: आचार्या: वृष्टिसूचकान् निर्णयान् निरूपितवन्त:। तद्यथा – वृक्षस्य कोटरे स्थित्वा काक: यदा दारुणशब्दान् करोति तदा महद्भयं भवति। यदा जलं दृष्ट्वा अथवा मेघशब्दानन्तरं काक: शब्दं करोति तदा वृष्टिसूचक: भवति। यदा क्षीरवृक्ष–अर्जुनवृक्ष–वञ्जुलवृक्षसमीपे, नद्या: पुलिनद्वये वा स्थित्वा काका: शब्दं कुर्वन्ति अथवा धूलिजलात् वा स्नानं कुर्यु: तदा वर्षर्तौ वृष्टि: भवति अन्यर्तुषु तु दुर्भिक्षं जायेत इति आचार्यकथनम्। यदि विडाला: पुन:पुन: भूमिं नखै: लिखन्त: दृश्यन्ते, लोहानां मलभण्डार: मांसवद्गन्धयुक्त: स्यात्, मार्गे बालैर्निर्मिता: सेतुबन्धा: दृश्यन्ते तदा शीघ्रमेव वृष्टिर्भविष्यतीति विज्ञेयम्। अयमेव विषय: वनमालायाम् इत्थं निरूप्यते–

**लिखन्तो वसुधामुच्चैर्विडाला: स्वनखैर्यदा।**
**सेतुबन्धाश्च रथ्यायां वाजिनो बालनिर्मिता:॥**
**लौहानां मलगन्धाश्च पर्वता: कज्जलोपमा:।**
**कन्दरा वाष्पसंरुद्धा: भवन्तीह जलप्रदा:॥**

एवं प्रकारेण प्रश्नलग्नमाध्यमेन निमित्त–शकुनमाध्यमेन च वृष्टिज्ञानं प्राचीनाचार्यै: प्रतिपादितम्। अत्र मात्र न्यूनाणां वृष्टिसम्बन्धि–योगाणां विवेचनं कृतम्। एतदतिरिच्य अपि वृष्टि–सुवृष्टि–अल्पवृष्टि–खण्डवृष्टि–अनावृष्टि–अतिवृष्ट्यादिविषये बहूनां योगाणां विवेचनम् आचार्यै: विहितम्। येषामध्ययनं प्रचलन् अस्ति।।

**निष्कर्ष:**–वर्तमानकाले आधुनिकवैज्ञानिकै: परमसङ्गणकेन (Super Computer) सह विभिन्नाधुनिकोपकरणानां (थर्मामीटर–बैरोमीटर–एनीमोमीटर–उपग्रहप्रौद्योगिकी–डेप्लर रेडार–रेनगॉगादिनां) प्रयोग: क्रियते। परञ्च प्राचीनकाले उपर्युक्त प्रतिपादितयोगाधारेण एव आचार्यै: वृष्टिज्ञानं कुर्वन्ति स्म। वर्तमानकाले एतेषां योगाणां समीक्षात्मकं प्रायोगिकम् अध्ययनम् अनुसन्धानञ्च अवशिष्टं वर्तते।

## पादटिप्पणी

1. सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्। वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमकल्मषम्''॥
2. ज्योति: शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम्। तत्कार्त्स्न्योपनयस्य नाममुनिभि: सङ्कीर्त्यते संहिता॥ स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ। होरान्योऽङ्गविनिश्चयश्च कथित: स्कन्धस्तृतीयोऽपर:॥ वृ. सं. 01.09
3. पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिता:। केरलि: शकुनञ्चेति ज्योति: शास्त्रमुदीरिदतम्॥ ज्योतिर्निबन्धावलि:
4. भारतीयज्योतिष/शिवनाथझारखण्डी
5. संस्कृत शास्त्र–मञ्जूषा, डॉ. उदयशंकर झा
6. वर्षाप्रश्ने सलिलनिलयं राशिमाश्रित्य चन्द्रो। लग्नं यातो भवति यदि वा केन्द्रग: शुक्लपक्षे॥ बृ.सं.,28.01/प्रश्नचण्डेश्वर:, प्रकीर्णकाऽध्याय:,सद्य:वृष्टिलक्षणम्।
7. जलचरर्क्षमुपेत्य समागतो यदि तनुं सुतनु: क्षणदापति:। भवति वा किल कण्टकगो बली प्रचुरमम्बुचयं सृजति क्षणात्। व.मा., 1.8
8. ना. सं., 32.01
9. सौम्यैरदृष्ट: प्रचुरमुदकं पापदृष्टोऽल्पमम्भ:, प्रावृट्काले सृजति न चिराच्चन्द्रवद्भार्गवोऽपि॥ बृहत्संहिता, सद्योवर्षणविचार:, श्लोक.सं.1
10. बृहत्संहिता, सद्योवर्षणविचार:, भट्टोत्पलविवृत्ति:, श्लोक.सं. 1
11. भुवनदीपक:. 4.3
12. द्रव्यं जलार्द्रं सजलं घटं वा स्पृष्ट्वा जलासन्नगतस्तदानीम्। प्रष्टाऽम्बुकार्योन्मुख एव पृच्छत्यलं वदेदम्बुरवेऽपि तोयम्॥ व.मा., 2.1
13. बृ. सं., 28.02
14. तत्कालघटिका द्विघ्ना त्रिहृतैकेन सत्वरम्। द्वाभ्यां किंचित् विलम्बेन रामै: दूरेति वृष्टिकृत्॥ प्रश्नचण्डेश्वर:, प्रकीर्णकाध्याये वृष्टिप्रश्न:, (आचार्य रामजन्म मिश्र)
15. संस्कृत शास्त्र–मञ्जूषा, डॉ. उदयशंकर झा
16. यदि तित्तिरपत्रनिभं गगनं मुदिता: प्रवदन्ति च पक्षिगणा:। उदयास्तमये सवितुर्द्युनिशं विसृजन्ति घना न चिरेण जलम्॥ बृ. सं., 28.17
17. वनमाला,02.11
18. न वाति यदि मारुतो रविरुदेति चण्डद्युति द्रुतं भुवि झषावली व्रजति रन्तुमम्भस्तटात्। तदैव जलमागतं पयसि भेककोलाहलो वदेदिह समन्ततो बुधवर: पयोदागमे॥ वनमाला, 02.04
19. यदा प्रत्यङ्गताभेका: स्वसद्योपरि संस्थिता:। पतन्ति दक्षिणस्था वा भवेद् वृष्टि: तदाऽचिरात्॥ ना.सं.,32.16
20. विरसमुदकं गोनेत्राभं वियद्विमला दिशो लवणविकृति: काकाण्डाभं यदा च भवेन्नभ:। पवनविगम: पोप्लूयन्ते झषा: स्थलगामिनो रसनमसकृन्मण्डूकानां जलागमहेतव:॥ बृ. सं., 28.04
21. व. मा.. 02.03
22. विनोपघातेन पिपीलिकानामण्डोपसंक्रान्तिरहिव्यवाय:। द्रुमावरोहश्च भुजङ्गमानां वृष्टेर्निमित्तानि गवां प्लुतं च॥ बृ. सं., 28.07/ना. सं.,32.18
23. वनमाला. 02.08
24. प्रविशति यदि खद्योतो जलदसमीपेषु रजनीषु। केदारपूरमधिकं वर्षति देवस्तदा न चिरात्॥ बृ. सं., 28.23
25. तरुशिखरोपगता: कृकलासा गगनतलस्थितदृष्टिनिपाता:। यदि च गवां रविवीक्षणमूर्ध्वं निपतति वारि तदा न चिरेण॥ बृ. सं.,28.08
26. नेच्छन्ति विनिर्गमं गृहाद्धुन्वन्ति श्रवणान् खुरानपि। पशव: पशुवच्च कुक्कुरा यद्यम्भ: पततीति निर्दिशेत्॥ बृ. सं.,28.09
27. वल्लीनां गगनतलोन्मुखा: प्रवाला: स्नायन्ते यदि जलपांशुभि र्विहङ्गा:। सेवन्ते यदि च सरीसृपास्तृणाग्राण्यासन्नो भवति तदा जलस्य पात:॥ बृ. सं.,28.13
28. वनमाला,02.10
29. दारुणनादस्तरुकोटरोपगो वायसो महाभयद:। सलिलमवलोक्य विरुवन् वृष्टिकरोऽब्दानुरावी च॥ बृ. सं.,95.17
30. सक्षीरार्जुनवञ्जुलकूलद्वयपुलिनगा रुवन्तश्च। प्रावृषि वृष्टिं दुर्दिनमनृतौ स्नाताश्च पांशुजलै:॥ बृ.सं.,95.16
31. मार्जारा भृशमवनिं नखैलिखन्तो लोहानां मलनिचय: सविस्त्रगन्ध:। रथ्यायां शिशुरचिताश्च सेतुबन्धा: सम्प्राप्तं जलमचिरान्निवेदयन्ति॥ बृ. सं.,28.05/ना. सं.,32.17
32. वनमाला,02.05–06

*शोधच्छात्रा*

*केन्द्रियसंस्कृतविश्वविद्यालय:, वेदव्यासपरिसर:, हिमाचलप्रदेश:*

ISSN 2456-3420

# शार्दूलशकटम्-एकम् अध्ययनम्

डॉ. प्रीतमरुजः

आधुनिके संस्कृतसाहित्ये 'शार्दूलशकटम्' एकम् उल्लेखयोग्यं काव्यम्। वीरेन्द्रकुमार-भट्टाचार्येण विरचितं काव्यमिदं रूपकान्तर्गतं पञ्चाङ्कविशिष्टं प्रकरणकाव्यम्। अत्र परिवहनसंस्थायाः वर्णनमाध्यमेन समाजस्य वास्तविकस्थितिः लेखकेन उद्घाटिता। प्रकरणस्यास्य नायकः आदिशूरः सर्वाध्यक्षरूपेण परिचितः। अन्येऽपि बहवः चरित्राः अत्र दृश्यन्ते। यथा मुख्यपरिचालकः विश्वनाथः, मुख्यश्रमाधिकारिकः श्यामाङ्गः, चालनाधिकारिकः निर्माल्यः; अपि च श्रमिकनेतारूपेण अमिताभः, इन्द्रनीलः, रत्नाकरः, अमृतः, दिवाकरः, निशापतिः, दायुदः प्रभृतयः चरित्राः उल्लिखिताः। नेतारः शकटागारेणसहसम्बन्धिताः। प्रकरणेऽस्मिन् कलिकाता-दुर्गापुर-उत्तरवङ्ग एतासां तिसृणां परिवहनसंस्थानां वर्णनमस्ति। अतः अत्र एकाधिकाः श्रमिकनेतारः श्रमिकाश्च उल्लिखिताः।

अत्र वयं पश्यामः यत् अधिकारिणाम् अधीनस्थ-कर्मकराः श्रमिकाश्च कर्मसु लिप्ताः भवन्ति, परन्तु ते श्रमिकाः सर्वदा न्याय्यपारिश्रमिकात् वञ्चिताः। अधिकारिणः श्रमिकानां श्रमार्जितं धनं कोषागारेषु पुञ्जीकुर्वन्ति, स्वल्पपारिश्रमिकं च ददन्ति तान् श्रमिकान्। कौशलेन ते अधिकारिणः दासत्वप्रथां द्रढयन्ति। श्रमिकानां कठिनसमयेऽस्मिन् देवा अपि छायावद् विलीयन्ते। अतः श्रमिकैः स्वभाग्यं स्वकरैरेव विधातव्यम्। 'उद्धरेदात्मनात्मानं...' गीतायाः वचनमिदं श्रमिकैः अनुसरणीयम्। 'भीमायनम्' इति महाकाव्ये प्रभाशंकरेणोक्तम्-

**''निजोन्नतेः साधनमेकमेव स्वेनैव चात्मोद्धरणं विधेयम्।''**[1]

श्रमिकाः कर्मिणश्च सम्मिलितं भूत्वा आन्दोलनं कुर्वन्ति, विरोधगीतं गायन्ति च ते। विरोधफलाय ते रात्रिन्दिवं प्रयत्नशीलाः भवन्ति। सर्वे श्रमिकाः स्वेषां उत्साहवर्धनाय 'वाद्यं ध्वनतु विमर्द्य मलयं......'[2] इत्यादिक्रमेण विजयगीतं गायन्ति। 'सत्यमेव जयते' इति भारतसंविधानस्य मूलमन्त्रः। उच्यते-

**''अङ्कुरं भवेत्तरुर्यथास्थलं हि रोपितं**
**वर्धते नृणां शिशुः शनैः शनैः सुपोषणात्।**
**दीप्यते नरैर्नगैस्तथा मतैश्च निश्चितं**
**स्थानकालसङ्गतैः प्रलीयते तु दूषणात्।।''**[3]

एवम्प्रकारेण अधिकारी-श्रमिकयोर्मध्ये विरोधः, अधिकारिणां स्वार्थसिद्धिः तैश्च श्रमिकानां शोषणमित्यादयः वर्णिताऽत्र प्रकरणे।

श्रमिकान्दोलनस्य वार्ता सर्वाध्यक्षस्य समीपे प्रेरिता। सर्वाध्यक्षः विशदविवरणं श्रुत्वा श्रमिकानां समस्यानां निवारणार्थं द्राक् तत्परो भवति। कुतः 'छिद्रेष्वनर्था बहुलीभवन्ति'। उच्यते-

**''क्षुद्रैः स्फुलिङ्गैः क्रियते दावाग्निः**
**तुच्छा वितण्डा जनयन्ति संख्यम्।।''**[4]

प्रशासकश्रमिकयोर्मध्ये यद् अन्तर्विरोधोऽस्ति परस्परसंलापैः तस्य विरोधस्य निःशेषखण्डनं कर्तव्यम्। श्रमिकान्दोलनेन कर्मिणः श्रमिकाश्च संस्थायाः हानये यतन्ते पान्थांश्च क्लेशयन्ति। अतः परिवहनकर्मिषु इदं न उपयुज्यते। कुतः संस्थाजनैः पथिकानां कदापि न हानिर्भवेत्, तेनोक्तम्-''मार्गश्रितानां नृणां न वयः कल्पयाम विडम्बनम्।'' यद्यपि सत्यनिष्ठव्यक्तिः सर्वदा जयशीलो भवति तथापि तेनोक्तम्-

**''विजयो लभ्यतेऽस्माभिः कुत्रापि वा पराजयः।**
**दैवायत्ता जयप्राप्तिर्मदायत्तस्तु सत्पथः।।''**[5]

अर्थात् सत्यं सर्वत्र जयेत न वा, तथापि सत्यमेव आश्रयितव्यं निरन्तरम्। अनेनप्रकारेण सर्वाध्यक्षस्य आदेशः श्रमिकानां शिरोधार्यः, तस्य आश्वासेन सर्वे श्रमिकाः पुनः स्व-स्व-कर्मणि युक्ताः भवन्ति। सर्वाध्यक्षः रात्रिन्दिवं प्रतिष्ठानोन्नतिहेतवे श्रमिकानां सौख्यविधानाय च प्रयत्नशीलो भवति। अतः श्रमिकैः सः अतीव प्रशंसितः। उच्यते-

**''कर्मिणां मङ्गलं मन्यते यः स्वमङ्गलं**
**सिद्धये चेष्टते खिद्यते दुखदर्शनात्।**
**आत्मनः पौरुषं बुद्धिमत्तां तथा चिरात्**
**संनियो'य स्वतः कांक्षते कर्मिणो फलम्।।''**[6]

परन्तु एवम्प्रकारेण सः स्वस्य प्रशंसनं न इच्छति, कुतः कर्मचारिभिः एव नियतं संस्थायाः भित्तिर्भूयते। अतः संस्थाजय एव तद्विजयं सूचयति। संस्थायाः उन्नतिरेव तस्य नित्यसाधना इति सूच्यते।

कर्मचारिणाम् अतिरिक्तकार्यकालदियं, तेषां भविष्यनिधिः, आयवृद्धिः इत्यादिषु विषयेषु कर्मचारिणः प्रतिश्रुतिः दत्ता सर्वाध्यक्षेण।रात्रीकालीन-बसपरिषेवाऽपि तेन प्रचलिता। सर्वे कर्मचारिणः जानन्ति यत् सर्वाध्यक्ष एव तेभ्यः न्याय्यं दास्यति, अतः ते सर्वाध्यक्षस्य समीपमुपनीताः। ते सर्वे परमं सन्तोषमग'छन्'। वस्तुतः सर्वाध्यक्षमहोदयः अधिकारिश्रमिकयोर्मध्ये यो विरोधः तस्य समाप्तिं वाञ्छति। कुतः-

**''युक्तचेष्टा कृता यत्र कर्मिभिराधिकारिकैः।**
**उन्नतिस्तत्र संस्थायाः क्षीणोऽप्यत्र न संशयः।।''**[7]

यद्यपि जनहिताय सर्वाध्यक्षस्य क्षमता सीमिता तथापि तेन यत् कृतं तत् सर्वमेव कर्मिणां हिताय संस्थाया उन्नतये च कल्पते। नास्ति तस्य भिन्नार्था अभिरुचिः। पूर्वं केनापि सर्वाध्यक्षेण श्रमिकेभ्यः एतानि

न दत्तानि।एकस्य श्रमिकस्य पुत्रः सर्वपरीक्षासु उत्कृष्टफलं दर्शयति। एतत् श्रुत्वा सर्वाध्यक्षः तं श्रमिकं भृशमुत्साहयते। कर्मिसन्ताना योतिष्कसमाना भवितुमर्हन्ति। अतः उच्यते-

**''सकलासु दिक्षु विकसन्ति तारकाः**

**कुसुमानि भान्ति गहने वनान्तरे।**

**मणयः सदैव विलसन्ति भूतले**

**प्रतिभा च दीनसदनेऽपि जायते।।''**[8]

अस्य प्रमाणः स्वयं सर्वाध्यक्षः। कुतः सोऽपि वित्तहीने परिवारे जातः। स्वचेष्टया सः सर्वाध्यक्षस्य पदं प्राप्तवान्। वस्तुतः विधात्रा कदापि मनुष्यस्य हस्तरेखासु भाग्यं न लिखितं, मनुष्यः सर्वदा स्वकर्मभिः स्वयमेव स्वभाग्यस्य लेखको भवति। श्रमिकाणां जीवनं दुःखपूर्णम्। दुःखविस्मरणाय ते शौण्डिकालयं गच्छन्ति। अभावस्तेषां नित्यसङ्गी विषादश्च सहोदर एव। अतः सुरापानेन पुनः तत्दुःखवर्धनम-नुचितम्। कुतः सुरापानेन मनुष्यः क्षणिकसुखं प्राप्नोति, मदिरासमो वैरी नास्ति। एवम्प्रकारेण दीनता, दुःखदुर्दशा, दुःखविस्मरणाय सुरापानं, सुरापानस्य दोषः प्रभृतयः विषयाः वर्णिताः।

कतिपया नगररक्षकाः सुष्ठु न आचरन्ति। विना पाथेयं ते शकटेषु भ्रमितुमिच्छन्ति। कारणेऽस्मिन् यदा परिवहनकर्मिभिः विरोधः कृतः तदा कर्मिणः तैः नगररक्षकैः भर्तसिता आहताश्च। अतः अत्र रक्षक एव भक्षकस्य इव आचरति। उच्यते-

**''जनगणमनसि क्व स्थाप्यते न्यायबुद्धिः**

**स्वयमपि यदि रक्षी सञ्चरेत् निन्दितार्थम्।।''**[9]

कर्मिणः अस्याः समस्यायाः निवारणार्थं राजभवनं गन्तुं इच्छन्ति। परन्तु एतत्श्रुत्वा सर्वाध्यक्षः राष्ट्रसचिवेन सह आलोचनं कृत्वा तेषां समस्यायाः समाधानं करोति, तेषां आलोचना फलप्रसूरेव जाता। सर्वे परिवहनकर्मिणः हर्षध्वनिं कुर्वन्ति। सर्वाध्यक्षस्य दौत्यकार्यं सफलम्। कलहं दूरीकृतं पान्थानाञ्च दुर्दैवं निराकृतम्। संस्थाकर्मिणां जय एव तस्य विजयं सूचयतीति वृत्तान्तं वर्णितम्।

प्रकरणस्यास्य 'शार्दूलशकटम्' इति नामकरणं युक्तियुक्तं तात्पर्यपूर्णञ्च। 'शार्दूल' इति शब्दस्यार्थः व्याघ्रः, 'शकटम्' अस्यार्थः भवति यानम्। पश्चिमवङ्गस्य बसयाने शार्दूलस्य मुखचित्रं लग्नो भवति, यैः बसयानैः पथिकाः निष्कण्टकं गन्तव्यस्थलं गन्तुं शक्नुवन्ति-इदं भवति व्याघ्रवदनचिह्नाङ्कमण्डितां यानानां मूलोद्देश्यम्। अपि च उच्यते-

**''पुर्यां वङ्गानां जनबहुकलिकातायां**

**राष्ट्रायत्ता या परिवहणविधिः संस्था।**

**शार्दूलालेखैर्द्रुतगतिशकटास्तस्या**

**राजन्ते लब्ध्वा भ्रमणरतनृणां चार्हाम्।।''**[10]

'शार्दूलशकटम्' एकं प्रकरणविशिष्टं काव्यम्। प्रकरणस्य लक्षणप्रसङ्गे साहित्यदर्पणकारेण विश्वनाथेन उक्तम्-

**''भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्।**

**शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्।**

**सापायधर्मकामार्थ-परो धीरप्रशान्तकः।।''**[11]

'शार्दूलशकटम्' अस्मिन् काव्येऽपि तत्कालसमाजे अधिकारिभिः स्व-आश्रितानां कर्मचारिणां श्रमिकानाञ्च शोषणं प्रदर्शितम्। अत्र अधिकारिणां स्वार्थसिद्धिः, तैः सह श्रमिकानां विरोधः, श्रमिकानां दुःखपूर्णं जीवनं, दुःखविस्मरणाय सुरापानं तस्य दोषश्च, निर्दोष-श्रमिकान् प्रति नगररक्षकानां अत्याचारः, शान्तिपूर्णरूपेण श्रमिकानाम् आन्दोलनम्-इत्यादयः विषयाः अत्यन्तसुन्दरेण सारल्येन च वर्णिताः ग्रन्थकारेण। काव्यस्यास्य नायकः आदिशूरः धीरप्रशान्तलक्षणयुक्तः विप्रः, यो स्वकर्तव्येन धर्मम् अर्थञ्च प्राप्तं करोति। धीरप्रशान्तस्य नायकस्य लक्षणे उक्तम्-

**''सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात्।''**[12]

नायकः आदिशूरः स्व-आश्रितानां कर्मचारिणां सौख्यविधानाय तेषां मङ्गलाय च सर्वदा सचेष्टो भवति। आदिशूरो भवति सर्वाध्यक्षः, यो राष्ट्रीयपरिवहनविभागस्य उच्चपदाधिकारी। कर्मचारिणः प्रति तस्य आचारः प्रशंसनीयः। प्रकरणेऽस्मिन् विदूषकचरित्रस्य अभावोऽस्ति। नायिकाचरित्रस्य अपि अभावः स्यात्, केवलं मृतश्रमिक-चित्रभानोः असहायभार्यायाः चालक-परिमलस्य च रुग्नधर्मपत्न्याः विचारोऽस्ति। प्रकरणस्य प्रति अङ्के प्रवेशकस्य प्रयोगोऽस्ति, यो भवति लेखक-भट्टाचार्यस्य अभिनवप्रयासः।

अस्मिन् प्रकरणे प्रचलितछन्दोभिः सह केषाञ्चित् अप्रचलितानां छन्दसामपि प्रयोगाः दृश्यन्ते। प्रचलितछन्दांसि यथा- इन्द्रवज्रा, उपेन्द्रवज्रा, मालिनी, आर्या, रुचिरा, स्रग्धरा, हरिणी, पुष्पिताग्रा प्रभृतयः। अप्रचलितछन्दांसि यथा- रसोल्लासः, रथक्रान्तिः, हंसकेलि, मणिपुष्पकं, सञ्चारिणी, सुघोषः, पाञ्चजन्यं, तूर्यनादः, गीतिस्वना, योतिर्लेखा इत्यादयः। अतः अत्र बहूनां श्लोकानां प्राचुर्यं सन्नपि कुत्रापि कोऽपि विषयः नीरसरूपेण न प्रतिभाति।

लेखकेन परिवहनसंस्थायाः कर्मकराणां जीवनानां प्रत्यक्षचित्रणं कृतमत्र। नायकः आदिशूरः अतीव दयालुः सहृदयव्यक्तिश्च। सः सर्वदैव स्वस्य अधीनस्थ-कर्मकराणां सुखदुःखयोर्विषये चिन्तयति तेषां सहायतां करोति च। तैः सह अधिकारिणां विरोधं दूरीकरणाय संस्थायाः मङ्गलाय च सर्वाध्यक्षः आदिशूरः सर्वदैव सचेष्टो भवति। श्रमिकानां करुणावस्था तेषां दैन्यदशा च भट्टाचार्येण निपुणरूपेण वर्णिताऽत्र प्रकरणे।दैन्यत्वाद् मनुष्याः चौर्यादिषु विभिन्नेषु अनुचितकर्मसु लिप्ताः भवन्ति। दीनव्यक्तेः कथनं प्रति कस्यापि प्रत्ययो नास्ति, दैन्यदुःखसमये न कोऽपि तिष्ठति

ISSN 2456-3420

तेषां पार्श्वे ।एवम्प्रकारेण अवहेलितः सन्नपि दृढमनोबलसम्पन्नः मनुष्यः चौर्यमद्यपानादिभ्यः अनुचितकर्मभ्यः स्वं रक्षां करोति, तेभ्यः कर्मभ्यः बहिर्भूतमार्ग'च्छति च। तस्य मनसिसत्चिन्तनस्य उत्पत्तिर्भवति। वीरेन्द्रकुमारेण अत्रसत्कर्मणः प्रशंसा, दुष्कर्मणः निन्दा, अधिकारी-श्रमिकयोर्मध्ये विभेदः, पारस्परिकवार्तालापेन विवादनिरसनम्, परिवहनसंस्थायाः महत्त्वमित्यादीनां वर्णनम् अतिसूक्ष्मरूपेण कृतम्। करुणवीररसप्रधाने अस्मिन् प्रकरणे अतिसारल्येन सरसेन च पात्राणां संवादाः लेखकेन वर्णिताः। वस्तुतः आधुनिके संस्कृतनाट्यसाहित्ये प्रकरणमिदं तात्पर्यपूर्णमिति मन्ये।

अस्मात् प्रकरणात् मानवाः स्वकर्तव्यविषये सचेष्टो भवितुमर्हन्ति, सहृदयस्य आचरणं कथं भवेदित्यस्मिन् विषयेऽपि ज्ञानं लब्धुं शक्नुवन्ति। मनुष्याणां स्वाधिकारात् वञ्चनं नानुचितम्, संघ एव बलं भवति- प्रभृतयः विषयाः सुन्दररूपेणात्र वर्णिताः। अहिंसायाः पन्थानम् अवलम्बनं कृत्वा स्व-उद्देश्यस्य प्राप्तिरेव प्रकरणस्यास्य मुख्यफलम्। व्याघ्रवदनचिह्नाङ्कमण्डित-परिवहनविभागस्य सर्वदा समृद्धिर्भवतु-लेखकभट्टाचार्यस्य चिन्तनमस्य अत्यन्तं प्रशंसनीयम्। येषामुपरि कस्यापि दृष्टिर्न गच्छति ये च समाजे अधिकारिभिः अवहेलिताः, तान् अवहेलितान् मनुष्यान् प्रति लेखकभट्टाचार्यः न केवलं दृष्टिर्ददाति अपि तु तान् मनुष्यान् समाजस्य सम्मुखे आनयनाय सचेष्टो भवति। प्रकरणस्य अन्तिमे भट्टाचार्येण भरतवाक्यं न कृतम्, परन्तु भरतवाक्यस्य स्थाने तेन संस्थासंगीतं लिखितं यत्र सः कृतनगरीपान्थगमनव्यवस्थां, राष्ट्रपरिवहनसंस्थां वारंवारं प्रणमति। धन्योऽसौ ग्रन्थकारः धन्या तस्य सृष्टिः।

## सन्दर्भग्रन्थाः


1. भीमायनम्- प्रा. प्रभाकरशंकरजोशी, सम्पा. पं. वसन्त अनन्त गाडगीठ्ठः, शारदा-गौरव-ग्रन्थमाला, पुणे, 2066 (नव-विक्रम)।
2. शार्दूलशकटम्- डा. वीरेन्द्रकुमारभट्टाचार्येण विरचितम्, संस्कृत-साहित्य-परिषत्, कलकाता, 1969.
3. श्रीमद्भगवद्गीता- कृष्णद्वैपायनव्यासदेवः, गीताप्रेस, गोरक्षपुर, 2014.
4. साहित्यदर्पणः- विश्वनाथः, सम्पा. उदयचन्द्रः बन्द्योपाध्यायः, सम्स्कृत-बुक-डिपो, कलकाता, 2010.
5. बन्द्योपाध्यायः धीरेन्द्रनाथः- संस्कृतसाहित्यस्य इतिहासः, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, कलकाता।
6. मुखोपाध्यायः गोपेन्दुः- संस्कृतसाहित्यस्य इतिवृत्तम्, इउनाइटेड बुक एजेन्सि, कलकाता, 1419 वङ्गाब्दः।
7. De S.k- History of Sanskrit poetics, Calcutta, Firma KLM Private Limited,1976.


## पादटिप्पणी

1. श्रीमद्भगवद्गीता- 6/5
2. भीमायनम्- 28 श्लोकः (दशमसर्गः)
3. शार्दूलशकटम्- 26 श्लोकः (प्रथमोऽङ्कः)
4. शार्दूलशकटम्- 16 श्लोकः (प्रथमोऽङ्कः)
5. शार्दूलशकटम्- 31 श्लोकः (द्वितीयोऽङ्कः)
6. शार्दूलशकटम्- 52 श्लोकः (तृतीयोऽङ्कः)
7. शार्दूलशकटम्- 39 श्लोकः (द्वितीयोऽङ्कः)
8. शार्दूलशकटम्- 65 श्लोकः (तृतीयोऽङ्कः)
9. शार्दूलशकटम्- 73 श्लोकः (चतुर्थोऽङ्कः)
10. शार्दूलशकटम्- 96 श्लोकः (पञ्चमोऽङ्कः)
11. शार्दूलशकटम्- 2 श्लोकः (प्रथमोऽङ्कः)
12. साहित्यदर्पणः- 137 पृष्ठा
13. साहित्यदर्पणः- 409 पृष्ठा


*सहायकाचार्यः*

*वी. टी. एम. विद्यालयः बडाबाजार, पुरुलिया*

ISSN 2456-3420

# फलादेशे त्रिकोणयोर्वैशिष्ट्यम्

साहिलशर्मा

**अव्यक्तमव्वयं शान्तं नितान्तं योगिनां प्रियम्।**
**सर्वानंदस्वरूपं यत्तद्वन्दे ब्रह्म सर्वगम्।।**

**उपोद्घातः**-सुविदितमेवमेतत् यत् न केवलं भारतीयवाङ्मय-स्यापितु विश्ववाङ्गसमुदायस्य मूलाधाराः चत्वारो वेदास्सन्ति। ऋग्वेदः सम्पूर्णस्यापि जगतः प्रथमज्ञानागारः वर्तते। वेदा आपौरुषेया इत्यामनन्ति पारम्परिकाः। पुराकाले तावद् श्रवणविधिना एव वेदज्ञानस्य गुरुशिष्यपरम्परया संक्रमणं भवति स्म। गच्छताकालेनात्र परिवर्तनं जातम्। तदा वेदज्ञानस्य सरलसौलभ्याय महर्षिभिः वेदस्याङ्गानि कल्पितानि। अनन्तरं च तान्यङ्गानि स्वतन्त्रशास्त्ररुपेण प्रतिपादितानि। एतानि षट्संख्यकानि व्याकरणादीनि वर्तन्ते। एतानि सांङ्गोपाङ्गमधित्य इहलोके सुखं भुक्त्वा देहान्ते ब्रह्मलोकमवाप्नुवन्ति साधकाः।

**यथोक्तं पाणिनीयशिक्षायाम्-**

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**

वेदस्याङ्गः वेदांगः। वेदांगानि षट् सन्तीतिप्रमाणं अथर्ववेदे वर्तते। ज्योतिषशास्त्रंतेषु वेदांगेष्वन्यतममिति सुप्रसिद्धम्। तच्च ज्योतिशास्त्रं वेदांगस्य नेत्रस्थानीयमस्तीति बहुधा, बहुत्र, बहुभिराचार्यैश्च भणितम्। तद्यथा आचार्य लग्धः-

**यथा शिखा मयूराणां नागानां मणयो यथा।**
**तद्वद्वेदांगशास्त्राणां ज्योतिषं मूर्धिन संस्थितम्।।**

**स्कन्धत्रयम्**-शास्त्रस्यास्य विशालकलेवरं वर्तते तथापि ब्रह्माण्डस्य हितकामनया प्राचीनैः ज्योतिषशास्त्रप्रवर्तकैराचार्यैः शास्त्रमिदं त्रिषु स्कन्धेषु विभाजितमस्ति। ते च स्कन्धाः सिद्धान्तः, संहिता, होरा चेति नाम्नाभिधीयन्ते।

**सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुर्ज्योतिः शास्त्रमनुत्तमम्।।**

एते त्रयो स्कन्धाः सर्वदा सर्वथा च विश्वकल्याणाय उपयुज्यन्ते। यतः वेदस्य नेत्रमिदं न सामान्यमपितु निर्मलं वर्तते। तस्मादत्र किमपि समीक्षितुं सदेहस्यावकाशः न भवति। प्रत्येकमपि स्कन्धः महत्त्वपूर्णः वर्तते। तथापि सामाजिकदृष्टया होरास्कन्धस्योपयोगः बाहुल्येन प्रत्यक्षमनुभूयते। होराशास्त्रे जन्मिनां जन्मतः मृत्युपर्यन्तं, ततोप्यग्रे परजन्मविषये च तत्त्वतः विमर्शः क्रियते। होराख्यात्मके स्कन्धेऽस्मिन् फलादेशकथनमेव प्रामुख्येन भवति। तत्र शुभाशुभफलव्यञ्जनाय अनेके प्रकाराः, विधयः, योगाश्च ज्योतिर्विद्भिः प्राचीनार्वाचीनग्रन्थेषूक्ताः।

**कर्मप्रतिपादकं ज्योतिषशास्त्रम्**-वस्तुतः भारतीयवैदिकवाङ्ग-परम्परायां ये उत्कृष्टाः सिद्धान्तास्सन्ति तेषु प्रवरः मन्यते कर्मवादसिद्धान्तः। एतस्यैव सिद्धान्तस्यानुपालनं कुर्वन् भाग्यं व्याख्यायति ज्योतिषशास्त्रम्। अद्यतनीयं शुभाशुभं कर्मने श्वस्तनीयं भाग्यं परिणमति। आत्मना जन्मजन्मान्तरेषु कृतशुभाशुभकर्मणां प्रतिफलं तेषां पुनर्जन्मभवति। जन्मेदं कर्मफलमवाप्त्यर्थं तानि जीवनेऽस्मिन् कस्मिन् क्रमे कदा केन च प्रकारेण प्राप्स्यते इत्यादिकान् सर्वान् विषयान् सम्यक् ज्ञातुं विश्वासयोग्यं साधनं विद्यते ज्योतिषशास्त्रम्। यथा कदाचिदन्धकारयुक्ते प्रकोष्ठे विद्यमानानि वस्तूनि प्रकाशाभावात् न दृश्यन्ते यद्यपि तानि वस्तूनि तत्रैव स्थितानि भवन्ति। तत्र यदि एकः दीपः प्रज्जावलयते चेत् तानि सर्वाण्यपि दृष्टिपथमायान्ति। तद्वदेव ज्योतिषशास्त्रेण जन्मजन्मान्तरेषु कृतानां शुभाशुभकर्मणां शुभाशुभपरिणा-मात्मकं प्रतिफलं जीवनेऽस्मिन् प्रकाशयितुं शक्यते। यथाहाचार्यवराहः बृहज्जातके-

**होरेत्यऽहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्।**
**कर्मार्जितं पूर्वभवेसदादि यत्तस्य पक्तिं समभिव्यनक्ति।।**

भगवता श्रीकृष्णेनापि सिद्धान्तस्यास्य प्रतिपादनं कृतमस्ति। तत्रोक्तं वर्तते यत् प्राणीनां कर्मस्वाधिकारः न तु फलेष्वर्थात् कर्माणि कर्तुं जनाः स्वतन्त्राः नतु फलानि भोक्तुम्। तद्यथा-

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भू मा ते संगोस्त्व कर्मणि।।**

लौकिकसाहित्येऽपि कविभिः बहुधा एष सिद्धान्तस्समर्थितः। तथाहि कविशिरोमणिः गोस्वामि तुलसीदासः श्रीरामचरितमानसे-

**कर्मप्रधान विश्व रचि राखा।**
**जो जस करहिं सो तस फल चाखा।।**

कथनस्यऽयमाशयो वर्तते यद् जातकैः यान्यपि शुभाशुभकर्माण्या-जर्यन्ते तस्य परिणतिः भविष्ये फलरूपेण भवति। कर्मणानुगुणमेव ईश्वरेण जातकानां जन्मकालो निश्चीयते। तदानुगुणमेव तत्र तत्र ग्रहनक्षत्रादीनि तिष्ठन्ति। येषां गति-स्थिति-प्रकृति-विकृति वशादनेके योगाः जन्माङ्गचक्रे निर्मीयन्ते येषां फलं जातकैः भोक्तव्यं भवति। अत्रेदमपि सुस्पष्टं यज्ज्योतिषशास्त्रं वर्तते भाग्यव्यञ्जकं न तु भागविधायकमिति। यतः ज्योतिषशास्त्रे अप्रवेशत्वात्, अज्ञानकारणात्, दुराग्रहवशाद्वा अनेके जनाः शंकिताः संदृश्यन्ते यद्यदि फलितपक्षे ज्योतिषशास्त्रं भाग्यप्रतिपादिकं वर्तते चेत् कोऽत्र लाभः। भाग्यज्ञानेन तत्र परिवर्तेन तु ना भविष्यति। किन्तु एतादृशी शंका तेषां मूर्खताया एव परिचायिका।लोके यथा यात्रा क्रमे कश्चिद् जनः पूर्वमेव जानीयात् यत् अयं वर्त्म विषमः, कण्टकयुक्तः असुरक्षितश्चास्तीति। अपि च लक्षं प्राप्तुं नान्यो पन्थः तदा सः जनः यात्रां न त्यजति अपितु यथा सामर्थ्यमावश्यकमुपकरणानि संगृह्य यात्रायां प्रवृत्तो भविष्यति । एतेन तस्य यात्रा तथा क्लेशकरी न स्यात् यथा मार्गविषयकं वृत्तं विज्ञाय। द्वितीयमुदाहरणं यथा वृष्टिलक्षणानि विज्ञाय पथिकः छत्रं स्वीकृत्य गच्छति चेत् वर्षणे सति छत्रसहायेन सः सुरक्षितो भविष्यति। एवमेव ज्योतिषशास्त्रं भविष्यकालिकघटनां उक्त्वा कुप्रभावानामुपशमनायोपा-यानपि भणति येन जनाः पूर्वमेव सुरक्षायै कृतप्रयत्नाः भूत्वा सुकर्माणि कर्तुं संप्रेरिताः संजायन्ते।

**द्वादशभावाः**-फलदेशकथनप्रकारेषु द्वादशभावविचारविधिरति-प्रसिद्धोऽस्ति। यत एतेभ्यः द्वादशभावेभ्यः जातकानां सर्वविधशुभाशुभ-

विचारः कर्तुं शक्यः। के ते द्वादशभावा प्रश्ने सति तनु-धन-सहज-सुत-रिपु-जाया-मृत्यु-धर्म-कर्म-आय-व्ययश्चेति द्वादशभावास्सन्ति। तथाह आचार्यवराह-मिहिरः-

**तनुर्धनं ततो भ्राता सुखं पुत्ररिपुस्त्रियः।**
**मृत्युर्भाग्यं राज्यलाभौ व्ययो भावाः क्रमादिमे।।**

प्रत्येकं भावात् भिन्न-भिन्न विषयाः प्रतिपाद्यन्ते। तदनुगुणं द्वादशभावानामनेकाः संज्ञा अपि तत्र तत्र ज्योतिषग्रन्थेषु पठिताराचार्यैः। एतेषु द्वादशभावेषु (1-4-7-10) चत्वारि केन्द्रस्थानानि, (2-5-8-11) चत्वारि पणफराणि, (3-6-9-12)चत्वारि आपोक्लिमानि चोच्यन्ते। एतदतिरिच्य लग्न-पञ्चम-नवमानां त्रिकोणसंज्ञेति वर्तते। लग्नात् पञ्चमयावत्, पञ्चमात् नवमयावत् नवमाच्च लग्नंयावद्यदि रेखा क्रियते चेत्त्रिकोणात्कृतिः संजायते। अतोऽस्य त्रिकोणेति नाम वर्तते।

**मेषूरणोदयकलत्ररसातलानि स्युः केन्द्रकण्टकचतुष्टयसंज्ञितानि।**
**लग्नात्त्रिकोणभवनं नवपञ्चमं च स्यात्त्रिकोणमुदायन्नवमं वदन्ति।।**

त्रिकोणेष्वपि पञ्चमनवमयोर्महन्महत्त्वमस्तीति ग्रन्थानामवलोकनेनाऽवगम्यते। एताभ्यां भावाभ्यामर्थात् पञ्चमनवमाभ्यां जातक-सम्बन्धिविशिष्टविषया अभिव्यज्ञ्यन्ते। अतोऽत्र फलादेशसन्दर्भे त्रिकोणयोर्वैशिष्ट्यमभिव्यञ्जयते।

**त्रिकोणयोर्संज्ञा**:-संस्कृतशास्त्राणामेका सुदीर्घपरम्परा विद्यते। यत्र शब्दानां प्रयोगात्प्राक् तेषामर्थानुभूतये। वलाघातः क्रियते। तत्र शब्दा अनेकार्थकाः भवन्ति किन्तु एकैव शब्दा भिन्नार्थद्योतनाय सर्वत्र न प्रयोक्तुं शक्यते। अर्थात् शब्दानां चयनम् उपयोगश्च विषयानुगुणं, सन्दर्भानुगुणं, भाषानुगुणं, स्थानानुगुणं, समयानुगुणं, स्थित्यनुगुणं च क्रियते। एतेन सन्दर्भः सुस्पष्टः भवति। एतदतिरिच्य अनेन संस्कृतभाषायाः विशाल-तमशब्दभण्डारस्यापि ज्ञानं जायते। एषैव परम्परा ज्योतिषशास्त्रेऽप्या-श्रिताऽऽद्रिता चाचार्यैः। नाम तत्र तत्र ज्योतिषग्रन्थेषु भावादिनां संज्ञाकथनक्रमे अनेकानि नामान्तराणि तन्वादिद्वादशभावानां पठितानि वर्तन्ते। अत्र त्रिकोणयोर्थात् पञ्चमनवमयोरप्यनेकाः सज्ञाः इत्थं भणिताः।

धी-देव-राज-पितृ-नन्दन-विद्या-सुत-पञ्चकेतिनामान्तराणि पञ्चमभावस्य वर्तन्ते। तद्वदेव धर्म-गुरु-शुभ-तप-नव-भाग्येतिसंज्ञाः नवमभावस्य सन्ति। तथाह जातकपारिजातकारः आचार्यवैद्यनाथः-

**पातालवृद्धिहिबुकक्षितिमातृविद्यायानाम्बुगेहसुख-बन्धुचतुष्टयानि।**
**धीदेवराजपितृनन्दनपञ्चकानि रोगांगशस्त्रभयषष्ठरिपुक्षतानि।।**
**जामित्रकामगमनानि कलत्रसम्पद्द्यूनास्तसप्तमगृहाणि वदन्ति चार्याः।**
**रन्ध्रायुरष्टरणमृत्युविनाशनानि धर्मो गुरुः शुभतपोनव-भाग्यभानि।।**

**पञ्चमनवमाभ्यां विचारणीयविषयाः**:-यथा पूर्वमेवोक्तमस्ति यत् पञ्चमभावः विद्याभावः सुतभावः वा कथ्यते। कस्मात् भावात् किं किं विचारणीयमित्यस्मिन्विषये वहुधा भणितम् आचार्यैः तद्यथा यन्त्र-मंत्र-विद्या-बुद्धि-वैभव-संतति-राजप्राप्ति-राजनाशादिनां विचारः पञ्चमात् करणीयः भवति। यथोक्तं महर्षीणा परासरेण भावविवेचनाध्याये-

**यन्त्रं मन्त्र तथा विद्यां बुद्धेश्चैव प्रबन्धकम्।**
**पुत्रराज्यापभ्रंशादीन् पश्येत् पुत्रालयाद् बुधः।।**

धर्म-भाग्य-प्रजावती- तीर्थगमनादिनां च चिन्तनं नवं भावात् कर्तव्यं भवति। सन्दर्भेऽस्मिन् पराशरवचनं यथा-

**धर्म भाग्यमथो श्यालं भ्रातृ-पत्न्यादिकांशतथा।**
**तीर्थयात्रादिकं सर्वं धर्मस्थानन्निरीक्षयेत्।।**

द्वाभ्यां भावाभ्यां विचारणीयविषयाः परस्परं संबन्धिनस्सन्ति। मुख्यरूपेणेताभ्यां बुद्धि-विद्या-प्रबन्ध-राजनीति-राजयोगादयः विचारयन्ते। अर्थात् राज्याप्तये बुद्धि-बल-पराक्रम-नित्यादिनामतितरा-वश्यकता नितराम भवति। अतः पञ्चमनवमौ यौ त्रिकोणौ भवतस्तयोर्भावयोः भावेशयोश्च सबलत्वे बुद्धिविद्याराज्यादीनाम-वाप्तिर्जायते अन्यथा विपरितफलमर्थादेतयोः विबलत्वे सति राज्यादीनामलाभः संभवति। एतस्मादेव कारणात् त्रिकोणयोः महन्महत्त्वं फलादेशसन्दर्भे स्वीकृतं विद्यते बुधैः।

**फलादेशे त्रिकोणयोः प्रभावः**-जन्माङ्ग चक्रे तन्वादिद्वादशभावेषु सूर्यादिग्रहाणां स्थितिवशात् विविध योगाः संभवन्ति ये प्रभावकारकाः भवन्ति। तेषु योगेषु त्रिकोणकेन्द्रेशयोर्योगः विशिष्टः मन्यते। तत्रापि राजयोगाप्तये राजतुल्ययोगाप्तये वा योगोऽयं प्रामुख्येन विचारणीयो-र्भवति। यतः केन्द्रत्रिकोणेशौ यदि मिथः सम्बन्धिनौ स्यातां तदा बलिनौ भूत्वा सुयोगकारकौ भवतः। नीचास्तादि दोषयुक्तावपि एतौ योगेऽस्मिन् शुभफलकर्तारौ भवतः। उक्तञ्च-

**केन्द्रत्रिकोणनेतारौ दोषयुक्तावपि स्वयम्।**
**सम्बन्धमात्राद् बलिनौ भवेतां योगकारकौ।।**

किन्त्वत्रायं विशेषः यत् एतौ केन्द्रत्रिकोणस्वामिनौ परस्परसंबंधात् विशेषफलदायकौ नाम राजयोगकारकौ तदेव भवतः यदा इतरैरर्थात् त्रिषडायेशैरप्रस्क्ता-सम्बन्धरहिताःभवेयुः।

**केन्द्रत्रिकोण पतयः सम्बन्धेन परस्परम्।**
**इतरैरप्रसक्ताश्चेद्विशेष फलदायकाः।।**

सम्बन्धो हि अत्र स्थान-दृष्टि-स्थानदृष्टि-युतिभेदेनचतुर्विधः कल्पितो विद्यते दैवज्ञैः। त्रिकोणयोः प्रथमत्रिकोणस्थानं भवति पञ्चमस्थानम्। तस्य पञ्चमस्थानस्याधिपतिर्यदि पारिजातांशंगः स्यात् तदा जातकः कुलोचितां सुविद्यां प्राप्नोति। उत्तमांशवशादुत्कृष्टां विद्यामवाप्नोति। पञ्चमेशे गोपुरांशे स्थिते सति विश्वविश्रुतः, सिंहासनांशे गते सति सचिवः देवलोकांशे कर्मयोगी पारावतांशे स्थिते च ब्रह्मज्ञः जायते।

**परिजाते सुताधीशे विद्या चैव कुलोचिता।**
**उत्तमे चोत्तमा ज्ञेया गोपुरे भुवनाङ्किता।।**
**सिंहासने तथा वाच्या साचिव्येन हि संयुता।**
**पारावते तु मैत्रेय ब्रह्मविद्या प्रकीर्तिता।।**
**सुतेशे देवलोकस्थे कर्मयोगयुतो भवेत्।**
**उपासना द्वितीये स्याद् भक्तिस्त्वैरावते स्मृता**

पञ्चमेशस्य बुधगुरुसहितस्य त्रिकस्थितस्य निर्बलत्वात् जातकः विद्याहीनः भवति। विपरीतपरिष्ठितौ नाम पञ्चमेशे बुधगुरुसहिते निजभवनगे, केन्द्रगे, नवमगे वा जातकः विद्याविनयादिसंपन्नः जायते। उक्तञ्च गणेशकविना जातकालङ्काराख्ये ग्रन्थे-

ISSN 2456-3420

**विद्यास्थानाधिपो वा बुधगुरुसहितश्चेत् त्रिके वर्तमानो**
**विद्याहीनो नरः स्यादथ नवमनिजक्षेत्रकेन्द्रेषु तद्वान्।**
**बालत्वं वृद्धता वा यदि गगनसदां जन्मकाले तदा स्यात्**
**प्रज्ञामान्द्यं नराणामथ यदि विहगः स्वर्क्षगो दोषहृत् स्यात्।।**

अनेनैव प्रकारेण द्वितीयो त्रिकोणेशः नाम नवमाधिपतिर्यदि लग्नस्थो भूत्वा सुरगुरुणावलोकितो भवेत् तदा जातकः बहुभाग्यवान् धर्मधनवाहनात्युक्तश्च भवति। किन्तु भाग्येशे अष्टमादिगते निर्बलत्वे सति जातकः धनधान्यादिरहितः दुःखितः भवति।

**भाग्येशो मूर्तिवर्ती सुरपतिगुरुणालोकितो भूपवन्द्यो**
**लग्नस्थो वाहनेशो नवमपतिरुभौ पश्यतश्चेत् स्वगेहम्।**
**सर्वासामास्पदं स्यान्मनुज इह तदा सम्पदां वाहनेन्द्रो**
**रन्ध्रस्थानस्थितश्चेद् व्रजति हि मनुजो भाग्यराहित्यमेवम्।।**

पञ्चमेशस्य नवमस्थे नवमेशस्य पञ्चमस्थे च सुयोगः सम्भवति। तथैव पञ्चमेशस्य पञ्चमस्थे धर्मेशस्य धर्मस्थे स्थितेऽपि शुभयोगः जायते। नवमस्थानं भवति त्रिकोणात्त्रिकोणमिति अत एवैतस्य त्रित्रिकोणेति संज्ञा विद्यते। शुभयोगनिर्माणाय एतस्य पञ्चमादप्यधिकं वैशिष्ट्यं भवति। नवमदशमाधिशौ जन्मनि व्यत्ययेन स्थितौ भवेतां तदा सुयोगः भवति अथवा नवमेशदशमेशौ द्वावपि त्रिकोणस्थौ केन्द्रस्थौ वा स्यातां तदापि भाग्ययोगकारकौ भवतः। केवलं त्रिकोणेशे तत्रापि नवमेशे केन्द्रस्थे, केन्द्रेशे वा नवमस्थे सत्यपि उत्तमो राजयोगः सम्भवति।

**निवसेता व्यत्ययेन तावुभौ धर्मकर्मणोः।**
**एकत्रान्यतरोवापि वशेच्चेद्योगकारकौ।।**

त्रिकोणाधिपयोरर्थात् पञ्चमनवमेषयोर्मध्ये येन केनचित् सह लग्नचतुर्थसप्तमदशमेषानां मध्ये यदि बलिष्ठः संबन्धः स्याद्चेत्तदापि भाग्ययोगः जायते। किन्त्वत्र पूर्वोक्तचतुर्विधसंबंन्धेषु सर्वोत्कृष्टः संबन्धः स्यात् तदा सर्वोत्कृष्टः भाग्ययोगः जायते। आशयोऽयं विद्यते यत् केन्द्रेषु उत्तरोत्तरक्रमेण सर्वतोबली दशमस्थानं भवति। त्रिकोणयोरपि पञ्चमात् नवमस्थानं बलवान् भवति। अपि च चतुर्षु संबन्धेषु स्थानसंबन्धः सर्वतो बलवान् विद्यते। अतः यदि दशमेशः नवमस्थाने, नवमेशः च दशमस्थाने स्यात्। एतौ द्वावपि बलिनौ भवेतां तदा सर्वोत्तमः राजयोगः जायते। अन्येन केन्द्रेशेन पञ्चमेशस्य नवमेशस्य वा संबन्धादपि भाग्ययोगस्तु संभवति। किन्तु सः योगः सर्वोत्तमः नोक्तः। तथाहाचार्यपराशरः लघुपाराशरीग्रन्थे–

**त्रिकोणाधिपयोर्मध्ये सम्बन्धो येन केनचित्।**
**वलिनः केन्द्रनाथस्य भवेद्यादि सुयोगकृत।।**

कश्चित् ग्रहः यदि केन्द्रस्थानेषु कस्यचिदेकस्याधिपतिर्भूत्वा एकस्य त्रिकोणस्यापि स्वामिर्भवति चेत्तदापि उत्तमः योगः मन्यते। एतस्यां परिष्ठितौ तस्य ग्रहस्य संबन्धो यदि द्वितीयेन त्रिकोणस्वामिनापि स्यात् तदा त्वन्यतमः भाग्ययोगः सम्भवति। तद्वदेव कस्यचित् त्रिकोणेशस्य संबन्धः यदि द्वाभ्यां केन्द्रेशाभ्यां भवेत् तदापि परोत्तमः भाग्ययोगः जायते। अत्रोक्त सिद्धान्तानुगुणं मेषादिद्वादशलग्नेषु एकाधिपतित्वेन, अन्येन त्रिकोणेशेन भाग्ययोगः वृष-कर्क-सिंह-तुला-मकर-कुंभलग्नेष्वेव भवितुमर्हति। यथा कर्कलग्ने मंगलः दशमेशः पञ्चमेशश्च भूत्वा केन्द्रत्रिकोणयोरेकाधिपतित्त्वातुत्तमं भाग्ययोगं करोति। अत्र यदि मंगलः स्वक्षेत्रस्थ, उच्चस्थः शुभयुतः शुभदृष्टश्च वा भवेत् तदा तु इत्योप्यधिकं शुभं फलं करिष्यति।

**केन्द्रत्रिकोणाधिपयोरेकत्वे योगकारकौ।**
**अन्यत्रिकोणपतिना सम्बन्धो यदि किं परम्।।**

**उपसंहारः–**

प्राचीनाचार्यैः यान्यपि शास्त्राणि रचितानि वर्तन्ते तानि सर्वतोभावेन समेषां हितचिन्तकानि सन्ति इत्यत्र नास्ति कस्यापि विमतिमतिः। यतः लोकमाश्रित्यैव शास्त्राणि प्रवर्तन्ते। लोका अपि शास्त्रानुगुणमेवाचरणं कृत्वा श्रेयमवाप्नुवन्ति। शास्त्रेषु ज्योतिषशास्त्रं प्रत्यक्षं, व्यवहारिकं, समाजोपकारकं चास्ति। शास्त्रेऽस्मिन् विविधेषु ग्रन्थेषु जातकसंबन्धि ये योगाः वर्णिताः तेषामनुशीलनं मननं चिन्तनं च सम्यक् कृत्वा वर्तमानसंदर्भे तेषामुपयोगकरणेन निश्चयेन सामाजिकाः युक्तलाभाः भवन्ति। यथा लोके वयं पश्यामः यद् कस्यचिदपि केन्द्रस्थाने उच्चपदे वा स्थितिवशात् तेन संबन्धिनः जनाः, तत् संबन्धिक्षेत्रं वान्येषामपेक्षयाधिकं लाभं प्राप्नोति। तथैव ज्योतिषशास्त्रोक्त विविधयोगा अपि घटन्ते इति जन्माङ्गचक्राणामवलोकनेनाभूयते बुधैः। अर्थात् केन्द्रस्थाः त्रिकोणस्थाः वा ग्रहाः, केन्द्रेशाः त्रिकोणेशाश्च तुलनया अन्येभ्यः बलिनः भवन्ति। एतस्मादेव ते उत्तमान् भाग्यादियोगान् निर्मान्ति। योगनिर्माणे त्रिकोणयोरतितरा भूमिका भवतीति हेतोः जन्माङ्गचक्राणां फलकथनप्रसङ्गे त्रिकोणस्थानयोः त्रिकोणेशयोश्च बलाबलं गभीरतया विचार्य फलादेशः कर्तव्यः इति शम्।

## सन्दर्भग्रन्थसूची


1. लघुजातकम्
2. बृहज्जातकम्
3. श्रीमद्भगवद्गीता
4. रामचरितमानसम्
5. वेदाङ्गज्योतिषम्
6. बृहत्पाराशरहोराशास्त्रम्
7. लघुपाराशरी
8. जातकपारीजातः
9. नारदसंहिता
10. जातकालङ्कारः


## पादटिप्पणी

1. पाणिनीय शिक्षा–41,42
2. वेदांगज्योतिषम्–श्लोक.4
3. नारदसंहिता–1.4
4. बृहज्जातकम्–1.3
5. भगवद्गीता–2.47
6. रामचरितमानस
7. भावप्रकाशः–1.7
8. जातकपारिजातः–1.53
9. जातकपारिजातः–1.50
10. जातकपारिजातः–1.51
11. बृहत्पराशरहोराशास्त्रम्–12.06
12. बृहत्पराशरहोराशास्त्रम्–12.10
13. लघुपाराशरी–3.2
14. लघुपाराशरी–3.1
15. बृहत्पराशरहोराशास्त्रम्–42.20
16. बृहत्पराशरहोराशास्त्रम्–42.21
17. बृहत्पराशरहोराशास्त्रम्–42.22
18. जातकालंकारः–1.11
19. जातकालंकारः–1.29
20. लघुपराशरी–3.03
21. लघुपराशरी–3.04
22. लघुपराशरी–3.05


*छात्रः*

*केन्द्रियसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, हिमाचलप्रदेशः*

ISSN 2456-3420

# अष्टावक्रगीतायामुपनिषत्सु च आत्मनिरूपणम्

प्रेम लता

अष्टावक्रगीता भारतीयाध्यात्मस्य शिरोमणि। ग्रन्थोस्तीति। अस्योपमा अन्य केनापि ग्रन्थेन न कर्तुं शक्यते। आत्मज्ञानप्राये अनेके विधय: यथा-ज्ञानकर्मभक्तियोगध्यानाश्च वर्तन्ते, येन मानवान् आत्मस्वरूपस्य बोधो भवति। आत्मस्वरूपस्य बोधनेव आत्मान: ज्ञानप्राप्तिर्भवतीति। आत्मा न विलुप्त: केवलम् अज्ञानकारणात् विस्मृत: जात:। आत्मान: विषये महर्ष्याष्टावक्र: कथयति-

अष्टावक्रटीकासु प्रथमप्रकरणे'आत्मा' इति विषयिकी चर्चा इत्थं वरीवर्ति-

**धर्माधर्म्मौ सुखं दु:खं मानसानि न ते विभो ।।**
**न कर्त्तासि न भोक्तासि मुक्त एवासि सर्वदा[1] ।।6।।**

ननु वेदोदितकर्म विहाय चिति विश्रान्तावपि प्रत्यवायप्रसङ्ग इत्यत् आह।। धर्माधर्माविति।। धर्माधर्मादयो मनोधर्मा एव कालत्रयमपि तै:सह सम्बन्धो नास्तीत्यर्थ:।। न कर्त्तेति।। किं च विहितनिषिद्धकर्मकर्तुत: धर्मादिद्वारा सुखदु:खभोक्तृत्वं तदपि तव सम्बन्धो नास्ति शुद्धबुद्धस्वरूपत्वात् त्वं सर्वदा मुक्त एव।। अज्ञानमात्रविजृम्भिते बन्धदु:खे ते तु चिति विश्रान्त्य एव अज्ञाननिवृत्या न विजृम्भिष्येते इत्यर्थ:।।

**एको विशुद्धबोधोऽहमिति निश्चयवह्निना।।**
**प्रज्वाल्याज्ञानगहन वीतशीक: सुखीभव[2] ।।9।।**

एक सजातीय: विजातीय: स्वगतभेदरहित:।। विशुद्धबोध: स्वप्रकाश: चिदाकाश: चिदात्म अहम् इति निश्चयाग्निना अज्ञानांख्यं गहनं प्रज्वाल्य प्रकर्षेण।। दग्ध्वा मोहरागद्वेषप्रवृतिजन्मापापात् वीतशोको विगतदु:ख: सन् सुखी भव इति अर्थ:।।9।।

आदर्शदृष्टान्ते परिछिन्नत्वादिभ्रमापति: स्वाध्यस्तशरीरान्तवृत्तित्वं च न स्पष्टमतो घटाकाशदृष्टान्ते न बाह्याभ्यन्तरव्यापकत्वम् आह।। एकं सर्वगतम् इति।। यथा सर्वगतमेकं नित्यं व्योमघटपटादौ बहिरन्तश्च वर्त्तते तथा नित्यम् अविनाशिब्रह्मसर्वभूतगणे बहि अन्तश्च निरन्तरं सर्वदा वर्त्तते इत्यर्थ:।। एष त आत्मा सर्वस्यान्तर इति शक्ते:।। अत: च बोधोऽहम् इति ज्ञानखड्गेन देहाऽहं भावपाशं निकृत्य सुखीभवत्यर्थ:।। इत्थं गुरूक्तपीयूषास्वादानुभवम् आत्मन:।। अवञ्चकारसाश्चयं शिष्यो निजगुरुं प्रति ।। तत्र तावद् शिष्य: चिद्रूपात्म अनुभव उपदेशम् आवि:।। कुर्वन्न एव गुरुकृत उपकाराख्यायनाय प्राचिनं संस्कारवशाद् बाधित अनुवृत्य अप्रतीतस्य मोहविडम्बनस्य स्मरणम् आविष्करोति।।

**एक सर्वगतं व्योम बहिरन्तर्यथा घटे ।।**
**नित्यं निरन्तरं ब्रह्म सर्वभूतगणे तथा ।।11 ।।**

**उपनिषदि आ-त्मविषयकनिरूपणम्-**

**ब्रह्मसाक्षात्कारानन्तरं हि घटादीनां बाध:।।**
**यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्।।** (बृ.4.5.15)

अर्थात् यदा जीव: ब्रह्मण: साक्षात्कारं प्राप्नोति तदा स: घटादीनां पदार्थानां विषयेषु स: व्यापृत: नैव भवति। स: तत्काले सर्वाणि अपि तत्त्वानि आत्मवत् पश्यति आत्मानं च तद्वत् पश्यति। अत: सेयं ब्रह्मज्ञानसाक्षात्कारपरम्परा एव गरीयसी, इति।

**सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्।। 2।।**
मा.उ., पृ.सं.39

'आत्मा' इति विषयम् अधिकृत्य माण्डूक्योपनिषदि प्रतिपादितं वर्तते यत् सर्वम् अपि इदं जगत् ब्रह्ममयं वर्तते। अयमात्मा अपि ब्रह्म एव वर्तते। तस्य आत्मन: अभिव्यक्ते: चतस्त्र: अवस्था: सन्ति। जाग्रत-स्वप्न-सुषुप्ति-तुरीयाश्च। अत्र तुरीया नाम चतुर्थी अवस्था इति अभिप्राय: स्वीकृत:।

**आत्मैव संविशत्यात्मनात्मानं य एवं वेद य एवं वेद।।** 12
मा.उ., पृ.सं.41

आत्मा एव आत्मनि अर्थात् अन्त:करणप्रवर्तक: वर्तते। अहमेव आत्मा इति जीव: यदा जानाति तदा स: आत्मनि सुखमनुभवतीति।

स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्येतिहोवाच।। 3।। छान्दोग्योपनिषद्, पृ.सं.135

छान्दोग्योपनिषदि आत्मविषये प्रतिपादितं वर्तते यत् हे श्वेतकेतो! यत् आत्मतत्त्वं त्वं ज्ञातुम् इच्छसि तत्तु त्वयि एव विद्यते। यं वयम् ईश्वरं भगवान् वा मन्यामहे तं तु वयम् आत्मनि अपि विशेषतपसा अनुभवितुं शक्नुम:। तस्य अनुभवेन तमुद्दिश्य अग्निहोत्रादिकर्मणां सम्पादनेन वयं कथयितुं शक्नुम: यत् स: आत्मा प्रत्येकम् अपि जीवे विद्यते।

**आत्मा वा अरे द्रष्टव्य: श्रोतव्यो मन्तव्यो निदिध्यासितव्यो। मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदँ सर्वं विदितम्।।6 ।।** पृ.सं.226, बृ.उ.

बृहदारण्यकोपनिषदि प्रतिपादितं वर्तते यत् आत्मा द्रष्टुं योग्य: तस्य श्रवणं शक्यम्, मननकरणयोग्य:, निरन्तरध्यानसमाधिद्वारा तस्य अनुभूति: कर्तुं शक्या। निरन्तरं श्रवणमनननिदिध्यासनद्वारा तस्य अनुभूति: साक्षात्कार: वा कर्तुं शक्यते।

## सन्दर्भग्रन्थसूची


1. अध्यात्मप्रदीपिकाटीका, आचार्य:विश्वेश्वर:।
2. अष्टावक्रगीता, स्वामिचिन्मयानंद:, 1972, मद्रासचिन्मय पब्लिकेशन्स, प्रथम संस्करण ।
3. अष्टावक्रगीता, शंभूनाथ:, 2002, रा.सं,संस्थानम् पुरी, प्रथम संस्करण।
4. उपनिषद्वाक्यमहाकोश:, रूपा बुक्स, जयपुर।
5. ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर।
6. अद्वैतसिद्धि:, प्राच्यभारतीग्रन्थमाला।
7. 2005-दर्शनोपनिषद्-संपादक-गीता प्रेस, गीता प्रेस गोरखपुर।
8. 2005 -108 उपनिषद्-पंडित श्रीराम शर्मा आचार्य, प्रकाशक-युगनिर्माण योजना।
9. 1979-एकादशोपनिशद्-हरियाणा साहित्य संस्थान, गुरुकुल झज्जर।


## पादटिप्पणी

1. अ.वक्र.गी-प्रथमप्रकरण-6 2. अ.वक्र.गी-प्रथमप्रकरण-9
3. अ.वक्र.गी.-प्रथमप्रकरण-20

*शोधच्छात्रा*
*केन्द्रियसंस्कृतविश्वविद्यालय:, वेदव्यासपरिसर:, हिमाचलप्रदेश:*

ISSN 2456-3420

# पातञ्जलमहाभाष्ये सूक्तिविमर्शः

डॉ. भूपेन्द्रकुमार ओझा

मानवजीवने धर्मार्थकाममोक्षरूपाः चत्वारः पुरूषार्थाः सन्ति, धर्मो नाम ? वेदप्रणिहितो धर्मोऽधर्मस्तद्विपर्ययः,[1] इति प्रमाणात् वेदप्रतिपादितः सर्वप्राणिहितचिन्तनपरको नियमविशेषो धर्मः विद्यते। विश्वेऽस्मिन् उत्पन्नेषु सर्वेषु प्राणिषु मानवः एव श्रेष्ठो भवति धर्मपालनात्। अस्मिन् विषये उक्तं विष्णुशर्मणा-अहारनिद्राभयमैथुनञ्च समानमेतत् पशुभिर्नराणां। धर्मो हि तेषामधिको विशेषो धर्मेण हिना पशुभिः समाना।[2] अयमेव धर्मः परमश्रेष्ठत्वात् स्वानुगामिनां जनानां विशिष्टमादर्शस्वरूपं विद्धाति।

मानवजीवनस्य परमपुरुषार्थो मोक्षो विद्यते। सः मोक्षो विना ज्ञानं न सम्भवति, उक्तञ्च-उपनिषदि ऋते ज्ञानान्न मुक्तिः'[3] सा मुक्तिः विना ज्ञानं न सम्भवति। अतः शब्दात्मकेऽस्मिन् जगति शब्दज्ञानमा-वश्यकं विद्यते, शब्देन सर्वे व्यवहाराः भवन्ति। शब्दं विना मानवाः स्वाभिप्रायं न प्रकटयितुं शक्नुवन्ति, इति आशयेन भतृहरिणोक्तं "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमाद् ऋते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।[4] लोकेऽस्मिन् शब्दार्थावबोधदृष्ट्या व्याकरणस्य महती प्रतिष्ठा उपयोगिता च विद्यते। देशेऽस्मिन् विदेशेषु च व्याकरणशास्त्रप्रवर्तकानाम् आचार्यप्रवराणां पाणिनिकात्यायनपतञ्जलीनां महती प्रतिष्ठा विद्यते। सर्वे विद्वत्तलल्जाः पाणिनिकात्यायनपतञ्जलीन् भगवदिति पदेन व्यवहरन्ति। एवञ्च वैदेशिकाः च जनाः आचार्यपाणिनि वैज्ञानिका इति मन्वते। तथा च सर्वेषु शास्त्रेषु व्याकरणस्य प्राधान्यं प्रतिपादितं शास्त्रकारैः यथा निरूक्तकारेण यास्केनोक्तं तदिदं विद्यास्थानं व्याकरणस्य कार्यन्यष म्।

मुखं व्याकरणं स्मृतमिति, शिक्षाकारेणोक्तम् एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति, इति श्रुतिवचनात् तथा तत्त्वबोधशब्दानां नास्ति व्यकरणादृते" भतृहरिवचनात् प्रधानं च षडङ्गेषु व्याकरणमिति भाष्यवचनात् च व्याकरणशास्त्रस्य प्रधानत्त्वं लोकोपकारकत्वं च दरीदृश्यते।

यदि व्याकरणशास्त्रप्रवर्तकाचार्याणां कृतानां व्याकरशास्त्रीयसूक्तीनां संग्रहो स्यात् तद् जनाः आदरेण पठिष्यन्ति, तथा च तदनुसारम् आचरणं करिष्यन्ति, इति मनसि निधाय अस्मिन् शोधनिवन्धे पतञ्जलिकृतानां केषांश्चित् सूक्तिपरकभाष्याणां लोकोपकारकरत्वं दर्शयामि।

**शब्दप्रयोगविषये सूक्तिनिर्मिता भाष्यकारेण-**

(क) शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन। शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते।[5]

(ख) आचारे नियमः-आचारेपुनर्ऋषिनियमं वेदयते, तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुरिति।[6]

धर्मविषयं-शब्दज्ञाने धर्मः

(ग) यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावत् व्यवहारकाले।

सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः।[7]

ऋमहाभाष्यकारेण विद्याभ्यासाय वक्तृत्वविकासाय च निर्मिता सूक्तिः-

(घ) चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति-आगमनकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेन[8]

(ङ) कूपखानकवदेतद्भविष्यति, तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदापांसुभिश्चावकीर्णो भवति.सोऽप्सु संजातासु तत एव तं गुणमासादयति येन स दोषो निर्हण्यते, भूयसा याभ्युदयेन योगो भवति।

एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन च स दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भविष्यति।

**व्रतविषये सूक्तिनिर्मिता भाष्यकारेण -**

(च) व्रताय नियमः-पयोव्रतो ब्रह्मणो, यवागूव्रतो राजन्यः, अमिक्षा व्रतो वैश्य, इत्युच्यते। व्रतं नामाभ्यवहारार्थमुपादीयते। शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम्। तत्र नियमः क्रियते।[10]

**शब्दार्थज्ञापूर्वकं अध्ययनं स्यात् एतदर्थं सूक्तिर्विद्यते-**

(छ) यदधीतम्-यदधीतमविज्ञातं निगदेनैव शब्दते अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।। तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्।[11]

सुरापानं न कर्तव्यम् इति विषयं सूक्तिर्निर्मिता

(ज) सुरा न पातव्याः, ब्रह्महत्या न कर्तव्याः।

यो ह्यजानन्वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात्।[12]

शास्त्रज्ञानपूर्वकमध्ययनम् एवं प्रयोगः स्यात्एतदर्थं सूक्तिर्विद्यते-

(झ) भगवता कृष्णेन गीतायामुक्तं यः शास्त्रविध्यानुसारं कार्यं करोति सः शास्त्रोक्तफलमपि प्राप्नोति, तथा च मोक्षमपि प्राप्नोति, तथा च यः शास्त्रविधिं त्यक्त्वा कार्याणि करोति न च सः सुखं प्राप्नोति व न मोक्षं प्राप्नोति-

**यः शास्त्रविधिमुत्सृज्य वर्तते कर्मकारतः।**

**न सिद्धिमवाप्नोति न सुखां न परांगतिम्।।[13]**

एवमेव भगवता भाष्यकारेण पतञ्जलिना पातञ्जलमहाभाष्ये उक्तं-शास्त्रपूर्वके प्रयोगेऽभ्युदयस्ततुल्यं वेदशब्देन, यः शास्त्रावबोधपूर्वकं यः शब्दार्थावबोधपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते। अतः

शब्दार्थावबोधपूर्वकं य: शब्दान् जानाति। तथा च शास्त्र नियमानुसारं य: शब्दान् प्रयुङ्क्ते स एव अभ्युदयेन युज्यते इति। अत्र महाभाष्यकारस्य आशय: वर्तते। यत् पूर्वं अस्माभि: वर्णितम्।

अत्र प्रदीपकारेण कैयटेनोक्तम्–तत्तुल्यं वेदशब्देन–

वेद: शब्दो यस्यार्थस्य स वेदशब्द:, तस्य यथा ज्ञात्वानुष्ठानं, तथा शब्दानामपि प्रकृत्यादिविभागज्ञानपूर्वक: प्रयोग: इत्यर्थ:[14]

वेद –ये शब्दराशिज्ञानपूर्वक– शब्दार्थज्ञानपूर्वकम् अनुष्ठानं कुर्वन्ति ते फलवन्तो भवति। एमेव ये प्रकृतिप्रत्ययविभागज्ञानपूर्वकं प्रयोगनियमं ज्ञात्वा शब्दान् प्रयुङ्क्ते तेऽपि फलवन्तो भवन्ति इति प्रदीपकारस्याशयो विद्यते।

शास्त्रपूर्वकस्य शब्दस्यार्थो नागेशभट्टेन कृत:–''व्याकरणाध्ययन–पूर्वकं इत्यर्थं। तत्र वेदाङ्गत्वात् एतद् व्याकरणाध्ययनपूर्वकप्रयोगे एव धर्म: इति प्रमाणिका:। वेद: शब्द: बोधक: इत्यर्थ:।''[15]

'योऽग्निष्टोमयागेन यजते य उ चैनमेव' योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद अयमेव–शब्दरूपो वेद: कथयति–ये विधिपूर्वकं अग्निष्टोमयोगं कुर्वन्ति, ते फलवन्तो भवन्ति, एवमेव ये शास्त्रपूर्वकं अग्निष्टोमयागं जानन्ति तेऽपि फलवन्तो भवन्ति। अपरमाह अन्ये व्याख्याकारा: कथयन्ति यथा वेदशब्दा: नियमपूर्वमधीता: फलवन्तो भवन्त्येवएवमेव य: शास्त्रपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते इति।

अत: भगवता भाष्यकारेण– ज्ञानपूर्वकप्रयोगे: एव धर्म: इति सूचित:

अस्मिन्नेव प्रकरणे भाष्यकारेण एका शंका कृता– यदा शब्दज्ञाने धर्म:, एवमपशब्दज्ञानेऽपि अधर्म: तदा भूयानधर्म: प्राप्नोति भूयांसोह्यपशब्दा: अल्पीयांस: शब्दा: अत: भूयानधर्म: प्राप्नोति–

**अस्मिन् विषये एकं सूक्तिपरकं समाधानं दत्तम्–**

कूपखानकवदेतद्भविष्यति–

यथा–कूपखानक: कूपं खनन् यद्यपि मृदापांसुभिश्चावकीर्णो भवति, सोऽप्सु तत एव तं गुणमासादयति येन स दोषो निर्हण्य भूयसा चाभ्युदयेन योगो भवति।

यद्यपि अपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन च स दोषो निर्धानिष्यते, भूयसा चाभ्युदयेन योगो भविष्यति।

आचारे नियमानां पालनं स्यात् एतदर्थं वार्तिकम् आचारे नियम:–प्रयोगे नियम: इति प्रदीपकार: कथयति।

आचारे–प्रयोगे व्यवहारे नियमानां पालनं स्यात् एतदर्थं वार्तिकमिदम्। यदि प्रयोगे नियमानां पालनं न भविष्यति तदा असुरसदृश: एव पराजयं मिलिष्यति।

असुरै: हे हे अरय: अरय: इत्यस्य स्थाने भ्रमवसाद् हेऽलय: हेऽलय: इति शब्दस्य प्रयोग: कृत:। अत: तै पराजय: प्राप्त:। पदद्वित्वस्य स्थाने वाक्यद्वित्वं कृतम्।

वस्तुत: हे अरय: इत्यत्र हैहेप्रयोगे हैहयो: इत्यनेन हे इत्यस्य प्लुतप्रकृतिभावौ च प्राप्नुत:। परन्तु सर्व: प्लुत: साहसमनिच्छतापि विभाषा कर्तव्या:। इति परिभाषया प्लुतस्तु अनिवार्यो नास्ति।

अत्र तिस्र: अशुद्धय: कृता:।

(1) हेऽलय: इत्यत्र पूर्वरूपसन्धि:।

(2) पदस्य द्वित्वस्य स्थाने वाक्यस्यद्वित्वम्।

(3) अरय: इत्यत्र रकारस्य स्थाने लकारस्य प्रयोग: असुरै: एता: तिस्र: अशुद्धय: कृता:

प्रयोगे नियमस्य पालनं न कृतं तै पराजय: प्राप्त:। अत: अस्माभि: नियमस्य पालनं कर्तव्यम् इति सूक्ति: वर्तते।

विद्याया: अभ्यासाय स्वध्यायो विधि अध्येतव्य: इति नियमपालनाय वक्तृत्वक्षमताया: विकासाय भाष्यकारेण सूक्तिपरकं भाष्यं रचितम्।

चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति–आगमनकालेन स्वाध्याय–कालेन प्रवचनकालेन व्यवहारकालेन इति।

धर्मशास्त्रे पञ्चमहापातकानि सन्ति, तेषु महापातकेषु सुरपानं ब्रह्महत्या च विद्यते।

अत: भाष्यकारेण धर्मशास्त्रपरकं भाष्यं दर्शितम्। लोके दृश्यते सुरापानब्रह्महत्यादिपञ्चमहापातकानि हानिप्रदायकानि भवन्ति। अत: इमानि कार्याणि न स्यु: एतदर्थं सूक्तिपरकं भाष्यमुक्तं–

यो ही अजानन् वै ब्राह्मणं हन्यात्। सुरां वा पिबेत् सोऽपिमन्ये पतित: स्यात्।

अनेन सूक्तिपरकभाष्येण ज्ञायते यत् ज्ञानं विनापि सुरां पिबति, तदा अपि स: पतितो भवति।

## सन्दर्भग्रन्थसूची


1. मनुस्मृति:
2. नीतिसंग्रह:
3. उपनिषद्वाक्यम्
4. वाक्यपदीयम्
5. महाभाष्यं प्रथमाह्निकम्
6. महाभाष्यं प्रथमाह्निकम्
7. महाभाष्यं प्रथमाह्निकम्
8. महाभाष्यं प्रथमाह्निकम्
9. महाभाष्यं प्रथमाह्निकम्
10. महाभाष्यं प्रथमाह्निकम्
11. महाभाष्यं प्रथमाह्निकम्
12. महाभाष्यं प्रथमाह्निकम्
13. भगवद्गीता
14. महाभाष्ये प्रदीपटीकायाम्
15. तत्रैव उद्योते
16. पा. सू. पा. 8/2/85


*सहायकाचार्य: ( अतिथि )*

*केन्द्रियसंस्कृतविश्वविद्यालय:, वेदव्यासपरिसर:, हिमाचलप्रदेश:*

ISSN 2456-3420

# श्रीमद्देवीभागवते सन्ध्यास्वरूपं तद्विमर्शश्च

डॉ. सुनील कात्यायनः

''श्रुतेरिवार्थं स्मृतिरन्वगच्छत्''[1] ''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी''[2] ''इतिहास-पुराणाभ्यां वेदं समुपबृंहयेत्''[3]

**श्रुतिस्मृती उभे नेत्रे पुराणं हृदयं स्मृतम्। एतत्त्रयोक्त एव स्याद्धर्मो नान्यत्र कुत्रचित्''[4]।।**

एतादृक्षु निष्कर्षप्रायिकेषु वाक्येषु प्रक्तनशास्त्राणां गभीरचिन्तनं सहजतया निर्दिष्टं वर्तते। अर्थात् ये च विषयाः धर्मब्रह्मगमकेन वेदेन प्रतिपाद्याः त एव स्मार्तग्रन्थैरपि। पृथिव्यां भौगोलिक दृष्ट्याऽपि अस्यां भारतभूमौ काचन विशिष्टता विशिष्टपरंपरा च राजते। यदत्रत्यर्षिभूतजना व्यावहारिकज्ञानेन सह ब्रह्मप्रतिरूपज्ञानस्यापि समीहां कुर्वते तत्पूर्त्यै च निरन्तरम् अन्वेषणेऽपि रता भवन्ति। एवं च अनादिभूतं वेदोदितं यद् ज्ञानं तद् ज्ञानमेतावद्दिवस पर्यन्तं केन प्रकारेण सुष्ठुतयाचरितं महापुरुषैः ? कथं च विषमपरिस्थितिषु अपि पालितं कथं च समाधेयम्। इत्येतादृक्शिक्षा रामायणमहाभारतप्रभृतीतिहासपुराणग्रन्थेभ्यः प्राप्यते।

ईशोपनिषदि-''**अविद्ययामृत्युं तीर्त्वा विद्ययामृतमश्नुते**''[5] इत्यादिषु मन्त्रेषु प्राप्तव्यत्वेन सोपानद्वयरूपं यादृक् बृहत्तया गूढतया सिद्धान्तं प्रतिपादितं तादृगेव सिद्धान्तं सन्ध्यादिकर्मणाऽपि सूक्ष्मेक्षिकया ज्ञातुं शक्यते येन ब्रह्मप्राप्तिरूपफलं प्रति उन्मुखत्वम् समायाति।

**सन्ध्येति पदार्थावबोधाय याज्ञवल्क्यस्मृतिटीकायाम्-**

''अहोरात्रयोः सन्धौ या क्रिया विधीयते सा संध्या। तत्र अहः सम्पूर्णादित्यमण्डलदर्शन-योग्यः कालः तद्विपरीता रात्रिः, यस्मिन् काले खण्डमण्डलस्योपलब्धिः सः संधिरिति।[6] मानवगृह्यसूत्रस्याष्टावक्र-भाष्यानुसारं 'संध्येति कर्मनामधेयत्वेन विमृष्टं निर्णीतञ्च।[7] प्रातर्मध्याह्न-सायंकालीनानां सन्ध्यायाः कालविशेषः-तारकोपेतासंध्या प्रातःकाले उत्तमा लुप्ततारका मध्यमा सूर्यसहिता चाधमा भणिता। एवमेव सायमपि-

उत्तमा सूर्यसहिता, मध्यमा लुप्तभास्करा अधमा च तारकोपेतेति[8] समादिष्टा। ''**अहरहः सन्ध्यामुपासीत...**'' इत्यादि श्रुतिवाक्यमुद्दिश्य गृह्यसूत्रेषु तत्परिशिष्टेषु तथैव च स्मृतिग्रन्थेषु सन्ध्याकर्मणः विविधानि प्राणायाम-मार्जनोपस्थानप्रभृतीनि मुख्यामुख्यानि चांगानि समाम्नातानि। येषु स्वपावनत्वम्, आचमन-प्राणायाम-मार्जनम्, अघमर्षण-सूर्यार्घ्य-सूर्योपस्थान-गायत्र्यु- पस्थान-जप-विसर्जनादीनि पृथक्पृथक्तया एकत्र वा विविधेषु संस्कृतवाङ्मयस्य ग्रन्थेषु उपदिष्टानि सन्ति। एतच्च कर्म स्नानमूलम्, यथा च वाधूलस्मृतौ-

**''स्नानमूलाः क्रियाः सर्वाः सन्ध्योपासनमेव च।**

**स्नानाचारविहीनस्य सर्वाः स्युर्निष्फला क्रियाः।।[9]**

देवीभागवतेऽपि बाह्यशुद्ध्या सह आन्तरिकी शुद्धिरपि भवति स्नानेन, तत्र मलिनदेहस्य, प्रतिग्रहीतुः, रहसि च पापकृतस्य शुद्धि र्भवति स्नानमात्रेण-

**अत्यन्तमलिनोदेहो नवद्वारैर्मलं वहन्।**

**सदास्ते तच्छोधनाय प्रातः स्नानं विधीयते।।[10]**

अनुष्ठानकर्मणि दर्भनिर्मितस्य पवित्रस्य पावकत्वं श्रुतावपि समाम्नातम्[11] अतः तस्य धारणं सन्ध्याप्रभृतीनां कर्मणामारम्भः कर्तव्यः तच्च धर्मब्रह्मेति सोपानद्वये प्रथमं धर्मरूपं .......वर्तते तथैव द्वितीयं ब्रह्मप्राप्तिरूपम् ईश्वरस्मरणं मन्त्रेण निर्दिष्टम् ''अपवित्रः पवित्रो वा... शुचिरिति'' अत्र काचन विशेषतास्ति यद् ईश्वरस्मरणं पुण्डरीकाक्षेति नाम्नो पाठेन कर्तुं भवति तथैव पुनातु इति क्रियया सह पुण्डरीकाक्ष पदं अनुष्ठातारं पवित्रमपि कुरुते। अर्थात् सः कमललोचनरूपेश्वरः अनुष्ठातु- हृद्देशे स्वकीय सौन्दर्येण विराजमानो भवति सदैव तस्येश्वरस्य पावकत्वमपि पावकनेत्रेति तात्पर्यार्थोपाधिना संभवति, यतोहि-

पुण्डरीक इति भेदविशेषोऽस्ति कुशतृणस्य यथा चोक्तमपि-

**कुशाः काशास्तथा दूर्वा यवपत्राणि व्रीहय।**

**बल्वजाः पुण्डरीकाश्च कुशाः सप्तप्रकीर्तिताः।।[12]**

अर्थात् पुण्डरीकाक्षेति नामोच्चारणेन 'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' इति द्वयोः अविद्याविद्ययोः चरितार्थता सफलतामाप्नोति।

तदेव प्रकारान्तरेणोक्तम्-

**धर्मात्संजायते भक्तिर्भक्त्या संजायते परम्।**

**श्रुतिस्मृतिभ्यामुदितं यत्स धर्मः प्रकीर्तितः।।[13]**

एवमेव आचमनमपि षड्विधं प्रोक्तम्-

1. मूत्रपुरीषानन्तरं शुद्धये क्रियमाणम् - शुद्धाचमनम्।

2./3. सन्ध्यादिकर्मसु प्राक्क्रियमाणम्-स्मार्ताचमनम्, पौराणाचमनञ्चेति।

4./5. ब्रह्मयज्ञरूपस्य वेदस्वाध्यायस्य प्राक्क्रियमाणम्-वैदिकाचमनम्, श्रौताचमनञ्चेति।

6. अन्नविद्यादेः प्राक्क्रियमाणम्-तान्त्रिकाचमनञ्चोच्यते।[14]

मुख्यतया त्रिविधं प्रोक्तम्-श्रौतं स्मार्तं पौराणं चेति।

दक्षिणकर्णस्पर्शनमपि विशिष्टशुद्धिकारकम् आचमनरूपं प्रथितमस्ति। क्षुते निष्ठीवने दन्तैरुच्छिष्टस्पर्शनेऽनृतभाषणे पतितजनैश्च सम्भाषणादिषु दक्षिण-श्रवणं स्पृष्टव्यम्[15]। यतोहि विप्रस्य दक्षिणकर्णे-

अग्निः, आपः, चत्वारो वेदाः, सोमः, सूर्यः, वायुश्च विराजमाना भवन्ति। उक्तमपि–

**अग्निरापश्च वेदाश्च सोमःसूर्योऽनिलस्तथा।**

**सर्वे नारद विप्रस्य कर्णे तिष्ठन्ति दक्षिणे।**[16]

दर्शपौर्णमासादीष्टिषु जलस्पर्शनमेव अमेध्यान् (अयज्ञियान्) पुरुषान् मेध्यान् करोति, येन पुरुषोऽनुष्ठानेषु अधिकृतो भवति।[17]

आचमनकर्मणि यथा जलं शुद्धिहेतुरूपं तथैव तत्रत्यानि प्रोक्तानि ईश्वरनामान्यपि परमत्वप्रापकाणि सन्ति। तत्र मुख्यतया त्रीणि चतुर्विंशति नामानि वा स्मारं-स्मारम् आचमने प्राशनं विहितम्।[18] तत्र केशव-नारायणमाधवेति त्रीणि प्राशने सम्पादनीयानि। हस्त मुखप्रक्षालने च द्वे गोविन्दविष्णुसहितानि पञ्च प्रयोक्तव्यानि[19]। एतेषु ईश्वरनामशब्देषु बहूनि वैशिष्ट्यानि समाहितानि, येषामर्थावबोधे निष्णाततत्वं च परब्रह्मप्राप्त्यै आवश्यकमेव। अत एवोक्तमपि-''शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छती''ति।

तानि च नामानि एतानि–

केशवः[20]–को ब्रह्मा, ईशो महारुद्रः तौ द्वौ प्रेरयतीति केशवः अथवा प्रशस्ता उत्तमाः केशा अस्य सन्तीति वा केशव इति।

नारायणः[21]–अरा दोषाः, तद्विरुद्धा गुणा नाराः, तेषामयनमिति नारायणः अथवा अराणां दोषाणामयनं नास्ति दोषाश्रयो न भवति दोषगन्धविधुर इति वा नारायणः।

अथवा- नारं ज्ञानं विषयतया तदयनत्वाद्वा नारायणः अर्थात् गुणानामयनरूपः, दोषरहितः, ज्ञानकोषादिरूपश्च नारायण इति ।

माधवः[22]–माया लक्ष्म्या, धवः पतिरिति लक्ष्मीपतित्वाद्वा माधवः। अथवा मधुविद्या विषयत्वाद्वा माधव इति।

गोविन्दः[23]

गामविन्दत्समुद्रमग्नां पृथ्वीप्राप्तत्वाद्वा। गां वाणीं विन्दत इति वा। गोभिर्वेदैर्वेद्य इति वेदवेद्यत्वाद्वा गोविन्द।

विष्णुः–वेवेष्टीति सर्वजगद्व्याप्तत्वाद्वा, विशिष्टबलचेष्ट स्वभावत्वाद्वा विष्णुः। तापनीय श्रुतिरपि-''अथ कस्मादुच्यते महाविष्णुरिति यस्मात् स्वमहिम्नः सर्वांल्लोकान्सर्वान्देवान्सर्वानात्मनः सर्वाणि भूतानि व्याप्नोति व्यापयतीति विष्णुः[24]।

तथैव प्राणायामोऽपि पूरक-कुम्भक-रेचकविधिना सर्वैः ब्रह्मचारि[25]-गृहस्थी-वानप्रस्थ्यादि-भिस्सम्पाद्यमानो वारत्रयं च विहितोऽस्ति। यथोक्तमपि–

''रेचकः सृजते वायुं पूरकः पूरयेत्तु तम् । साम्येन संस्थितिर्यत्तत्कुम्भकः परिकीर्तितः''[26] इति।

प्रथमं वामनासिकया श्वासग्रहणकाले चतुर्भुजं हरिं ध्यायन् पूरकम् ततः तद्वायुं हृदि धारयन् कमलासनं चतुर्वक्त्रं पितामहं ध्यायन्कुम्भकम्, ततश्च वायोः बहिष्तात् प्रक्षेपणे दक्षिणनासिकया ललाटस्थं शंकरं ध्यायन् रेचकं च सम्पादयेत्[27]। इति सामान्यतया प्राणायामोक्तः।

तन्मन्त्रमपि–

**गायत्रीं शिरसासार्धं जपेद् व्याहृतिपूर्विकाम्।**

**प्रतिप्रणवसंयुक्तां त्रितयं प्राणसंयमः।।**[28]

अत्रत्यमन्त्रे भूरादि सप्तलोकानां प्रणवपुरस्सरं पाठं कृत्वा शिरसा (अर्थात् आपो ज्योती.... स्वरोम्) सहितायाः गायत्र्या जपो विहितः। तत्र तात्पर्यम्- यद्भूरादि सप्तभिर्व्याहृतिनामभिः सप्तोर्ध्वलोकाः उपलक्षणेन च तलादयः सप्ताधोलोकाश्च स्मर्यन्ते। तथैव सर्वत्रैतेषु लोकेषु व्याप्यमाणं ब्रह्माण्डं सर्वलोकस्थजीवाश्च परब्रह्मैव, ततो परब्रह्मणो न भिन्ना इति बोधयितुं सप्तवारं ऊँकाररूपपर- ब्रह्मणः-प्रयोग उच्चारणं विहितम्। ऊँकारस्य परब्रह्मणा सह तादात्म्यं श्रुतिस्मृतिषु बहुश उद्घोषितमपि- ''ओमित्येकाक्षरं ब्रह्म''[29] ''ओमितीदं सर्वम्''[30] ''प्रणवः सर्ववेदेषु''[31] ''ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्निति च''।

प्राणायामानन्तरं प्रातःकालीनादि आचमनं, ततः मार्जनम्, अघमर्षणादि सम्पाद्य वारत्रयं सूर्यार्घ्यं सूर्याय देयम्, मध्याह्ने एकवारं पुनश्च सायं वारत्रयम् दातव्यम्। कालातिक्रमे जाते च एकाधिकं देयम्। तत्र सूर्यार्घदाने हेतुरुच्यते–

**''त्रिंशत्कोट्यो महावीरा मन्देहा नाम राक्षसाः।**

**कृतघ्ना दारुणा घोराः सूर्यमिच्छन्ति खादितुम्।।**

**ततो देवगणाः सर्वे ऋषयश्च तपोधनाः।**

**उपासते महासन्ध्यां प्रक्षिपन्त्युदकांजलिम्।।**

**दह्यन्ते तेन दैत्यास्ते वज्रीभूतेन वारिणा।।**[32]

तत्र शरीरव्यवस्थायां प्रातः नम्रीभूय, मध्याह्ने दण्डवत्स्थितः, सायं चोपविष्टः अपः क्षिप्त्वार्घो देयः।

तदनन्तरं सूर्योपस्थानगायत्र्युपस्थान प्रभृतीनि यथाविधि कृत्वा विविधन्यासमुद्रादिना गायत्रीमुपास्य जपित्वा सन्ध्याकर्मेदम् अनुतिष्ठेत्। एतच्च परमावश्यकं कर्म, अक्रियमाणे सति

**दक्षवचसा प्रत्यवायः श्रुयते–**

**''सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु।**

**यदन्यत्कुरुते नित्यं न तस्य फलभाग्भवेत्।।**[33]

यद्यपि धर्मज्ञापकं ब्रह्मप्रापकं चेदं कर्म संग्रहेण बीजांकुरणरूपं प्रवर्तते परं चास्य महत्ता नास्ति न्यूना, अपितु ब्रह्मप्रापिकात्वेन प्रसिद्धिः प्रथितास्ति। यमोक्तौ–

सन्ध्यामुपासते ये तु सततं संशितव्रताः। विधूय पापं ते यान्ति ब्रह्मलोकं सनातनम्।''[34] इति।

वेदस्य तदुदितधर्मानुष्ठानानां च संध्येयं मूलरूपात्वेन वर्णिता तदेतच्छ्लोकव्याजेनोदीर्य लेखोऽयं शम्यते–

**विप्रो वृक्षो मूलकान्यत्र सन्ध्या।**
**वेदाः शाखा धर्मकर्माणि पत्रम्।**
**तस्मान्मूलं यत्नतो रक्षणीयम्।**
**छिन्ने मूले नैव वृक्षो न शाखा।।[35] अस्तु।**

**शोधसारः**

''अहरहः सन्ध्यामुपासीते''ति श्रुत्या विहितमनुष्ठानमिदं विविधेषु शाखीयग्रन्थेषु विस्तरप्राप्तं स्मृतिपुराणादिभिश्च विप्रजनसामान्येभ्यः सरलभाषया निर्दिष्टं कर्मास्ति सन्ध्याकर्म। श्रीमद्देवीभागवतमहापुराणे आह्निककृत्येषु शौचाचारेण सह रुद्राक्षधारण-भस्मस्नान- गायत्री-विशेषोपासनादीनि च सन्ध्यासहितानि निरूपितानि। अस्मिन् संध्याकर्मणि पवित्रीकरण- प्राणाया- मादीनि लेखेस्मिन् निरूप्यन्ते विमृश्यन्ते च।'

## पादटिप्पणी

1. रघुवंशम् 2.2
2. श्रुयते-वाल्मीकिरामायणे
3. महाभारतम् 1/1/267
4. श्रीमद्देवीभागवते 11/1/21
5. ईशोपनिषदि- 14
6. मिताक्षराटीकायाम् 1-24
7. मानवगृह्यसूत्रम् 2/1
8. देवीभागवते
9. स्नानविधिः 67
10. दे. भा.-11/3/4-7
11. माध्यन्दिनसंहिता 1/12
12. यज्ञमीमांसा, पृ0 372
13. दे. भा. 7/39/14-15
14. तत्रैव 11/3/1 (कुतश्चिदुद्धृत्य प्रक्षिप्ततया प्रदर्शितः)
15. तत्रैव 11/3/2
16. तत्रैव
17. शत. ब्रा. 1/1/1/1
18. दे. भा. 11/16/22
19. तत्रैव
20. सन्ध्याभाष्यसमुच्चयः पृ. 39-40
21. तत्रैव
22. तत्रैव
23. तत्रैव
24. सन्ध्याभाष्यसमुच्चयः
25. तत्रैव
26. दे. भा. 11/16/28
27. तत्रैव
28. तत्रैव
29. सन्ध्याभाष्यसमुच्चयः पृ. 1
30. तत्रैव
31. श्रीमद्भगवद्गीतायाम् - 7/3
32. दे. भा. 11/16, 53-55
33. संध्याभाष्यसमुच्चय पृ. 37
34. तत्रैव पृ. 37
35. दे. भा. 11/16/6

*उपाचार्यः, वेदविभागः,*
*संस्कृतविद्याधर्मविज्ञानसंकायः,*
*काशीहिन्दूविश्वविद्यालयः, वाराणसी*

ISSN 2456-3420

# ज्योतिषशास्त्रायुर्वेदशास्त्रयोःमिथःसम्बन्धः

सुनीलकुमारः

वैदिककालतः ज्योतिषायुर्वेदयोः घनिष्ठः सम्बन्धो अस्ति। पूर्वजन्मार्जितकर्मज्ञानाय ज्योतिष शास्त्रस्य आवश्यकता वर्तते। यथा वृक्षस्य समावेश तस्य बीजं संगृहितो अस्ति तथैव ज्योतिषशास्त्रे मानवजीवनस्य कृतकर्मणां तस्य जन्मकुण्डल्याम् भवति। अतः जन्मकुण्डल्यानुसारं मानव जीवनस्य भाग्यफलं निर्धारितं भवति।[1] आयुर्वेदसिद्धान्तानुसारेण कर्मप्रकोपेन दोषप्रकोपेन रोगानामुत्पत्तिर्भवति।[2] वस्तुतः कस्मिन् काले जीवने सुखदुःखादि भविष्यति कस्य कृते कः शुभाशुभं च भविष्यति। एतेषाम् समेषांप्रश्नानां निराकरणं ज्योतिषे भवितुमहर्ति। ग्रहप्रभावेन जनाः शुभाशुभंनिर्वाहंकुर्वन्ति। एतद् तु पूर्वकृत सञ्चितकर्मणः परिणामस्वरूपं भवति। उक्तञ्च यथा वराहमिहिरेण–

**''यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम्।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।''[3]**

प्राचीन काले वैदिकमन्त्राणां प्रयोगात्मकं रूपं यज्ञादि माध्येन लभ्यते। यज्ञ शब्द वैज्ञानिकप्रयोग तथा विशिष्टलक्ष्यनां दर्शयन्ति। मनोविज्ञानद्वारा शल्यचिकित्सा तथा औषधीनाम् प्रयोगं भवति स्म। ज्यौतिषायुर्वेदयोः आधाराः वेदाः सन्ति। यतोहि सर्वविधशान्ति–विधानं–उत्पातशान्तिः–अरिष्टशान्ति–रोगोपशमनम् अभिषेकः आरोग्यः पौष्टिक कर्मणि च वेदेभ्यः सम्बन्धिताः। प्राचीनकाले जन्मचक्राधारेण वेदेः रोगाणां परीक्षणं करोति स्म। रोगीणाम् बाह्य लक्षणानि आन्तरिक रोगानां परिचायकाः भवन्ति। जन्मकुण्डल्याधारेण तथा च प्रश्नकुण्डल्याधारेण चिकित्साप्रणाल्याः प्रभाविताः आसन्। प्रश्नलग्नकुण्डल्याः यदिपापग्रहैः युतमथवा दृष्टं लग्नं भवेत्तर्हि जातकस्य रोगः असाध्यः भवति तथा च लग्नेशः निर्बलःअष्टमेशो बली अथवा शनि–भौमेन दृष्टः तर्हि मृत्युकारको भवति।[4] ग्रहाणां विकरणेन अर्थात् रश्मिद्वारा समस्तजगद्प्रभावितो भवति। सूर्य तथा चन्द्रस्यविकिरणैः वनस्पतिःखनिजः वायुः तथा अन्येषु तत्वेषु भौतिकं रासायनिकञ्च परिवर्तनं भवति। प्राचीनैः बहुविध शोधद्वारा ज्योतिषशास्त्रस्य चिकित्सायाश्च उल्लेखः कृतः आचार्य–मन्त्रेश्वरेण फलदीपिकायां खनिज–वनस्पति द्रव्यानां विशद् वर्णनं कृतम्।[5]

सर्वेषां ग्रहाणां कक्षाकेन्द्राश्रयो अस्ति भूः। सूर्यकक्षायामपि मेष–वृष–मिथुन द्वादशराशीनां तथा च अश्विनी–भरणी–कृतिकादिसप्तविंशति नक्षत्रणाञ्च स्थानानि वर्तन्ते। तदर्थं सूर्यचन्द्रादिनवग्रहाणां–द्वादशराशीनां–सप्तविंशति नक्षत्राश्च प्रभावेण प्रभाविताः भवन्ति इमे पार्थिवाः। यदि च सर्वे पार्थिवाः ज्योतिश्चक्रद्वारा प्रभाविताःभवन्ति, तथापि पाञ्चभौतिकस्य रक्त–मांस–पुरूषादिभिः निर्मितप्राणिमात्रस्य ज्ञानविज्ञानव्यवहार–कुशलस्य मानवस्योपरि विशेषप्रभावः वरीवर्ति एव। रव्यादयः ग्रहाःपञ्चभूतानाम्, अस्थ्यादिनाम्,कटुलक्षणादि रसानां वात–पित्त–कफादि त्रिदोषाणाञ्च कारकाः इति अस्य ज्योतिषशास्त्रस्य होराग्रन्थेषु प्रतिपादितः।[6] ग्रहैः प्रभावेण जातकस्य जीवने कष्ट–सुख–रोगाः भवन्ति।

**पञ्चभूतात्मक विचारः–**

''अग्नि–भूमि नभस्तोय वायवः क्रमतोदिवज
भौमादिनां ग्रहाणां तु तत्वान्येतानि वै क्रमात्।''[7]

भौमादिपञ्चताराग्रहाणां यथाक्रमं अग्निः, भूमिः, आकाशः, जलं, वायु एतानि धातुतत्त्वानि भवन्ति अतः जातकस्य जीवनेग्रहस्यप्रभावेण–रोगाः भवन्ति।

यथैव सांख्यायोगदर्शन समस्तचेतनाचेतनादिजगतःस्योत्पत्ति पञ्चमहा–भूतानांसम्मिश्रेण मन्यते तथैव आयुर्वेदे अपि शरीरस्य मलदोषाः, धातूनामोत्पत्तिपञ्चमहाभूतेभ्यः मन्यते।[8]

**ग्रहाणां रसविचारः–**

**''कटुश्च लवणास्तिको मिश्रितो मधुरोअम्लकः।**
**कषायः क्रमशोज्ञेयाःसूर्यादिनामिमे रसाः''।।[9]**

अत्र सूर्यादि सप्तग्रहाणां यथाक्रमं कटुः, लवणः, तिक्तः, मिश्रितः, मधुरः, अम्लः, कषाय इति एतानि रसतत्वानि वर्तन्ते। अतः जातकस्य शरीरोपरि ग्रहस्य रोगस्थितिवशात् विकारो भवति। आयुर्वेदे अपि मूलरूपेण षड्रसाः मन्यन्ते।

**''स्वादुरम्लोअथ लवणः कटुतिक्त एव च।**
**कषायश्चेति षटकोअयं रसानां सग्रहः स्मृतः।''[10]**

मधुराम्ल लवणः कटु–तिक्त–कषायादि रसेषु द्रव्यानामुपस्थिति वर्तते। द्रव्येषु एतेः रसाः महाभूतानां विधमानता हेतु आधारभूताः सन्ति थात्वक् द्वारा स्पर्शज्ञानं भवति तथैव जिह्वा द्वारा रसस्य अनुभूति भवति।[11] ज्योतिषमाध्यमेन रोगाणां प्रकृतिः–प्रभाव–निदानं–कारणञ्च विश्लेषणं भवति स्म। आधुनिकोपकरवानां सहायेन रोगस्य सूक्ष्मता निश्चयः कर्तुं शक्नुमः। एतस्य कृते धनव्ययं शारीरिकपीडामनुभूयते। यदि कश्चन् विद्वान् ज्योतिषमाध्येमेन रोगाणां विषये ज्ञात्वा रोगःकदा कुत्र केन कारणेन भविष्यति तत् सर्वं ज्ञात्वा उचितपरामर्शेण समाधानमुपस्थातुं शक्नुवन्ति।

आधुनिकचिकित्साविज्ञानं रोगस्य कारणं विषाणुं रोगाणुं च मन्यते। आयुर्वेदशास्त्रे वात पित्त कफ दोषाणां विषये ज्ञात्वा रोगानां निवारणं भवति तथैव ज्योतिष शास्त्रे एतादृशं योगमुपस्थापयति। यथा माधव निदानग्रन्थे वात–पित–कफ प्रमेहानां वर्णनं लभ्यते।

ISSN 2456-3420

**करोति मेहान्समुदीर्षामुष्णैस्तानेव पित्तं परिदूष्य चापि''।।**

''**क्षीणेषु दोषेष्ववकृष्य धातून् सन्दूष्य मेहान्कुरुते अनिलश्च।**''[12]

एवं प्रकारेण ज्योतिष दृष्टया: उपस्थापयते-

''**पितोष्णज्वरतापदेहतपनापस्मारहृतक्रोडजव्याधीन्वक्ति।**

**रविर्हगार्त्यरिभयं त्वग्दोषमस्थिस्तुतिम्।**''[13]

जातकपरिजात ग्रन्थे उक्तमस्ति

''सदाग्निरोगज्वरवृद्धिदीपन क्षयातिसारदिकरोगसंकुलम्।''[14]

वागभट्ट विरचितस्य अष्टाङ्गहृद्येग्रन्थे आत्रेयादि महर्षिणाम् वचनानुसारं

''ऋतो ऋतो चर्या ऋतुचर्या''[15] अर्थात् ऋतवानुसार आहार विहार सेवनादि ''कार्यं ऋतुचर्या भवति। माघादि दिसंख्यैः शिशिर: वसन्त: ग्रीष्मो बर्षशरद: हेमन्तश्च क्रमात् षड् ऋतवा: भवन्ति।

''**मासैर्दिसंख्यैर्माघाधैः क्रमात् षड्ऋतव: स्मृता:**

**शिशिरोअथ वसन्तश्च ग्रीष्मो वर्षाशरदिमा:**''।[15]

ससांरस्य समस्त आदानकालं यथा तिथि-वार-नक्षत्र-ऋतु अयनादि सूर्यद्वारा सम्भवमस्ति यतोहि कर्कराशित: दक्षिणायनं तथाच मकरादि राशित: उत्तरायणस्य प्रवृतिर्भवति। यदि मकरमर्को न प्राप्यति तर्हि दक्षिण पश्चिम प्राप्यति तेन कारणेन दक्षिण-पश्चिमस्थितजनानाम् नाशं भवति। यदि कर्कराशिं विहाय उतरदिशं प्रति गमनं करोति चेत् पूर्वोत्तर जनानाम् विनाशं करोति।[16] वाग्भट्टविरचित अष्टाङ्हृद्ये नामक

आयुर्वेद ग्रन्थे अयनादि वर्णनं विद्यते। शिशिरादया: त्रिभि:तैः उत्तरायणं कथ्यते तदा अस्मिन् काले नृणां बलम् न्यूनं भवति। यतोहि अत्यर्थ तीक्ष्णोष्ण रूक्षा: पृथ्विया: सोम्यान् गुणान् क्षप्यन्ति तथा तिक्त: कषाय: कटुक: रसा:क्रमात् शिशिर-वसन्त-ग्रीष्म ऋतुषु वलिन: भवन्ति। अत: कालोअम् अग्नि अर्थात् आग्नेय काल: मस्ति।[17]

वर्षादय:(वर्षा-शरद-हेमन्त) ऋतव:दक्षिणायनम् यत् अयं बलं विसृजति अर्थात् बलं प्रदानं करोति। अत: अस्मिन कालस्य विसर्ग काल अपि कथ्यते।सूर्यस्य दक्षिणदिशि गमनेन तेज:न्यूनं भवति। तत्र स्वभावेन चन्द्रबलि भवति तथा स्निग्धा अम्ल-लवण-मधुर पदार्था: वलिन: भवन्ति। अत: ''सोम्य कालं''[18] कथ्यते।ज्योतिषशास्त्रानुसारं यदि सूर्य उत्तरायणं प्रति अतिक्रमणं करोति चेत् तदा लोकानां कल्याणं तथा धान्यावृद्धि करोति कर्के प्रवेशान्तरे अपि लोकानां हितं भवति।

यतोहि प्रकृतिस्थ पूर्वोक्त फलं सम्यक् तथा विकारयुक्तगमनं लोकानां ह्रास: करोति।[19] तत्र गर्गमतानुसार हीनं भयावहे लोके दुर्भिक्षप्रदो भवति।

आयुर्वेदानुसारं शीते प्राणीनां बलम् उत्तमं भवति वृष्टि एवं ग्रीष्म ऋतौ अल्पं भवति अन्य शेषयो: मध्यं बलं भवति।[20] परञ्च अत्र सूक्ष्मरूपेण वर्णनं लभते प्राणिनाम् शुभाशुभं ज्योतिषशास्त्रेव सम्भवं भवति। ग्रीष्मर्तुमध्ये रक्तवर्ण रविमण्डलं भयं करोति तथा वर्षाऋतौ अनावृष्टि करोति हेमन्त ऋतुमध्ये पीतवर्णमण्डलं शीघ्रं रोगकारिण: भवति।[21] तत्र आयुर्वेदानुसारं सूर्यबलं क्षीणतमं भवति। तत्र मानवानां कृते बलिन: अनिल: तीव्रं भवति। अल्पेन्धन: वायुना प्रेरित: धातून् पचेत् अर्थात् अल्पाहारं सम्यक् रुपेण ग्रहीत्वा जठराग्निं प्रदीप्तं करोति तथा रसादिधातूनां पाचन सम्यक्तया भवितुमर्हति।[22]

अत्र कारणमस्ति यत् हेमन्ततर्तौ शीतेन शरीरस्य रक्तवाहिनी कोशिका एवं रोमछिद्रा: सकुंचिता (Narrow) भवन्ति तेन कारणेन उष्मानिष्कासनमवरूधति तथा जठराग्नि प्रदीपनार्थाय वायुसहायकं भवितुं शक्नोति। अस्मिन् ऋतौ धातूनां पुष्टि एवं वृद्धि विशेषरुपेण भवति सम्भवत: गीतायां भगवता श्रीकृष्णेन कथ्यते ''मासानां मार्गशीर्षो अहम्''[23] अर्थात् हेमन्त ऋतु प्रधान मास: अगहन (मार्गशीर्ष) मासमस्ति।

## पादटिप्पणी

1. भारतीयज्योतिष,पृ.स.229
2. कर्मजा:व्याध्य: केचित् दोषजा: सन्ति चापरे। चरकसंहिता उत्तरतन्त्र 40
3. लघुजातक 1.3
4. भारतीय ज्योतिष पृ.स.427
5. फलदीपिका,ग्रहभेदाध्याय शलोक स.28,29
6. सांख्ययोगायुर्वेदत्रिवेणीधारा प्र.ब. 2015 ज्योतिषेआयुर्विज्ञान-विष्णुकुमारनिर्मल
7. पाराशरहोराशास्त्र
8. आयुर्वेद सिदान्त रहस्य, अ.2 पृ. 16
9. पाराशरहोराशास्त्रम्
10. चरकसूत्र 1.65
11. रस्नार्थो रसस्तस्य द्रव्यमाप: क्षितिस्तथा। चरकसूत्र 1.64
    मेदश्च मासंश्च शरीरजं च क्लेदं कफो वस्तिगत: विदूष्य।
12. मादवनिदान,प्रमेहरोगनिदानम् 2-3 शलोक संख्या
13. फलदीपिका,मन्त्रेश्वर: अ.14 श.2
14. जातकपरिजात: वैद्यनाथ:,ग्रहस्वरूपागुणाध्याय अ.2,श.75
15. अष्टाङग् तृतीयोध्याय पृ.स. 47
16. अष्टाङ्हृद्य 3.1
17. वृहत्संहिता आदित्याचाराध्याय 2.4 पृ. 16/17
18. अष्टाङग हृद्य ऋतुचर्याध्याय ङ पृ.48
19. अष्टाङग हृद्य ऋतुचर्याध्याय 4.5.6
20. वृहत्संहिता आदित्याचाराध्याय 5 पृ.17
21. शीतेअग्रयं वृष्टिधर्मैअल्पं बलं मध्यं तु शेषयो:। अ. हृ. ऋतु. पृ. 50
22. वृहत्संहिता आदित्यचाराध्याय: 26 पृ. 22
23. अष्टांङ्हृद्य ऋतु. 7/8 पृ.51
24. श्रीमद्भाग्वद्गीता 7

*शोधच्छात्र:*

*केन्द्रियसंस्कृतविश्वविद्यालय:, वेदव्यासपरिसर:, हिमाचलप्रदेश:*

ISSN 2456-3420

# पर्यावरणसंरक्षणे वृक्षायुर्वेदस्य योगदानम्

चुनीलालः

पर्यावरणसंरक्षणं नाम पर्यावरणस्य सुरक्षा भवति। वृक्षादीनां मानवजीवने अत्यधिकं महत्त्वं विद्यते। वृक्षाः मानवानां कृते अत्यधिकोपयोगिनः सन्ति। ते एव मानवजीवनाधाराः परञ्च अद्य जनाः एतेषां महत्त्व न विज्ञाय एतेषां प्रयोगे उपेक्षां दर्शयन्ति। गौणलाभानां महत्त्वं प्रदर्शमानाः निरन्तरं दोहनं कुर्वन्ति। यावान् वृक्षान् कर्तयन्ति तावन् एव रोपयित्वा:परञ्च एवं न क्रियते। वृक्षाणां संख्या निरन्तरुपेण क्षयमाजोति परिणामतः नैका समस्याः अस्माकं समक्षम् आगच्छन्ति। पर्यावरणसंरक्षणं किमर्थमिति प्रश्नोत्पद्यते। सर्वेऽपि प्राणिनः वनस्पतिजगति आश्रिताः सन्ति। मानवाः ऑक्सीजन श्वासद्वारा ग्रहीत्वा जीवन्ति। वृक्षा एव प्रकाशसंश्लेषण क्रियायाम् ऑक्सीजन उत्पादयन्ति। अतः एव वृक्षाः मानवजीवनाधाराः मन्यन्ते। प्राणीनामाहारोऽपि वनस्पतयः। ताः मानवानां पोषणं कुर्वन्ति। पूर्वस्मिन् उद्योगाः एव विकासधाराः आसन्। खाद्योत्पादने कृषिकार्येषु च अवधानं क्रियते स्म। परञ्च वनानां महत्त्वसम्पादने यावत् अवधानमावश्यकं तावात् न दीयते।

यत्र वृक्षाणां विस्तारः भवति स्म। तान् कर्तयित्वा कृषियोग्या भूमिः निर्मीयते स्म। साम्प्रतिके काले प्रदूषणस्य समास्या मुख्या दृश्यते। यथा- जलप्रदूषणम्, वायुप्रदूषम्, मृदाप्रदूषम् ध्वनिप्रदूषणं इत्यादयः एतेषु नियन्त्रणमावश्यकं वर्तते। यथा-जलप्रदूषणनियन्त्रणम्-

सृष्टिसंचाले जलस्य महत्ता अत्यधिका वर्तते। संस्कृतसाहित्येऽपि जलतत्त्वस्य महत्त्वं तथा च शुद्धतायाः चिन्तनं विस्तरेण कृतं वर्तते। ऋग्वेदे जलाशयानां शुद्धताविषये वर्णितमस्ति। अथर्ववेदेऽपि उक्तमस्ति यत् जलस्य शुद्धता आवश्यकी। जले मल-मूत्र इत्यादीनां अपशिष्टपदार्थानां त्यागः ब्रह्महत्यातुल्यं मन्यते। यथोक्तमस्ति शाडिल्यस्मृतौ-

**नाचरेप्लवनक्रीडां न गण्डूषं जले क्षिपेत्।**

**अन्योऽयं नोक्षिपेत्तोयं न देहमलमुत्सृजेत्॥**[1]

महाभारतेऽपि उच्यते-

**अल्पा इति मतिं कृत्वा यो नरो बुद्धिमोहितः।**

**श्लेष्ममूत्रपुरीषणि युष्मासु प्रतिमोमोक्ष्यति॥**

**तमियं मास्मति क्षिप्रं तत्रैव च निवस्यति।**[2]

इतोऽपि शास्त्रेषु यथा-स्कन्दपुराणे, विष्णुपुराणे कूर्म-वराहादिपुराणेषु जलदूषणस्य निषेधः प्राप्यते। यजुर्वेदे कृषिकार्यार्थं शुद्धजलस्य प्रयोगेवशात्-विषये विचार कृतः यतोहि अशुद्धजलस्य प्रयोगवशात् स्वास्थ्ये प्रतिकूलप्रभावः सम्भवति माऽपोहिंसी[3] इत्यनेन कथनेन जलदूषणस्य निषेधो क्रियते। वस्तुतः शुद्धजले अमृतं भवति तथा च औषधीनां निवासः भवति। यथा-ऋग्वेदे उक्तमस्ति अप्स्वन्तरमृतम् अप्सु भेषजम्[4]।

वायुप्रदूषणे नियन्त्रम्-वायोः शुद्धतायाः स्थानं मानवजीवने अत्यन्तं महत्त्वपूर्णं विद्यते। वायुं विना क्षणमपि जीवनंसम्भवति। अतः वैदिकऋषिभिः प्रार्थ्यते-

**आ वात वाहि भेषजं वि वात वाहि यत् रप।**

**त्वं हि विश्वभेषजो देवानां इत ईयसे॥**

अर्थात् हे वायुदेव! भवान् व्याधीनां निराकरणाय कल्याणयुक्तम् औषधम् आनय। यत् अहितकरं मलं विद्यते तं निवारय। वायु जड़पदार्थातपि गतिं प्रददाति तथैव अस्माकं शरीरे बवेन अंगान् परिचालयति।

घां मा लेखीः अन्तरिक्षं मा हिंपीः इति यजुर्वेदे वर्णयति।

**ध्वनिप्रदूषणे नियन्त्रणम्-**

साम्प्रतिके काले ध्वनिप्रदूषणमपि विराटरुपं धारयति। वैदिकध्वनिभिः प्रदूषणस्य समस्यायाः उपरि नियन्त्रणं कर्तुं शक्यते स्म। स्वास्थ्यदृष्ट्या वेदेषु अपि ध्वनिप्रदूषणनिवारणाय परस्परं मन्दतया तथा च वक्तव्यमिति उच्यते। यथा- अथर्ववेदे-

**मधुमतीं वाचं वदतु शान्तिवाम।**

**सभ्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया।**[6]

**मधुरध्वनिः सृष्टिं सुन्दरं मधुमयं च करोति।**[7]

**उग्रं वचो अपावधीः**[8]

इति सामवेदे आयाति।

**मृत्तिका प्रदूषणे नियन्त्रणम्-**

माताभूमिः पुत्रोऽहं पृथिव्याः इति अथर्ववेदः प्रतिपादयति। पुत्रस्य मातरं प्रति कीदृशं आचरणं भवितव्यम्? तदनुकूलं यदि आचरामश्चेत् मृत्तिकाप्रदूषणे स्वरूपमेव नियन्त्रणं भविष्यति।

**पृथ्वी सूक्ते-**

**नानावीर्या ओषधीर्या विभर्ति पृथिवी नः प्रयतां राध्यतां न।**[9]

इति

यदि प्रकृतिः वृक्षायुक्ता भवति चेत् मानवः सर्वदा प्रत्यक्षरूपेण वा लाभान्वितः भवति एव। भवननिर्माणाय वृक्षाणामुपयोगः, ईंधनरूपेण प्रयोगः, फलपुष्पप्रयोगः, औषधप्राप्तिः, वायुशोधनम्, वर्षासंतुलनम्, पर्णैः प्राप्ताः उर्वरकाः, मृत्तिकायाः सुदृढीकरणम् रक्षणञ्च, जलवेगानां

वशीकरणम्, पक्षिणामाश्रय: ये पक्षिण: कीटानन् भक्षयित्वा सस्यरक्षां कुर्वन्ति तेषां कृते आश्रयरूपेण वृक्षा: एव मुख्या: सन्ति। यदा वृक्षा: पर्याप्तरूपेण भवन्ति स्म तदा वनेषु फलानां उत्पत्ति: अपि अधिका भवति स्म परञ्च अधुना वृक्षाणां अभाव: दरीदृश्यते तस्मात् कारणात् ये पक्षिण: कीटान् भक्षयित्वा सस्यरक्षणं कुर्वन्ति स्म ते अधुना सस्यभक्षणमेव कुर्वन्ति।

स्काटलैंडदेशस्य वैज्ञानिक: रावर्ट चेम्बर्स वदति यत् वनं नष्टं भवति चेत् अकाल: भवति क्षेत्राणां भूमे: च उर्वरकक्षमता अपक्षीयते, सस्यामुत्पादनं अल्पत्वेव भवति, पशव: नष्टा भवन्ति, पक्षिण: विलुप्ता भवन्ति, वनानां विनाश: अभिशापास्य रूपं धारयति। समस्या: पञ्चप्रेतरूपा: सन्ति ये समेषां कृते विनाशकारिण: यथा– जलवेगवर्धनम् अर्थात् बाढ़रूपेण जलवेददर्शनम्, शुष्कता, आर्द्रता, अकाल: च।

शोधवैज्ञानिकानां मतमस्ति यत् अधुना पर्याल रणे प्राणवायो: न्यूनता सर्वत्र दरीदश्यते तथा च अन्यतत्त्वानां अधिकता। विषययुक्तवायूनां प्रभाव: प्राणीनां कृते प्राणघातक:। सतासां सर्वासां निराकरणाय वृक्षायु–र्वेदस्य प्रयोग: सर्वदैव औषधरुप: भवति। यतोहि वायुप्रदूषणनिवारणाय वृक्षा: शुद्धवायुं प्रददति। जलप्रदूषणेऽपि वृक्षा: सहायका: यतोहि वृक्षा भविष्यन्ति चेत् मृत्तिकाया: क्षयं न भविष्यति। मृत्तिकायाक्षयं न भविष्यति चेत् जलं शुद्धं भविष्यति। ध्वनि प्रदूषणनिवारणाय वृक्षाणां घनत्वमेव वरम्।

इतोऽपि धर्मशास्त्रेषु वृक्षरोपणस्य महत्त्वं प्रतिपादितमस्ति। वृक्षाणां महत्त्वं सर्वत्रैव व्यापकत्वेन दृश्यते। तुलसी–वट–अश्वत्थ–आमलकम्, गूलर इत्यादय: असंख्यका: वृक्षा: सन्ति ये भारतीयसंस्कृतौ देवरूपा: मन्यन्ते। वृक्षा: मानवकुटुम्बस्य अङ्गभूता: ते अस्मान् प्राणवायुं ददति। अस्माकं कृते अत्यन्तमुपयोगिन: ययेषा मुल्याङ्कनं न कर्तुं शक्यते। अत: अस्माभि: कर्तव्यं तता च पर्यावरणसंरक्षणाय जागृति: मानेतव्या अन्ते पञ्चतन्त्रस्य सुभाषितम्–

**वृक्षाश्छित्वा पशून् हत्वा कृत्वा रुधुरकर्दकम्।**
**यद्येवं गम्यते स्वर्गे नरके केन गम्यते॥**

## पादटिप्पणी

1. शाडिल्य स्मृति 2.23
2. महाभारतशान्ति, 282. 54–55
3. यजुर्वेद, 6–22
4. ऋग्वेद. 1–23–19
5. ऋग्वेद. 10–137–03
6. अथर्ववेद:, 3–30–23
7. यजुर्वेद, 13–29
8. सामवेद:,
9. अथर्वेद 12–1–12

*शोधच्छात्र:*
*केन्द्रियसंस्कृतविश्वविद्यालय:, वेदव्यासपरिसर:, हिमाचलप्रदेश:*

ISSN 2456-3420

# भारतीयज्योतिषशास्त्रे व्यक्तित्वविमर्शः

कपिलदेवः

शिक्षामनोविज्ञानं मनोविज्ञानशास्त्रस्यान्यतमा शाखा वर्तते। एतस्यां सामान्यमनोविज्ञानस्य सिद्धान्ता एव प्रयुज्यन्ते। अस्मिन् विज्ञाने शैक्षणिकपरिपेक्ष्ये मानवानां व्यवहारस्याध्ययनं विधीयते। परिवारिकवातावरणम्, सामाजिकवातावरणम्, भौतिकवातावरणम्, वंशानुक्रमः, विद्यालयस्य परिवेशादयः बालकानां व्यवहारं कथं प्रभावयन्तीति विचारयति शिक्षामनोविज्ञानम्। अधिगमस्य कृते समीचीनाः परिस्थितयः कथमुत्पाद्यन्ते ? एकस्यां शैक्षणिकपरिस्थितावपि केषाम्चन बालानामाचरणं कथमन्यथा जायते ? कीदृशं शिक्षणं रुचिकरं स्यात् ? का नाम पाठ्यचर्या छात्राणां कृते हितकारी ? शैक्षणिकपरिस्थितौ व्यक्तित्वगुणानां विकासाः कथं भवन्ति ? एते विचारणीयविषयाः सन्ति शिक्षामनोविज्ञानशास्त्रस्य।

शिक्षामनोविज्ञाने व्यक्तित्वस्य महन्महत्वं वर्तते। व्यक्तित्वशब्द-स्योद्गमः लैटिनभाषायाः 'पर्सनेअर' इतिशब्देन संजातोऽस्ति, यस्य तात्पर्योऽस्ति बाह्याडम्बरः। मानवस्य स्वरूपम्, आकारः मुखकृतिः, वस्त्राणि, अन्यजनैः सह व्यावहारादिविषयाः व्यक्तित्वस्यान्तर्गतमायान्ति। परमनेन व्यक्तित्त्वस्य बाह्यस्वरूपस्यैवावबोधो भवति। नास्त्यमस्य वास्तविकोऽर्थः। सामान्यपरिभाषया व्यक्तित्त्वशब्दस्यार्थः तेषां गुणानां समावेशः अस्ति ये अन्येषामुपरि स्वकीयप्रभावस्य स्थापने सहायकाः स्युः। अद्यतने युगे मनोवैज्ञानिकाः मनोविज्ञानस्य क्षेत्रे व्यक्तित्वाय सर्वाधिक महत्त्वं ददति, यतः व्यक्तित्वाय अध्ययनेन एव सम्पूर्णमानवस्य अध्ययनं कर्तुं शक्यते। शिक्षामनोविज्ञानं व्यवहारस्य अध्ययनं करोति। व्यवहारः व्यक्तित्वाय अभिव्यक्तिः वर्तते। मानवः यथा व्यवहारं करोति तस्य व्यक्तित्वाय तथैव प्रकल्पितं भवति। व्यक्तित्वाय समुचितविकासः योग्यतायाः समायोजनस्य च क्षमतां पुष्णाति।

शिक्षामनोविज्ञाने छात्रस्य व्यक्तित्त्वाध्ययनस्य बहवः सिद्धान्ताः विधयश्च वर्णिताः सन्ति। येषां माध्यमेन छात्रस्य व्यक्तित्त्वस्याध्ययनं कृत्वा अपेक्षितानि परिवर्तनानि कर्तुं शक्यन्ते। वर्तमानकाले शिक्षकाः शिक्षामनोवैज्ञानिकाश्च व्यक्तित्त्वस्याध्ययनं केवलं आधुनिकमनोवैज्ञा-निकाधारेणैव कुर्वन्ति। अस्य प्रमुखं कारणमिदमस्ति यत् वर्तमाने आधुनिकमनोविज्ञानमेव प्रसिद्धमस्ति। सर्वेषु विश्वविद्यालयेषु महाविद्यालयेषु शिक्षणसंस्थासु च आधुनिकमनोविज्ञानस्य पाश्चात्यमनोविज्ञानस्यैव अध्ययनमध्यापनं च भवति। सामान्यजनस्य मनसि भावोऽयं भवति यदाधुनिकमनोविज्ञानं पाश्चात्यविद्वद्भिः प्रतिपादितमस्ति। पाश्चात्यविद्वांसः यानि तथ्यानि कथयन्ति तानि सर्वाणि प्रमाणिकानि बहुप्रभाविनश्च भवन्ति।

भारतवर्षे किमपि ज्ञानं नवीनं नास्ति। सम्प्रति सम्पूर्णमपि विश्वे ज्ञानविज्ञानस्य यत्किमपि स्वरूपं दृश्यते तस्य मूलरूपं वेदेषु वैदिकवाङ्मये वा अवश्यमेव प्राप्यते। वेदानां परमं प्रामाण्यत्वं न केवलं भारतीया अपितु पाश्चात्यविद्वांसोऽपि निर्विवादरूपेण स्वीकुर्वन्ति। सर्वविदितमस्ति यत् मनोविज्ञानं भारतीयदर्शनस्य अघ्गमासीत्। वेदोपनिषद्-रामायण-महाभारत-पुराणादिषु मनाविज्ञानस्य अनेके सिद्धान्ता वर्णिताः सन्ति येन सिद्ध्यति यत् भारतवर्षे वैदिककालादेव मानवजीवनस्य सर्वेषां पक्षाणां मनोवैज्ञानिकाध्ययनं प्रारब्धं जातमिति। यथा श्रीमद्भगवद्गीतायाम् -

**प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्।**
**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते**[1]**।**

यजुर्वेदीयमन्त्रेणापि एतद्भावं प्रस्फुटति-

**यज्जाग्रतोदूरमुदति दैवन्तदुसुप्तस्य तथैवैति।**
**दूरङ्गमञ्ज्योतिषाज्योतिरेकन्तन्मेमनः शिवसङ्कल्पमस्तु।।**[2]

भारतीयज्योतिषशास्त्रं वेदस्य नेत्रस्थानीयमघौमस्ति। ज्योतिषशास्त्रे जातकस्य व्यक्तित्त्वाध्ययनस्य बहवः सिद्धान्ताः प्राप्यन्ते। ज्योतिषशास्त्रधारेण जातकस्य व्यक्तित्त्वस्याध्ययनार्थं तस्य जन्मतिथेः, जन्मसमयस्य, जन्मस्थानस्य ज्ञानमपेक्षितं भवति। जन्मसमयाद्युप-करणानां माध्यमेन यथाशास्त्रं ग्रहगणितं कृत्वा जातकस्य जन्माघौं निर्माय: ज्योतिषशास्त्रस्य प्रामाणिक ग्रन्थेषु प्रतिपादितानां भाव-राशि-ग्रह-नक्षत्रसम्बन्तितत्त्वानां तथा शास्त्रेक्तग्रहयोगादीनामाधारेण तस्य व्यक्तित्त्वस्याध्नं क्रियते। व्यक्तित्वनिर्धारणे ग्रहराशिभावानां भूमिका अत्र प्रतिपाद्यते।

**भावाः**-वैदिकज्योषिशास्त्रे जातकस्य जन्मकालाधारेण जन्मस्थानाधारेण च जन्मानिर्माय द्वादशभावेषु ग्रहाणां स्थितिवशात् मानवजीवनस्य विविधपक्षाणां फलादेशः क्रियते। द्वादशसंख्यकाः भावाः मानवशरीरस्य विविधाङ्गानां प्रतिनिधित्वं[3] तथा मानवजीवनस्य विविधपक्षाणां[4] प्रतिनिधित्वं कुर्वन्ति। व्यक्तित्त्वदृष्ट्या विचारः क्रियते चेत् प्रथमभावः, पञ्चमभावः नवमभावश्च मानवव्यक्तित्त्वस्य प्रतिनिधित्त्वं कृवन्ति, तत्रपि व्यक्तित्त्वनिर्धारणे प्रथमभावस्य विशिष्टावदानं भवति। खमण्डले क्रान्तिवृत्तस्य राशिवृत्तस्य वा यत्प्रदेशः उदयक्षितिजेन सह संपातः करोति तस्य लग्नसंज्ञा भवति तथा जन्माघौ स एव प्रथमभावः भवति[5]। अस्य लग्नस्य (क्षितिजवृत्त-क्रान्तिवृत्तयोः पूर्वीसंपातस्य) विशिष्टो प्रभावः मावनजीवनोपरि भवति आचार्याणां मतैः। यद्यपि सर्वे भावाः मानवशरीरस्य विविधाङ्गानां प्रतिनिधित्वं

कुर्वन्ति अत: व्यक्तित्वज्ञानाय सर्वेषां भावानां महत्वं वर्तते। परं जातकस्य व्यक्तित्वनिर्धारणे प्रथमभावस्य विशिष्टं महत्वं भवति। उक्तभावे य: राशि भवति तस्य स्वरूप-प्रकृति-तत्त्व-स्वभादिनामनु-सारेण, प्रथमभावस्य स्वामीग्रह: तथा प्रथम भावे ये ये ग्रहा: स्थिता: प्रथमभावेन सह सम्बन्धिता वा सन्ति तेषां स्वरूप-प्रकृति-तत्त्व-स्वभादिनामनुसारेण जातकस्य व्यक्तित्वम् भवति।

**राशय:**-भारतीयज्योतिषशास्त्रनुसारेण भचक्रात्मकक्रान्तिवृत्तस्य द्वादशतमभाग: राशि: भवति। मेष-वृष-मिथुन-कर्क-सिंह-कन्या-तुला-वृश्चिक-धनु-मकर-कुम्भ-मीनाख्या: द्वादशराशय: सन्ति। आकाशस्थमेषादिराशिभि: सह मनुष्यानामभिप: सम्बन्धोऽस्ति। शिक्षामनोविज्ञानस्योपलब्धग्रन्थेषु प्राच्यपाश्चात्यशिक्षामनोवैज्ञानिकानां मते प्रतिपादितानां व्यक्तित्वस्य परिभाषानामध्ययनेनेदं ज्ञायते यत् व्यक्तित्वे मनुष्यस्य न केवलं शारीरिकाणां मानसिकानां एव गुणानां अपितु मानवीय गुणानामपि समावेश: भवति। व्यक्तित्वं मानवीयगुणानां लक्षणानां क्षमतानां विशेषतानाञ्च संगठितस्वरूपमस्ति। मनोवैज्ञानिकानुसारेण आत्मचेतना, सामाजिकता, साममजस्यम, निर्दिष्ट-लक्ष्य-सम्प्राप्ति:, सुदृशा इच्छाशक्ति :, शारीरिकस्वास्थ्यम्, मानसिक-स्वास्थ्यम् , एकता एकीकरणञ्च, निरन्तरता इत्यादिनी श्रे''व्यक्तित्वस्य वैशिष्ट्यानि सन्ति। एवं प्रसन्नचित्त:, मेलपप्रिय:, बुद्धिमान्, विश्वसनीय:, संवेगात्मक:, स्थिर: यथार्थवादी अधिकारप्रिय:, आत्मगौरवप्रिय: शान्त:, सामाजिक:, भावुक:, कोमलहृदय: शिष्ट:, सौन्दर्यप्रेमी उत्तरदायी, परिश्रमी, साहसी, निश्चिन्त: मेधावी, शीघ्रकारी मैत्रीपूर्ण:, विश्वासकारीत्यादय: उत्तमव्यक्तिप्वस्य गुणा: सन्ति। स्थूलरूपेण शिक्षामनोवैज्ञानिका: व्यक्तित्वस्य वर्गीकरण आन्तरिकव्यक्तित्व-बाह्यव्यक्तित्वरूपेण कुर्वन्ति। तत्र बाह्यव्यक्तित्वस्य सम्बन्ध: शारीरिकगुणै: सह अस्ति।

व्यक्तित्वस्य शारीरिकगुणानां ज्योतिषशास्त्रदृष्ट्या राश्याधारेण विचार: क्रियते चेत् द्वादशराशय: मानवशरीरस्य विविधानां प्रतिनिधित्वं कुर्वन्ति। सर्वेषु जातकग्रन्थेषु भचक्रात्मकस्य कालपुरुषस्य कल्पना दरीदृश्यते। राश्याद्यवयवैर्विभाजित: कालपुरुषोऽयमेको काल्पनिक: विराटपुरुषाकृतिरस्ति। तस्यैवास्वरूपेण मेषादयो द्वादशराशय: सन्ति। कालपुरुषस्य शीर्षभागात् चरणपर्यन्तं पृथक्-पृथक् द्वादशाषु कल्पिता: सन्ति। कालपुरुषस्य मस्तके मेषराशि:, मुखे वृषराशि:, वक्ष: स्थले मिथुनराशि:, हृदये कर्कराशि:, उदरे सिंहराशि:, कट्यां वृश्चिकराशि:, उरुभागे धनुराशि:, जानुभागे मकरराशि:, जङ्घे कुम्भराशि:, चरणयो: मीनराशिश्च न्यस्यते।[6]

कालपुरुषावयवे राशिन्यसनमिदं जातकस्य स्वरूपनिर्धारणेऽङ्-ङ्गानां सबलत्वनिर्बलत्वादिनिर्णये च महत्वपूर्णं स्थानमवधारयति। कालपुरुषाङ्गेषु राशिस्थापनस्य प्रयोजनमिदमस्ति यत् जन्मकाले यो राशि: कालपुरुषस्य यस्याङ्गस्य प्रतिनिधित्वं करोति, तस्मिन् राशौ शुभग्रहा: भवन्ति चेत्तद्राशे: लक्षिताघौ सबलत्वं यस्मिंश्च राशौ पापग्रहा: भवन्ति जातकस्य तस्मिन्नङ्गे निर्बलत्वं भवति।[7]

शिक्षामनावैज्ञानिकानां मतानुसारेण व्यक्तित्वस्य निर्धारककारके द्विविधे स्त:-

(क) आनुवांशिककारकाणि

(ख) पर्यावरणीयकारकाणि

रैक्सनाइटमहोदयस्य शब्देषु-'मनोविज्ञानस्य सम्बन्ध: विकासं प्रभावयितृभ्य: कारकेभ्योऽपि अस्ति। एतेषु कानिचित् शारीरिकरचना-सम्बन्धीनि कानिचित् जन्मसम्बन्धिपर्यावरणेन च सम्बन्धितानि भवन्ति। "Psychology is also concerned with the factors that influence the growth of personality, among these some are constitutional and inborn and others environmental"

तत्र जैविककारकाणां सम्बन्ध: आनुवंशिकतया सह वर्तते। आनुवशिकता मानवव्यक्तिविकासं निर्धारयति प्रभावयति वेति मनोवैज्ञानिकानां मतम्। आनुवांशिक-कारकाण्यपि द्विप्रकारके स्त:-

1. शारीरिकसंरचना तथा शारीरिकस्वास्थ्यम्
2. अन्त: स्त्रवीग्रन्थय:।

**शारीरिकसंरचना तथा शारीरिकस्वास्थ्यम्**-शारीरिकसंरचनाया अभिप्रायोऽस्ति शरीरस्याकार:, वर्ण: स्वरूपादय:। मानवस्य शरीरिकसंरचना मानवव्यक्तित्वं प्रभावयति। जर्मनविदुषा 'केचनर' महाशयेन व्यक्तित्वस्य चत्वार: प्रकारा: प्रतिपादिता: सन्ति-

(क) सुसंहतकाय:-एतादृशप्रकारकस्य जनस्य शरीरं हृष्ट-पुष्टं स्वस्थं च भवति तस्य वक्ष:स्थलं आयतं स्फुटं च, स्कन्धौ विशालौ, बाहू सुदृढ़ौ स्नानव: पुष्टा:, आकृतिश्च दर्शनीया भवन्ति। स अपरै: सह सामञ्जस्यमिच्छति, कार्येषु अभिरुचिं व धत्ते।

(ख) लम्बकाय:- एतादृशप्रकारका: जना: लम्बकाया: कृशाश्च भवन्ति, अपरान् निन्दन्ति, परम् इतरै: स्वसमालोचनां नैव श्रोतुमिच्छन्ति।

(ग) वर्तुलकाय:- एतादृशप्रकारका: जना: बलशालिन: वामनाश्च भवन्ति। इमे लोकेषु परस्परं सत्वरं सरलतया च सहमिलिता: जायन्ते।

(घ) साधारणकाय:-एतत्प्रकारका: जना: साधारणं शरीरं धारयन्ति। अन्यैरपि शिक्षामनोविज्ञानिकै: स्वीय-स्वीय ग्रन्थेषु शारीरिकसंरचनाधारेण व्यक्तित्वस्य प्रकारा प्रतिपादिता। विस्तारभयात् तेऽत्र न विविच्यन्ते।

जातकशास्त्रनुसारेण जातकस्य य: राशि भवति तस्यानुसारेण तस्य शरीरस्याकार: वर्ण: रूपादय: भवति। यथा मेष राशि रक्तवर्ण:, स्थुलकाय: अस्ति, वृषराशि श्वेतवर्ण:, दीर्धदेहवानस्ति, मिथुनराशि हरितवर्ण:, समशरीरवान् भवति। एवं प्रकारेण जातकग्रन्थोक्तराशि-स्वरूपवर्णादिनां ज्ञानेन जातकस्य शारीरिकसंरचनाया ज्ञानं स्वरूपज्ञानं च भवति।

**अन्तःस्त्रावीग्रन्थयः**-व्यक्तित्वनिर्धारणे अन्तःस्त्रवीग्रन्थयः विशिष्टावदानमावहन्ति। एताः ग्रन्थयः नलिकां विनैव रक्ते निजस्रावं प्रेषयन्ति। एतासां स्त्रावः 'न्यासर्ग' नाम्ना ज्ञायते। विविधग्रन्थयः एकस्यानेकस्य वा न्यासर्गस्य नावं कुर्वन्ति, येषां न्यासर्गाणां प्रभावः व्यक्तत्केर्व्यवहारव्यक्तित्वयोरूपरि भवति। काचन प्रमुखग्रन्थयः निम्नप्रकारेण सन्ति- पीयूषग्रन्थि, एड्रीनलग्रन्थि, गलग्रन्थि, उपकण्ठग्रन्थि, थायमसग्रन्थि, पैक्रियाजग्रन्थि, यौनग्रन्थयश्च। एतासां ग्रन्थिनां साक्षतप्रभावः व्यक्तित्वस्य शारीरिकशीलगुणोपरि तथा मानसिकशीलगुणोपरि भवति। ज्योतिषशास्त्रे एतेषां ग्रन्थिनां प्रतिनिधयः द्वादशभावाः, द्वादशराशयः सप्तग्रहाश्च सन्ति।

राशिनां गुणानुसारेणैव जातकेषु गुणाः समजायते। अतोऽस्माकं आचार्यैः निष्कर्षोऽयं निष्कासितः यत् ग्रहपथमेषादिकस्य स्वविशिष्टप्रभावो भवति। ग्रहाणां गुणदोषज्ञानानन्तरं राशीभागानां गुणदोषाध्ययनं कृत्वा ग्रहाणां गुणदोषैः सह समन्वयं स्थापितं पूर्वाचार्यैः। तथा च यो राशिः यस्य ग्रहस्य गुणदोषानुरूपमासीत्तस्याधिपत्ये निवेशितम्। एवं ग्रहपथराश्यात्मकान् द्वादशभागान् तत्तद् गुणदोषानुसारेण वर्गीकृत्य मेषराशिं भौमस्य वृषराशिं शुक्रस्य, मिथुनराशिं बुधस्य, कर्कराशिं चन्द्रस्य, सिंहराशिं सूर्यस्य, कन्याराशिं बुधस्य, तुलाराशिं शुक्रस्य, वृश्चिकराशिं भौमस्य, धनुराशिं गुरोः, मकरराशिद्वयं शनैश्चरस्य, मीनराशिं गुरोर्गुणदोषैः विभाजितम्।

वैदिकज्योतिषे द्वादशराशयः अग्नि-पृथ्वी-वायु-जलेति चतुर्षु तत्त्वेषु विभक्ताः सन्ति। पञ्चमो आकाशतत्त्वः चतुष्वेव समाहितो भवति। राशीनां तत्वाः निम्नप्रकारेण सन्ति मेष-सिह-धनुराशीनामग्नि-तत्त्वम्, वृषकन्यामकरराशीनां पृथ्वीतत्त्वम्, मिथुन-तुला-कुम्भानां वायुतत्त्वं तथा कर्कवृश्चिकमीनानां जलतत्त्वमस्ति।[8] अग्नितत्त्वराश्युत्पन्न-जातकानां व्यक्त्विे तीव्रता तथा क्रियात्मकशक्त्या समावेशो भवति। पृथ्वीतत्त्वराश्युत्पन्नजातकेषु स्थिरता, भौतिकता तथा यथार्थता भवति। आसूत्पन्नजातका पूर्णसांसारिकाः भवन्ति। वायुतत्त्वराशिभवाः जातकाः चञ्चलस्वभावयुताः, परिवर्तनप्रियाः तथा मानसिकरूपेण सबलाः प्रभावशालिनश्च भवन्ति। जलतत्त्वराशयः येषां भवन्ति ते सरलाः, भावुकाः, आत्मविश्लेषणकर्ता तथा अन्वेषकगुणोपेताः भवन्ति।

जलचराः स्थलचराः[9]

एवमेव द्वादशराशिषु समराशयः पुरुषसंज्ञकाः क्रूरस्वभाविनस्तथा विषमराशयः स्त्रीसंज्ञकाः सौम्यस्वभावयुताः भवन्ति।[10] समराशिषूत्पन्नाः जातकाः कठोरस्वाभावयुताः भवन्ति। तेषां बाह्यव्यक्तित्वं आन्तरिकव्यक्तित्त्वाद्भिन्नं भवति तथा विषमराशिभवाः सौम्यस्वभाविन, परापकरिणः, कोमलहृदयाः च भवन्ति। राशीनां त्रयोः स्वभावाः भवन्ति, चर-स्थिर-द्विस्वभावश्चेति। चरराशिषु यस्य जातकस्य जन्म भवति तस्य व्यक्तित्वे क्रियाशीलता, स्थिरराशिषु स्थैर्यं दृढत्वं च भवति तथा द्विस्वभाराशिषु चर-स्थिरयोः मिश्रितगुणाः भवन्ति।

**ग्रहाः**-गृह्यते स्वाश्रयामुखमपकृष्यते स्वगत्या द्वादशभानि यैः ते ग्रहाः। सूर्य-चन्द्र-मंगल-बुध-बृहस्पति-शुक्र-शनि-राहु-केतुसंज्ञकाः सप्तग्रहाः सन्ति। ज्योतिषशास्त्रदृष्ट्या ग्रहाणां व्यक्तित्त्वपरकमध्ययनं क्रियते चेत्तदा निष्कर्षोऽयं निस्सरति यत् स्थूलरूपेण मनुष्यस्य व्यक्तित्वं बाह्य-आन्तरिकभेदाभ्यां द्विधं भवति। बाह्यं व्यक्तित्वम् सः यः एतद्भौतिकशरीररूपेण अवतरितः। अयं आत्मनः चैतन्यक्रियायाः विशेषतावशात् स्वपूर्वजन्मनः निश्चित् विचारान्, भावान्, क्रियाः प्रति च आकृष्टो भवति तथा च एतज्जीवनस्य अनुभवैः अस्य व्यक्तित्वस्य विकसने वृद्धिः भवति। आन्तरिकं व्यक्तित्वं तद् भवति, यत् नैकानां बाह्यव्यक्तित्त्वानां स्मृतीनाम्, अनुभवानां प्रवृत्तीनाञ्च संश्लेषणं स्वस्मिन् स्थापयति। ज्यौतिषशास्त्रे बाह्यान्तरिकेत्येतदुभयोः व्यक्तित्वसम्बन्धि-चेतनयोः विचारः, अनुभवः, क्रिया च इत्येतद्रूपत्रयं मन्यते। बाह्यव्यक्तित्वस्य त्रीणि रूपाणि आन्तरिकव्यक्तित्वस्य एतद्रूपत्रयेण सह सम्बद्धानि वर्तन्ते, परञ्च आन्तरिकव्यक्तित्वस्य एतद्रूपत्रयम् स्वस्य स्वविशेषतां शक्ति च अभिधत्ते, येन मनुष्यस्य भौतिक-मानसिक-आध्यात्मिकानां जगतां सञ्चालनं भवति। मनुष्यस्य अन्तःकरणं त्रयाणां व्यक्तित्वानाम् उक्तरूपत्रयाणां च मेलनकार्यं विधत्ते।

मनुष्यजीवनस्य बाह्यव्यक्तित्वस्य रूपत्रयम्, आन्तरिकव्यक्तित्वस्य रूपत्रयम् तथा च अन्तःकरणम् एतेषां सप्तानां प्रतीकानि सौर-जगति विद्यमानाः सप्त (७) ग्रहाः मन्यन्ते। बाह्यव्यक्तित्वस्य प्रथमरूपस्य प्रतिनिधि बृहस्पतिः, द्वितीयरूपस्य प्रतिनिधि भौमः तृतीय रूपस्य च प्रतिनिधि चन्द्रः अस्ति। एवमान्तरिकव्यक्तित्वस्य प्रथमरूपस्य प्रतिनिधि शुक्रः, द्वितीयरूपस्य प्रतिनिधि बुधः, तृतीयरूपस्य प्रतिनिधि सूर्यः तथा आन्तःकरणस्य प्रतिनिधि शनि अस्ति।

भारतीयदर्शनेष्वपि 'यथा पिण्डे तथा ब्रह्माण्डे' इत्ययं सिद्धान्तः प्राचीनकालादेव प्रचलितः। इदं तात्पर्यं यत् वास्तविके सौरजगति सूर्य-चन्द्रादिग्रहाणां भ्रमणे ये नियमाः वर्तन्ते, ते एव नियमाः प्राणिमात्रस्य शरीरे स्थितानां सौरजगतः ग्रहाणां भ्रमणेऽपि उपतिष्ठन्ते। अतः आकाशे स्थिताः ग्रहाः शरीरे स्थितग्रहाणां प्रतीकभूताः विद्यन्ते। अस्य विषयस्य प्रतिपादनं कुर्वता एव वराहमिहिरेण प्रतिपादितमस्ति यत् कालपुरुषस्यात्मादिविभागे रविरात्मा, चन्द्रः मनः, भौमः सत्वम्, बुधः वाणी, गुरुः ज्ञानं, सुखमच, शुक्रो मदः, शनिश्च दुःखमस्ति। एवमाकाशे स्थिताः ग्रहाः शरीरस्थितग्रहाणां प्रतीकाः भवन्ति। एवं पूर्वकल्पनानुसारेण बाह्यव्यक्तित्त्वस्य तिस्त्रीणां रूपाणाम् गुरुः भौमः चन्द्रस्तथा, आन्तरिकव्यक्तित्त्वस्य तिस्त्रीणां रूपाणां सूर्यः, चन्दस्तथा बुधः तथा शनि अन्तःकरणेति सप्तप्रतिरूप्याणां प्रतीकाः सप्तग्रहा सन्ति तथा ज्योतिषशास्त्रे प्रत्येकग्रहैः कस्यापि जातकस्य आत्मिक-अनात्मिक-शारीरिकदृष्ट्या व्यक्तित्वस्याध्ययनं क्रियते।[11]

ISSN 2456-3420

एवं प्रकारेण ज्योतिषशास्त्रे द्वादशभावाः, द्वादशराशयः ग्रहाश्च मानवशरीरस्यांगानां तथा मानवजीवस्य विधिपक्षाणां प्रतिनिधित्वं कुवन्ति। जन्माङ्गे ग्रहाणां राशीनाञ्च स्वरूप-प्रकृति-गुण-धर्मादयः तथा ग्रह-राशि-भावानां संयोगेन निर्मिताः योगाः जातकस्य व्यक्तित्वनिर्धारकाः सन्ति। शिक्षामनाविज्ञाने व्यक्तित्वस्य यत्स्वरूपं तथा भेदाः वर्णिताः तत्सम्बिन्धिताः अनेकेयोगाः जातकग्रथेषु प्राप्यन्ते।

## सन्दर्भग्रन्थसूची


1. जातकपारिजातः-दैवज्ञवैद्यनाथः, प- कपिलेश्वरशास्त्री, चौखम्बा संस्कृत संस्थान वाराणसी-2004।
2. ताजिकनीलकण्ठी-नीलकण्ठविरचितः, केदारदतदतजोशी, मोतीलाल-बनारसीदास बंगलो रोड, दिल्ली - 110007
3. फलदीपिका - मन्त्रेश्वरविरचितः, व्याख्याकारः-गोपेशकुमार ओझा, मोतीलालबनारसीदास बंगलो रोड, दिल्ली-110007 द्वितीय संस्करण-1975।
4. बृहज्जातकम्-वराहमिहिरविरचितः, भट्टोत्पलीटीकासहित पं सीतारामझा सावित्री ठाकुर प्रकाशन रथयात्र चौराहा वाराणसी सन् -2006।
5. बृहत्पाराशरहोराशास्त्रम्-पाराशर, प. पद्मननाभ शर्मा,चौखम्बा सुरभारती प्रकाशन वाराणसी
6. भारतीय ज्योतिष-नेमिचन्दशास्त्री, भारतीयज्ञानपीठ-18, इंस्टीट्यूशनल एरिया लोदी रोड नई दिल्ली-03
7. आधुनिक शिक्षा मनोविज्ञान-डॉ- एस- पी- गुप्ता, शारदा पुस्तक भवन इलाहबाद, 1997
8. उच्चतर सामान्य मनाविज्ञान, अरुण कुमार सिंह, मोतीलाल बनारसीदास, दिल्ली, 2010
9. व्यक्तित्व का मनोविज्ञान, अरुण कुमार सिंह, मोतीलाल बनारसीदास, दिल्ली, 2012


## पादटिप्पणी

1. गीता, अध्याय-2, श्लोक 55
2. यजुर्वेद 34/5
3. ज्योतिष शास्त्र में रोग विचार, विषय-प्रवेश, पृ.-21
4. सारावली, होराराशिप्रभेदाध्यायः श्लोकः 26, 27
5. सिद्धान्तशिरोमणि, गोलाध्यायः त्रिप्रश्नवासना, श्लोकः-26
6. लघुजातकम्, राशिप्रभेदाध्यायः, श्लोकः-5
7. बृहज्जातकम्, राशिप्रभेदाध्यायः, श्लोकः -4
8. तजिकनीलकण्ठी, प्रथमोऽध्यायः, श्लोकः 2-14
9. जातकरारिजातः, राशीशीलाध्यायः, श्लोकः 15
10. जातकरारिजातः, राशीशीलाध्यायः, श्लोकः 13
11. भारतीय ज्योतिष, प्रथमोऽध्यायः, पृ- 28 -33


***शोधच्छात्रः***

***केन्द्रियसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, हिमाचलप्रदेशः***

ISSN 2456-3420

# ज्योतिषशास्त्रे मेलापकस्य आवश्यकता

अरुणा देवी

भारतीयसंस्कृतौ विवाहः महत्वपूर्णं स्थानं भजते। यतो हि कामः सर्वेषां प्राणीनां सहजप्रवृत्तिः वर्तते। समस्तचराचरसृष्टिः कामस्य विस्फोटकसृजनात्मकोर्जाययोः अप्रतिहतानुवादो अस्ति। द्वयोःजीवयोः मध्ये आकर्षणस्यालक्षितहेतुः काम एव वर्तते। मानवीयसंस्कृतिः कामाकर्षणस्य सम्बन्धान् मृदुलतन्तुभिः आच्छादितं कृतवान्। अतः रागसंवर्धनेन प्रारूपितसान्निध्यं संयमितकरणार्थं यः विचारः भवति सः विवाहस्यावधारणायाः मूलाधारोऽस्ति। ज्योतिषशास्त्रानुसारं वैवाहिकजीवनस्य मुख्यः आधारः ग्रहमेलापकं नक्षत्रमेलापकञ्चास्ति। यतो हि ग्रह-नक्षत्राणां मेलनेन वैवाहिक जीवनं सुखमयं भवति। यदि ग्रह-नक्षत्राणां मेलनं समुचितं नास्ति तर्हि वैवाहिकजीवने असामञ्जस्यं भवति, तथा च वैवाहिकजीवनं कष्टप्रदमनुभवति। अत्र प्रसङ्गक्रमे मेलापकस्य आवश्यकता संक्षिप्ततया प्रस्तूयते।

**मेलापकस्य तात्पर्यम्**-सुखददाम्पत्यजीवनस्य सततसमृद्धिः तथा वंशलतिकायाः निरन्तरता, निरोगता, प्रबुद्धता, प्रतापीसंततेः प्राप्तिः, हर्षोल्लासमयदाम्पत्यजीवनस्य प्राप्तिः, आनन्दस्योत्तमोपलब्धस्य सर्वाधिकसशक्तप्रविधिः ज्योतिषशास्त्रे मेलापकेति नाम्ना भजते। मेलापकं नाम परस्परं सम्यक्रूपेण ''मेलनं''। वरवध्वोः जन्मकुण्डल्याः ग्रहस्थित्याधारेण जन्मनक्षत्राधारेण च तयोः प्रकृत्यभिरुच्योः साम्यतायाः पूरकत्वस्य विचारः मेलापकमिति। ज्योतिषशास्त्रे नक्षत्रग्रहाणामाधारीकृत्य अपरिचित वरकन्ययोः अभिरुचिप्रकृत्योः समानतायाः तथा च जीवनस्य विविधपरिस्थितिसु तेषां सम्पूरकतायाः विचारं क्रियते। अतः मेलापकेन वयं ज्ञातुं शक्तः यत् वरवध्वोः वैवाहिकजीवनं सुखमयं दुःखमयं वा व्यतीतमिति भविष्यत्काले।

**मेलापकस्य आवश्यकता**-भारतीयसंस्कृतौमानवकल्याणाय विवाहः अनिवार्यः भवति। विवाहं विना कोऽपि जनः स्वजीवनस्य परमलक्ष्यं न प्राप्नोति। तथा च वैवाहिकजीवनस्य परमोलक्ष्यः मोक्षप्राप्तिः। परन्तु यदि वैवाहिकजीवने प्रकृत्यामभिरुच्यां च असाम्यता अस्ति तर्हि वैवाहिकजीवनं दुःखमयं भवति। एतद्विपरीतं यदि प्रकृत्यामभिरुच्यां साम्यता अस्ति तर्हि वैवाहिकजीवनं सुखमयमानन्दमयं च भवति। अतः विवाहात् पूर्वं वैवाहिकसम्बन्धे स्थिरतासरसताभ्यां वरवध्वोः जन्मकुण्डल्योः मेलनमावश्यकमस्ति। यतो हि यदि वरवध्वोः ग्रहाणां नक्षत्राणां मेलनमुचितं भवति तर्हि वैवाहिकजीवनं सुखमयं भवति।

**1. प्रचलितनाम्ना मेलापकदोषः**-प्रायः जनाः वरकन्ययोः प्रचलितनाम्ना एव मेलापकस्य विचारं कुर्वन्ति। किन्तु प्रचलितनाम्ना मेलापकं शास्त्रसम्मतं नास्ति। यतो हि जन्मकालिक ग्रहस्थितीनां प्रचलितनाम्ना न कोऽपि सम्बन्धः। अतः प्रचलितनाम्ना मेलापकं न करणीयम्। यतो हि प्रचलितनाम्ना यदि मेलापकं कुर्वीत्तर्हि वयं वैधव्य-मांगलीक-निःसन्तानादि विभिन्न योगानां विचारं न कर्तुं शक्यते।

**मेलापकस्य विधिः**-मेलापकः द्विविधः वर्तते। नक्षत्रमेलापकः, ग्रहमेलापकश्च। प्राचीनकाले विंशतिः कूटानां व्यवस्था दृष्टिपथे आयाति। तानि नाड़ीकूटः, राशिः, ग्रहमैत्री,योनिः, स्त्रीदीर्घः, गणः, माहेन्द्रवर्गः, गणितः, आयः, वश्यः, दिवसः, वर्णः, वेधकूटः, पक्षिकूटः, रज्जुकूटः, योनिवर्गः, लिङ्गः, भूतः, चान्द्रयोगः, गोत्रश्च इति। परन्त्वाधुनिककाले दक्षिणभारते वरकन्ययोः कुण्डलीमिलानावसरेदशकूटानां तथा च उत्तरभारते अष्टकूटानां प्रसिद्धिरस्ति।

**अष्टकूटविचारः**-नक्षत्रमेलापके वरकन्ययोः जन्मराश्यनुसारेण जन्मनक्षत्रानुसारेण च विचारो भवति। तत्र नक्षत्रमेलापके भारतीयसंस्कृतौ अष्टकूटानि प्रसिद्धानि सन्ति। तानि वर्णः, वश्यं, तारा, योनिः, ग्रहमैत्री, गणमैत्री, भकूटं, नाडी चेमानि। अष्टकूटानां गुणसंख्या क्रमशः 1, 2, 3, 4, 5, 6, 7, 8 भवन्ति। अष्टकूटेषु गुणानां योगः 36 भवन्ति। चक्रेण स्पष्टीयते-

| अष्टकूटानि | वर्णः | वश्यम् | तारा | योनिः | ग्रहमैत्री | गणमैत्री | भकूटम् | नाडी | सम्पूर्णयोगः |
|---|---|---|---|---|---|---|---|---|---|
| गुणसंख्या | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 36 |

तत्र प्रसङ्गक्रमे अष्टकूटानां परिचयो संक्षिप्तया अत्र प्रस्तूयते।

**1. वर्णः**-अष्टकूटेषु वर्णकूटस्य गुणसंख्या एकास्ति। भारतीयसंस्कृतौ चतुर्वर्णाः सन्ति। ते ब्राह्मण-क्षत्रिय-वैश्य-शूद्राश्च। अजालिधन्विराशयः क्षत्रियसंज्ञकाः, वृषकन्यामकरराशयः वैश्यसंज्ञकाः, मिथुनतुलाकुम्भ-राशयः शुद्रसंज्ञकाः, कर्कवृश्चिकमीनराशयः ब्राह्मणसंज्ञकाः सन्ति। चक्रेण स्पष्टीयते-

| | | | | | | |
|---|---|---|---|---|---|---|
| राशयः | मेषः | वृषः | मिथुनः | कर्कः | सिंहः | कन्या |
| वर्णः | क्षत्रियः | वैश्यः | शुद्रः | ब्राह्मणः | क्षत्रियः | वैश्यः |
| राशयः | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
| वर्णः | शुद्रः | ब्राह्मणः | क्षत्रियः | वैश्यः | शुद्रः | ब्राह्मणः |

**2. वश्यम्**-

वरवध्वोः कुण्डलीमेलापककाले वश्यविचारोऽपि राश्यनुसारेण क्रियते। ज्योतिषशास्त्रे पञ्चवश्यानि कल्पितानि सन्ति। तानि चतुष्पद-मानव-जलचर-वनचर-कीटानि च। कस्मिन् राशौ कं वश्यं निम्नचक्रेण स्पष्टीयते-

| | | | | | | |
|---|---|---|---|---|---|---|
| राशयः | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या |
| वश्यः | चतुष्पदः | चतुष्पदः | मानवः | कीटः,जलचरः | वनचरः | मानवः |
| राशयः | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
| | वनचरः | 0 | 0 | 1 | 2 | 0 |
| | कीटः | 1 | 1 | 1 | 0 | 2 |

**3. तारा**-अष्टकूटेषु ताराकूटं तृतीयं कूटमस्ति। नवतारकाणि सन्ति। तानि जन्म-सम्पत्-विपद्-क्षेम-प्रत्यरि-साधक-वध-मैत्री-अतिमैत्री च। वरवध्वोः कुण्डलीमिलानावसरे ताराकूटस्य गुणत्रयं भवति। ताराकूटविचारे कन्याजन्मनक्षत्राद्वरनक्षत्रं यावद्गणयेत् तथा च वरजन्मनक्षत्राद्वधूनक्षत्रं यावत्

ISSN 2456-3420

गणयेत्। ततः अवशिष्टमङ्कं नवैर्विभजेत्। यदवशिष्टं तच्च यदि त्रिपञ्चसप्तमितं वा भवेत्तदा अशुभतारा तथा च यदि अवशिष्टमेकंद्विचतुःषडष्टनवमितं वा भवेत्तदा शुभतारा भवति। द्वयोरपि परस्परनक्षत्रगणने शुभं चेत् शुभं तथा च यदि अशुभं चेदशुभमिति। एवमेव यदि एकस्य नक्षत्रगणने शुभं चेत् तथा च अपरस्य नक्षत्रगणने अशुभं चेत्तर्हि गुणाभावः भवति। केचन् आचार्याणां मते वधोः नक्षत्राद्वरस्यनक्षत्रमशुभं नापेक्षितमिति। तत्र कस्यां स्थितौ कति गुणाः प्राप्यन्ते इत्यस्मिन् विषये दैवज्ञमनोहरे भणितं यत् – यदि एकस्य तारा शुभा लभ्यते तथा अपरस्य अशुभा तदा सार्द्धैकं गुणं, यदि उभयोः शुभं तारा लभ्यते तर्हि त्रीणि, तथा च यदि उभयोः अशुभतारा लभ्यते तर्हि गुणाभावः भवतीति। चक्रेण स्पष्टीयते–

वधोः तारा वरस्य तारा

| तारा | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 |
|---|---|---|---|---|---|---|---|---|---|
| 1 | 3 | 3 | 11/2 | 3 | 11/2 | 3 | 11/2 | 3 | 3 |
| 2 | 3 | 3 | 11/2 | 3 | 11/2 | 3 | 11/2 | 3 | 3 |
| 3 | 11/2 | 11/2 | 0 | 11/2 | 0 | 11/2 | 0 | 11/2 | 11/2 |
| 4 | 3 | 3 | 11/2 | 3 | 11/2 | 3 | 11/2 | 3 | 3 |
| 5 | 11/2 | 11/2 | 0 | 11/2 | 0 | 11/2 | 0 | 11/2 | 11/2 |
| 6 | 3 | 3 | 11/2 | 3 | 11/2 | 3 | 11/2 | 3 | 3 |
| 7 | 11/2 | 11/2 | 0 | 11/2 | 0 | 11/2 | 0 | 11/2 | 11/2 |
| 8 | 3 | 3 | 11/2 | 3 | 11/2 | 3 | 11/2 | 3 | 3 |
| 9 | 3 | 3 | 11/2 | 3 | 11/2 | 3 | 11/2 | 3 | 3 |

**4. योनिकूटम्**–अष्टकूटेषु योनिकूटस्य चत्वारि गुणानि सन्ति। योनिकूटस्य परिज्ञानं जन्मनक्षत्रानुसारं भवति। अष्टाविंशतिनक्षत्रेषु चतुर्दशयोनयः सन्ति। ताः अश्व–महिष–सिंह–गज–मेष–वानरः– नकुल–सर्प–मृग–श्वान–मार्जार–मूषक–व्याघ्र–गौवश्चेति। तत्र कस्य नक्षत्रस्य का योनिः इत्यस्मिन् विषये उक्तं यत् – अश्विनीशतभिषयोः अश्वयोनिः, स्वातिहस्तयोः महिषयोनिः, धनिष्ठापूर्वाभाद्रपदयोः सिंहः, भरणीरेवत्योः गजः, कृतिकापुष्ययोः अजः, श्रवणपूर्वाषाढयोः वानरः, अभिजितुत्तराषाढयोः नकुलः, मृगशिरारोहिण्योः सर्पः, अनुराधाज्येष्ठयोः मृगः, आर्द्रामूलयोः श्वानः, पुनर्वस्वाश्लेषयोः मार्जारः, मघापूर्वाफाल्गुन्योः मूषकः, विशाखाचित्रयोः व्याघ्रः, उत्तराफाल्गुनी–उत्तराभाद्रपदयोः गौ योनि भवति। अत्र पूर्वं यत् नक्षत्रमुच्यते तस्य पुंयोनिः तथा च अपरनक्षत्रस्य स्त्रीयोनिः इति बोधव्यम्। चक्रेण स्पष्टम्–

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| नक्षत्रम् | अश्वि. | भरणी | कृतिका | रोहिणी | मृग. | आर्द्रा | पुनर्वसुः |
| योनिः | अश्वः | गजः | अजः | सर्पः | सर्पः | श्वानः | मार्जारः |
| नक्षत्रम् | पुष्यः | आश्ले. | मघा | पू.फा. | उ.फा. | हस्तः | चित्रा |
| योनिः | अजः | मार्जारः | मूषकः | मूषकः | गौः | महिषः | व्याघ्रः |
| नक्षत्रम् | स्वातिः | विशा. | अनु. | ज्ये. | मूला | पू.षा. | उ.षा. |
| योनिः | महिषः | व्याघ्रः | मृगः | मृगः | श्वानः | वानरः | नकुलः |
| नक्षत्रम् | अभि. | श्रवणः | धनि. | शत. | पू.भाद्र. | उ.भाद्र. | रेवती |
| योनिः | नकुलः | वानरः | सिंहः | अश्वः | सिंहः | गौः | गजः |

**ग्रहमैत्री**–अष्टकूटेषु ग्रहमैत्र्यां गुणपञ्चकं भवति। अष्टकूटमिलाने ग्रहमैत्र्याः विचारं वरवध्वोः राशिभ्यां क्रियते। अत्र प्रसङ्गक्रमे कस्य ग्रहस्य कः सुहृदः, कः शत्रुः, कः समः इत्यस्मिन् विषये विचारम् अपेक्षणीयम्। अतः अत्र सर्वप्रथमं ग्रहाणां नैसर्गिकमैत्रीविचारं प्रस्तूयते।

सूर्यस्य जीवेन्दुकुजाः सुहृदाः, मन्दशुक्रौ शत्रू, बुधः समः भवति। चन्द्रस्य बुधार्कौ सुहृदौ कुजशुक्रजीवार्कयः समाः भवन्ति। कुजस्य अर्केन्दुजीवाः सुहृदाः बुधः शत्रुः शुक्रमन्दौ समौ भवतः। बुधस्य शुक्रार्कौ सुहृदौ कुजयमजीवाः समाः चन्द्रः शत्रुः भवति। जीवस्य अर्केन्दुकुजाः सुहृदाः यमः समः बुधशुक्रौ शत्रू भवतः। शुक्रस्य सूर्यशुक्रौ सुहृदौ, जीवकुजौ समौ अर्केन्दू शत्रू भवतः। शनैश्चरस्य शुक्रबुधौ सुहृदौ गुरुः समः कुजेन्द्वर्काः शत्रवः भवन्तीति। चक्रेण स्पष्टम्–

| ग्रहाः | सूर्यः | चन्द्रः | कुजः | बुधः | जीवः | शुक्रः | मन्दः |
|---|---|---|---|---|---|---|---|
| मित्राणि | चन्द्रः, कुजः, जीवः | सूर्यः, बुधः | सूर्यः, चन्द्रः, जीवः | सूर्यः, शुक्रः | सूर्यः, चन्द्रः, कुजः | बुधः, मन्दः | बुधः, शुक्रः |
| समाः | बुधः | कुजः, जीवः, शुक्रः, मन्दः | भौमः, शुक्रः, शनिः | भौमः, जीवः, शनिः | शनिः | कुजः, जीवः | जीवः |
| शत्रवः | शुक्रः, मन्दः | | बुधः | चन्द्रः | बुधः, शुक्रः | सूर्यः, चन्द्रः | सूर्यः, चन्द्रः, कुजः |
| राशिः | सिंहः | कर्कः | मेषः, वृश्चिकः | मिथुनः, कन्या | धनुः, मीनः | वृषः, तुला | मकरः, कुम्भः |

**गणकूटम्**–अष्टकूटेषु षष्ठं कूटं गणकूटमस्ति। अष्टकूटमिलाने गणकूटस्य षड्गुणाः भवन्ति। गणकूटस्य विचारं वरवध्वोः नक्षत्राभ्यां क्रियते। त्रयः गणाः सन्ति। ते देव–नर–राक्षसाः। अश्विनी–मृगशिरा–पुनर्वसु–पुष्य–हस्त–स्वाति–अनुराधा–श्रवण–रेवतीनक्षत्राणि देवसंज्ञकानि, भरणी–रोहिणी–आर्द्रा–पूर्वाफाल्गुनी–उत्तराफाल्गुनी–पूर्वाषाढा–उत्तराषाढा–पूर्वाभाद्रपद–उत्तराभाद्रपदनक्षत्राणि नरसंज्ञकानि तथा च कृत्तिका–आश्लेषा–मघा–चित्रा–विशाखा–ज्येष्ठा–मूला–धनिष्ठा–शतभिषानक्षत्राणि राक्षससंज्ञकानि सन्ति। चक्रेण स्पष्टम् –

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| नक्षत्राणि | अश्वि. | भर. | कृत्ति. | रोहि. | मृग. | आर्द्रा | पुन. | पुष्यः | आश्ले. |
| गणाः | देवः | नरः | राक्षसः | नरः | देवः | नरः | देवः | देवः | राक्षसः |
| नक्षत्राणि | मघा | पू.फा. | उ.फा. | हस्तः | चित्रा | स्वा. | विशा. | अनु. | ज्ये. |
| गणाः | राक्षसः | नरः | नरः | देवः | राक्षसः | देवः | राक्षसः | देवः | राक्षसः |
| नक्षत्राणि | मूला | पू.षा. | उ.षा. | श्रव. | धनि. | शत. | पू.भाद्र. | उ.भाद्र. | रेवती |
| गणाः | राक्षसः | नरः | नरः | देवः | राक्षसः | राक्षसः | नरः | नरः | देवः |

**भकूटम्**–अष्टकूटेषु सप्तमं कूटं भकूटमिति। भकूटस्य सप्तगुणाः सन्ति। भकूटस्य निर्णयः वरवध्वोः नक्षत्रात् राशितः वा क्रियते। मुहूर्ततचिन्तामणेः प्रमुखरूपेण सप्तभकूटानि सन्ति। तानि राश्यैक्य–समसप्तक–तृतीयैकादश–चतुर्थदशम–षडष्टक–नवपंचम–द्विर्द्वादशश्चेति। तत्र समसप्तक–तृतीयैकादश–चतुर्थदशमश्चोत्तमम्, तथा च षडष्टक–नवपञ्चम–द्विर्द्वादशश्च दुर्भकूटमित्यभिधीयते। अपित्वेषु सप्तभकूटेषु सर्वेषां भकूटानां शुभाशुभौ भेदद्वयं वर्तते। वरवध्वोः राशीशः यदि सुहृदः तर्हि शुभं तथा च यदि शत्रुता भवति चेत् तर्हि अभुभं स्मृतमिति।

**1. राश्यैक्यम्**-यदि वरवध्वोः एको राशिः भवेत्तदा तयोः दाम्पत्यजीवनं शुभं सुखप्रदञ्च भवति। अष्टकूटमिलाने वरवध्वोः राश्यैक्यं सर्वेषां दोषाणां नाशकं भवति। परं राश्यैक्येन सह नक्षत्रैक्यं त्याज्यं भवति। अर्थात् अशुभं स्मृतमिति। राश्यैक्यं चतुर्विधं भवति।

1. राश्यैक्यं नक्षत्रभेदः।
2. नक्षत्रैक्यं राशिभेदः।
3. राश्यैक्यं नक्षत्रैक्यं परं चरणभेदः।
4. राश्यैक्यं नक्षत्रैक्यं चरणैक्यं च।

एषु चतुर्षु राश्यैक्यं नक्षत्रैक्यं चरणैक्यं च पूर्णरूपेण दूषितो भवति। अर्थात् यदि वरवध्वोः अष्टकूटमिलाने राश्यैक्यं नक्षत्रैक्यं चरणैक्यं च भवति तदा पाणिपीडनं वर्जनीयमशुभञ्च भवति। यदि चरणभेदो भवेत्तदा विवाहः कल्याणकारकः शुभश्च भवति। परन्तु यदि वरवध्वोः रोहिणी-आर्द्रा-मघा-विशाखा-पुष्य-श्रवण-रेवती-पूर्वाभाद्रपदानक्षत्राणि भवन्ति तदा राश्यैक्ये नक्षत्रैक्ये चरणैक्ये च दोषो न भवति। अर्थात् कथितनक्षत्रेषु यदि राशिनक्षत्रचरणेष्वैक्यं भवति तदा विवाहः शुभप्रदः भवति।

**2. समसप्तकम्**-मेषतुले, वृषवृश्चिकौ, मिथुनधनू, कर्कमकरौ, सिंहकुम्भौ, कन्यामीनौ (1-7, 2-8, 3-9, 4-10, 5-11, 6-12) षड्प्रकारकाः समसप्तकाः भवन्ति। उभयोः वरवध्वोः जन्मराश्योः परस्परं समसप्तकयोगः शुभफलप्रदः भवति। अत्र यदि उभयोः राश्योर्मैत्र्यं न स्यात्तदापि सम्बन्धः शुभो भवतीति। किन्तु केचन विद्वांसः अष्टकूटमेलापके कर्कमकराभ्यां तथा सिंहकुम्भाभ्यां निर्मितः समसप्तकः अशुभप्रदः मन्यन्ते। यः विवाहे त्याज्यः भवति। एवमेव केचन विद्वांसः मेषतुलाभ्यां, मिथुनधनूभ्यां, सिंहकुम्भाभ्यां च निर्मितः समसप्तकः विवाहे त्यजनीयः मन्यन्ते। अर्थात् वृषवृश्चिकाभ्याम्, कन्यामीनाभ्याम् निर्मितः समसप्तकः सर्वदा शुभप्रदः भवति।

**3. चतुर्थदशमम्**-वरवध्वोः राश्योः चतुर्थदशमयोः योगः शुभप्रदः भवति। चतुर्थदशमयोः कुण्डल्यां द्वादशभेदाः भवन्ति। ते मेषकर्कौ, वृषसिंहौ, मिथुनकन्ये, कर्कतुले, सिंहवृश्चिकौ, कन्याधनू, तुलामकरौ, वृश्चिककुम्भौ, धनुमीनौ, मकरमेषौ, कुम्भवृषभौ, मीनमिथुनौ च (1-4, 2-5, 3-6, 4-7, 5-8, 6-9, 7-10, 8-11, 9-12, 10-1, 11-2, 12-3) इति। तत्र मेषराशौ स्वामी कुजः तथा कर्कस्य स्वामी चन्द्रः अस्ति, तथा च कुजस्य चन्द्रः मित्रः अर्थात् विवाहे शुभप्रदः भवति। वृषस्य स्वामी शुक्रः सिंहस्य सूर्यः तथा च शुक्रस्य सूर्यः शत्रु भवति अतः विवाहे अशुभप्रदः। मिथुनस्य स्वामी बुधः तथा च कन्यायाः स्वामी अपि बुधः अतः विवाहे शुभप्रदः। कर्कस्य स्वामी चन्द्रः तथा च तुलायाः स्वामी शुक्रः अस्ति। शुक्रः चन्द्रस्य समः तथा च चन्द्रः शुक्रस्य शत्रुः अर्थात् विवाहे अशुभप्रदः भवति। सिंहस्य स्वामी दिवाकरः तथा च वृश्चिकस्य स्वामी कुजः भवति। दिवाकरकुजौ परस्परमित्रे भवतः अतः विवाहः प्रशस्तः इति। कन्यायाः स्वामी बुधः तथा च धनोः स्वामी जीवः अस्ति। बुधस्य जीवः समः तथा च जीवस्य बुधः शत्रुः भवति अतः विवाहे अप्रशस्तः इति स्मृतः। तुलायाः स्वामी शुक्रः तथा च मकरस्य स्वामी मन्दः भवति। शुक्रमन्दौ परस्परमित्रे भवतः अतः विवाहे शुभः भवति। वृश्चिकस्य स्वामी कुजः तथा च कुम्भस्य स्वामी शनैश्चरः भवति। कुजस्य शनैश्चरः समः तथा च शनैश्चरस्य कुजः शत्रुः अस्ति अतः विवाहे अप्रशस्तमिति। धनोः स्वामी जीवः तथा च मीनस्य स्वामी अपि जीवः भवति। अतः विवाहे प्रशस्तम् विज्ञेयम्। मकरस्य स्वामी शनिः तथा च मेषस्य स्वामी कुजः अस्ति। कुजस्य शनैश्चरः समः तथा च मन्दस्य कुजः शत्रुः अस्ति अतः विवाहे अप्रशस्तम्। कुम्भस्य स्वामी मन्दः तथा च वृषस्य स्वामी शुक्रः अस्ति। मन्दशुक्रौ मित्रे स्तः। अतः विवाहे प्रशस्तं स्मृतम्। एवमेव मीनस्य स्वामी जीवः तथा च मिथुनस्य स्वामी बुधः अस्ति। जीवस्य बुधः शत्रुः तथा च बुधस्य जीवः समः अस्ति। अतः विवाहे अप्रशस्तमिति स्मृतम्। अर्थात् यदि वरवध्वोः चतुर्थदशमराशी भवतः चेत् तर्हि मेषकर्कयोः, मिथुनकन्ययोः, सिंहवृश्चिकयोः, तुलामकरयोः, धनुमीनयोः, कुम्भवृषयोः अधिपतिषु मैत्र्यं एकाधिपत्यञ्च भवति। अतः उपरोक्त युग्मेषु विवाहः शुभप्रदः भवति तथा च वृषसिंहयोः, कर्कतुलयोः, कन्याधन्वोः, वृश्चिककुम्भयोः, मकरमेषयोः, मीनमिथुनयोः अधिपतिषु शत्रुता भवति। अतः एषु युग्मेषु विवाहसम्बन्धं कष्टप्रदमशुभञ्च भवतीति स्मृतम्।

**4. तृतीयैकादशम्**-त्रिरेकादशयोरपि कुण्डल्यां द्वादशभेदाः सन्ति। ते मेषमिथुनौ, वृषकर्कौ, मिथुनसिंहौ, कर्ककन्ये, सिंहतुले, कन्यावृश्चिकौ, तुलाधनू, वृश्चिकमकरौ, धनुकुम्भौ, मकरमीनौ, कुम्भाजौ, मीनवृषौ च इति। अष्टकूटमिलाने वरकन्ययोः राश्योः परस्परं त्रिरेकादशः सम्बन्धः सर्वथा शुभफलदायको धनप्रदायको च भवति। अत्रसंशयः जनयति यदि चतुर्थदशमयोः सम्बन्धे वयं राशीशानां मित्रशत्रुविचारेण षड्प्रकारकस्य सम्बन्धः अशुभः तथा षड्प्रकारकस्य सम्बन्धः शुभः प्रकल्पितः तर्हि अत्र अयं विचारः केन कारणेन न भवति। अतः मम मत्यनुसारं अत्रापि शत्रुमित्रादिविचारः अपेक्षणीयः। यथा मेषस्य स्वामी कुजः तथा च मिथुनस्य स्वामी बुधः अस्ति। कुजस्य बुधः शत्रुः तथा च बुधस्य कुजः समः अस्ति। अतः विवाहे अशुभप्रदः। वृषस्य स्वामी शुक्रः तथा च कर्कस्य स्वामी उडुपतिरस्ति। शुक्रस्य चन्द्रः शत्रुः तथा च चन्द्रस्य शुक्रः समः अस्ति। अतः विवाहे अशुभप्रदः। मिथुनस्य स्वामी बुधः तथा च सिंहस्य स्वामी सूर्यः अस्ति। बुधस्य सूर्यः सुहृदः तथा च सूर्यस्य बुधः समः अस्ति। अतः विवाहे शुभप्रदः स्मृतः। कर्कस्य स्वामी चन्द्रः तथा कन्यायाः स्वामी बुधः अस्ति। चन्द्रस्य बुधः सुहृदः तथा बुधस्य चन्द्रः शत्रुः अस्ति। अतः विवाहसम्बन्धः समः इति विज्ञेयम्। सिंहस्य स्वामी सूर्यः तथा तुलायाः स्वामी शुक्रः अस्ति। दिवाकरशुक्रयोः परस्परवैरमस्ति। अतः विवाहः अप्रशस्तः अशुभश्च स्मृतम्। कन्यायाः स्वामी बुधः तथा वृश्चिकस्य स्वामी कुजः अस्ति। बुधस्य कुजः समः तथा कुजस्य बुधः शत्रुः अस्ति। अतः विवाहसम्बन्धः अशुभप्रदः स्मृतः। तुलायाः स्वामी शुक्रः तथा धनोः स्वामी जीवः अस्ति। शुक्रस्य जीवः समः तथा च जीवस्य शुक्रः शत्रुः अस्ति। अतः विवाहः अप्रशस्तः इति। वृश्चिकस्य स्वामी कुजः तथा मकरस्य स्वामी शनैश्चरः अस्ति। कुजस्य मन्दः समः तथा शनैश्चरस्य कुजः शत्रुः अतः विवाहः अशुभप्रदः इति विज्ञेयः। धनोः

स्वामी जीवः तथा कुम्भस्य स्वामी मन्दः अस्ति। जीवमन्दौ परस्परं समौ स्तः। अतः विवाहसम्बन्धः समः इति स्मृतः। मकरस्य स्वामी मन्दः तथा मीनस्य स्वामी गुरुः अस्ति। मन्दजीवौ परस्परं समौ स्तः। अतः विवाहः समः भवतीति विज्ञेयः। कुम्भस्य स्वामी मन्दः तथा मेषस्य स्वामी कुजः अस्ति। मन्दस्य कुजः शत्रुः तथा कुजस्य मन्दः समः भवति। अतः विवाहः अशुभप्रदः भवति। एवमेव मीनस्य स्वामी जीवः तथा वृषभस्य स्वामी शुक्रः अस्ति। जीवस्य शुक्रः शत्रुः तथा शुक्रस्य जीवः समः अस्ति। अतः विवाहः अप्रशस्तः। अर्थात् वयं कथयितुं शक्नुमः यत् वरवध्वोः राश्योः त्रिरेकादशः सम्बन्धः यदि मिथुनसिंहौ भवति चेत् महत्शुभं बहुधनप्रदायकः, कर्ककन्ये–धनुकुम्भौ–मकरमीनौ च भवति चेत् शुभप्रदः धनप्रदायकः, एवं मेषमिथुनौ–वृषकर्कौ–सिंहतुले–कन्यावृश्चिकौ–तुलाधनू–वृश्चिकमकरौ–कुम्भमेषौ–मीनवृषभौ च चेत्तर्हि सामान्यधनप्रदायकः भवतीति।

**5. षडष्टकम्**–षडष्टकयोः कुण्डल्यां द्वादशभेदाः सन्ति। ते मेषवृश्चिकौ, वृषधनू, मिथुनमकरौ, कर्ककुम्भौ, सिंहमीनौ, कन्यामेषौ, तुलावृषभौ, वृश्चिकमिथुनौ, धनुकर्कौ, मकरसिंहौ, कुम्भकन्ये, मीनतुले च इति। वरवध्वोः कुण्डलयोः षडष्टकसम्बन्धः त्याज्यः अप्रशस्तश्च मन्यते। परन्तु केचन विद्वांसः एषु द्वादशभेदेष्वपि षड्प्रकारको षडष्टकसम्बन्धः शुभः तथा षड्प्रकारको पडष्टकसम्बन्धोऽशुभः इति मन्यन्ते। अर्थात् मेषवृश्चिकयोः स्वामी कुजः अस्ति। अतः विवाहे शुभकारकः भवति। वृषस्य स्वामी शुक्रः तथा धनोः स्वामी जीवः अस्ति। शुक्रस्य जीवः समः तथा जीवस्य शुक्रः शत्रुः अस्ति। अतः विवाहे न प्रशस्तम्। मिथुनस्य स्वामी बुधः तथा मकरस्य स्वामी मन्दः अस्ति। बुधस्य मन्दः समः तथा मन्दस्य बुधः सुहृदः अस्ति। अतः विवाहे प्रशस्तम्। कर्कस्य स्वामी चन्द्रः तथा कुम्भस्य स्वामी मन्दः अस्ति। चन्द्रस्य मन्दः समः तथा मन्दस्य चन्द्रः शत्रुः अस्ति। अतः विवाहे न शुभकरः। सिंहस्य स्वामी सूर्यः तथा मीनस्य स्वामी जीवः अस्ति। दिवाकरजीवौ परस्परसुहृदौ स्तः। अतः विवाहे प्रशस्तम्। कन्यायाः स्वामी बुधः तथा मेषस्य स्वामी कुजः अस्ति। बुधस्य कुजः समः तथा कुजस्य बुधः शत्रुः अस्ति। अतः विवाहे अशुभकरः विज्ञेयः। तुलावृषभयोः स्वामी शुक्रः अस्ति। अतः एकाधिपत्येन विवाहः शुभकरः स्मृतः। वृश्चिकस्य स्वामी कुजः तथा च मिथुनस्य स्वामी बुधः अस्ति। कुजस्य बुधः शत्रुः तथा बुधस्य कुजः समः अस्ति। अतः विवाहे अप्रशस्तम्। धनोः स्वामी जीवः तथा कर्कस्य स्वामी निशापतिः अस्ति। जीवस्य चन्द्रः सुहृदः तथा चन्द्रस्य जीवः समः अतः विवाहे शुभकरः इति। मकरस्य ईशः मन्दः तथा च सिंहस्य ईशः दिवाकरः अस्ति। मन्ददिवाकरयोः परस्परवैरमस्त्यतः विवाहे अप्रशस्तम्। कुम्भस्य स्वामी मन्दः तथा कन्यायाः स्वामी बुधः अस्ति। मन्दस्य बुधः सुहृदः तथा बुधस्य मन्दः समः अस्ति। अतः विवाहे शुभकरः। मीनस्य स्वामी जीवः तथा तुलायाः स्वामी शुक्रः अस्ति। जीवस्य शुक्रः शत्रुः तथा शुक्रस्य जीवः समः अस्ति। अतः विवाहे अप्रशस्तमिति विज्ञेयम्। अर्थात् संक्षेपेण वयं कथयितुं शक्नुमः यत् यदि वरवध्वोः कुण्डल्यां मेषवृश्चिकयोः, मिथुनमकरयोः, सिंहधन्वोः, तुलावृषयोः, धनुकर्कयोः, कुम्भतुलयोश्च षडष्टकसम्बन्धः विवाहे प्रशस्तः शुभकरश्च भवति तथा च वृषधन्वोः, कर्ककुम्भयोः, कन्यामेषयोः, वृश्चिकमिथुनयोः, मकरसिंहयोः, धनुतुलयोः सम्बन्धः विवाहे अप्रशस्तः अशुभश्च भवतीति स्मृतः।

**6. नवपञ्चकम्**–''अपत्यहानिर्नवात्मजे'' अर्थात् नवपञ्चमे बालानां नाशो भवति। अर्थात् कन्यायाः वरस्य तथा वरात् कन्यायाः राशिर्नवपञ्चमे यदा भवेत्तदा सन्तानहानिः भवति। नवपञ्चमयोः कुण्डल्यां द्वादशभेदाः भवन्ति। ते मेषधनू, वृषमकरौ, मिथुनकुम्भौ, कर्कमीनौ, सिंहमेषौ, कन्यावृषभौ, तुलामिथुनौ, वृश्चिककर्कौ, धनुसिंहौ, मकरकन्ये, कुम्भतुले, मीनवृश्चिकौ च। नवपञ्चकस्य सर्वे युग्माः सुहृदाः भवन्ति। परन्त्वत्रापि षड् युग्माः शुभा तथा च अवशिष्टषड्युग्माः विवाहे अप्रशस्ता इति मन्यन्ते विद्वांसः। मेषचापयोः, मकरवृषयोः, मिथुनकुम्भयोः, कर्कमीनयोः कुम्भतुलयोः, वृश्चिकमीनयोश्च युग्माः अशुभाः दुखकारकाश्च भवन्ति तथा च मेषसिंहयोः, कन्यावृषभयोः, तुलामिथुनयोः, वृश्चिककर्कयोः, धनुसिंहयोः, कन्यामकरयोश्च युग्माः शुभकराः बहुपुत्रलाभकराश्च भवन्ति। केचन विद्वांसः मन्यन्ते यत् वरस्य पञ्चमः कन्यायाः कन्यायाः नवमो वरः भवति तदा नवपञ्चम दोषो न भवतीति।

**7. द्विर्द्वादशभकूटम्**–यदि वरकन्ययोः राशिः परस्परं द्विर्द्वादशे भवेत्तदा विवाहः निर्धनत्वकारको भवति। अतः द्विर्द्वादशः विवाहे वर्जनीयः। पुरुषस्य राशितः कन्यायाः राशिः द्वितीयो भवेत्तदा कन्या धनहानिकारिका भवति तथा च यदि वरस्य राशितः कन्यायाः राशिः द्वादशो भवेत्तदा सा धनवती पतिप्रिया च भवति। द्विर्द्वादशभकूटस्यापि द्वादशभेदाः सन्ति। ते मेषवृषभौ, मिथुनकर्कौ, सिंहकन्ये, तुलावृश्चिकौ, धनुमकरौ, कुम्भमीनौ, मीनमेषौ, वृषमिथुनौ, कर्कसिंहौ, कन्यातुले, वृश्चिकधनू, मकरकुम्भौ च इति। एतेष्वपि षड् शुभाः षड् च अशुभाः इति। अर्थात् यदा वरकन्ययोः कन्यावरयोः वा राशी मीनमेषौ, वृषमिथुनौ, कर्कसिंहौ, कन्यातुले, वृश्चिकधनू, मकरकुम्भौ च भवेतान्तदा विवाहः शुभफलदो भवति , तथा च मेषवृषभौ, मिथुनकर्कौ, सिंहकन्ये, तुलावृश्चिकौ, धनुमकरौ, कुम्भमीनौ च भवेत्तदा विवाहो अशुभकरः अनिष्टप्रदो वा भवति। एवमेव द्विर्द्वादशभकूटे कदी कीदृशं फलं मिलति इत्यस्मिन् विषये वसिष्ठकश्यपौ भणितौ यत् – मीनमेषयोः आयुष्यः, वृषमिथुनयोः पुत्रलाभः, कर्कसिंहयोः सम्पत्तिर्पुत्रलाभश्च, कन्यातुलयोः पतिसौख्यम्, वृश्चिकधन्वोः सौभाग्यलाभः, मकरकुम्भयोः धनधान्यादिलाभश्च स्मृतः। मेषवृषयोः वैधव्यम्, मिथुनकर्कयोः मृत्युः, सिंहकन्ययोः वधम्, तुलावृश्चिकयोः बन्धनम्, धनुमकरयोः वियोगः, कुम्भमीनयोः सन्तापमतीवदुःखञ्च स्मृतमिति।

**नाड़ीकूटम्**–अष्टकूटसमुदाये नाड़ीकूटं सकलकूटेषु प्रधानमस्ति। यः ब्रह्मणः कन्यायाः कण्ठस्य सूत्रेण विनिर्मितः। नाड़ीकूटस्य अष्टगुणाः भवन्ति। वरकन्ययोः नक्षत्रानुसारेण नाड़ीकूटस्य ज्ञानं भवति। सप्तविंशतिः नक्षत्रेषु त्रिविधाः नाड्याः भवन्ति। ताः आदि–मध्य–अन्त्याश्च इति। अश्विनी–आर्द्रा–पुनर्वसु–उत्तराफाल्गुनी–हस्त–ज्येष्ठा–मूला–शतभिषा–पूर्वाभाद्रपदश्च नक्षत्राणां आद्या नाड़ी, पुष्य–मृगशिरा–चित्रा–अनुराधा–भरणी–धनिष्ठा–पूर्वाषाढा–पूर्वाफाल्गुनी–उत्तराभाद्रपदश्च नक्षत्राणां मध्या नाड़ी, तथा च कृत्तिका–रोहिणी–स्वाति–विशाखा–आश्लेषा–मघा–उत्तराषाढ–श्रवण–रेवत्यश्च नक्षत्राणां अन्त्या नाड़ी भवति। चक्रेण स्पष्टम्–

| नक्षत्राणि | अश्वि. | भर. | कृति. | रोहि. | मृग. | आर्द्रा | पुन. | पुष्यः | आश्ले. |
|---|---|---|---|---|---|---|---|---|---|
| नाड्यः | आदि | मध्य | अन्त्य | अन्त्य | मध्य | आदि | आदि | मध्य | अन्त्य |
| नक्षत्राणि | मघा | पू.फा. | उ.फा. | हस्तः | चित्रा | स्वा. | विशा. | अनु. | ज्ये. |
| नाड्यः | अन्त्य | मध्य | आदि | आदि | मध्य | अन्त्य | अन्त्य | मध्य | आदि |
| नक्षत्राणि | मूला | पू.षा. | उ.षा. | श्रव. | धनि. | शत. | पू.भाद्र. | उ.भाद्र. | रेवती |
| नाड्यः | आदि | मध्य | अन्त्य | अन्त्य | मध्य | आदि | आदि | मध्य | अन्त्य |

कदा कति गुणाः लभ्यन्ते इत्यस्मिन् विषये उक्तं यत् यदि वरकन्ययोः नाड़ी यदि एकैव स्यात तर्हि अशुभकरा मृत्युप्रदा च भवति। अर्थात् यदि वरकन्ययोः नाड़ी आदि स्यात् तर्हि शून्यं गुणं, यदि मध्या स्यात् तर्ह्यपि शून्यं गुणं तथा च यदि उभयोः नाडी अन्त्या स्यात् तर्हि शून्यं गुणं भवति। एवमेव एकस्य नाडी आदि तथा अपरस्य नाडी मध्यान्त्यौ स्तः तर्हि अष्टाः गुणाः, यदि एकस्य नाडी मध्या तथा च अपरस्य आदि-अन्त्यौ च स्यात् तर्हि अष्टगुणाः, यदि एकस्य नाड़ी अन्त्या तथा च अपरस्य नाडी आदिमध्यौ च स्तः तर्हि अपि अष्टगुणाः भवन्तीति। चक्रेण स्पष्टम् -

वरस्य नाडी

| कन्यायाः नाडी | नाडी | आदिः | मध्यः | अन्त्यः |
|---|---|---|---|---|
| आदिः | 0 | 8 | 8 | |
| मध्यः | 8 | 0 | 8 | |
| अन्त्यः | 8 | 8 | 0 | |

## पाददिप्पणी

1. नाडीराशितदीशयोनिवनितादीर्घा गणाश्चापि षड्
वर्गामुख्यतरा विवाहसमये शेषास्तु मध्यास्ततः।
माहेन्द्रो गणितायवश्यदिवसा वर्णोडुविद्धाण्डजा
रज्जुर्योगिनि लिङ्गभूतशशियुग्गोत्राह्वया विंशतिः।। पूर्वकालामृतम्, तृतीयो विन्दुः, श्लो.61
2. वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम्।
गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः।। मुहूर्ततचिन्तामणिः, अ.6, श्लो. 21
3. मेषवृषधन्विसिंहाश्चतुष्पदा मकरपूर्वभागश्च।
कीटः कर्कटराशिः सरीसृपो वृश्चिकः कथितः।।
मकरस्य पश्चिमार्धं ज्ञेयो मीनश्च जलचरः ख्यातः।
मिथुनतुलाघटकन्या द्विपदाख्या धन्विपूर्वभागश्च।। लघुजातकम्, अ.1, श्लो.12-13
4. जन्माख्यसम्पद्विपदः क्षेमप्रत्यरिसाधकाः।
वधमैत्रातिमैत्राः स्युस्ताराः नामसदृक्फलाः।। मुहूर्ततचिन्तामणिः, अ.4, श्लो.12
5. क. कन्यर्क्षाद्वरभं यावत् कन्याभं वरभादपि।
गणयेन्नवहृच्छेषे त्रीष्वद्रिभमसत्स्मृतम्।। मुहूर्ततचिन्तामणिः, अ.6, श्लो.24
ख. स्त्रीभमारभ्य गणने नव पर्यायतः क्रमात्।
जन्मत्रिपञ्चसप्तस्थं पुम्भं स्याद्वरनाशनम्।।
पुम्भमारभ्य गणने स्त्रीभं जन्मादिके स्थले।
स्त्रीविनाशो भवेत्तस्माद्दिनकूटं विवर्जयेत्।।
नारदसंहिता, उद्धृत् वृहद्दैवज्ञरंजनम्, 71/291,292
ग. गणयेत् कन्यकाधिष्ण्यादावृत्त्या वरजन्मभम्।
जन्मत्रिपञ्चसप्तर्क्षं हित्वाऽन्यर्क्षं शुभप्रदम्।। काश्यपसंहिता, उद्धृत् वृहद्दैवज्ञरंजनम्, 71/295
6. एकतो लभ्यते तारा शुभाश्चैवाऽन्यतोऽशुभाः।
तदा सार्द्धो गुणाश्चैव ताराशुद्धया मिथस्त्रयम्।।
उभयोर्न शुभस्तारा तदा शून्यं समादिशेत्।। दैवज्ञमनोहर, उद्धृत् मुहूर्ततचिन्तामणिः, पृ.सं.339
7. क. अश्विन्यम्बुपयोर्हयो निगदितः स्वात्यर्कयोः कासरः
सिंहो वस्वजपाद्भयोः समुदितो याम्यान्त्ययोः कुञ्जरः।
मेषो देवपुरोहितानलभयोः कर्णाम्बुनोर्वानरः
स्याद्वैश्वाभिजितोस्तथैव नकुलश्चान्द्राब्जयोन्योरहिः।।
ज्येष्ठामैत्रभयोः कुरङ्ग उदितो मूलार्द्रयो श्वा तथा
मार्जारोऽदितिसार्पयोरथ मघायोन्योस्तथैवोन्दुरुः।
व्याघ्रो द्वीशभचित्रयोरपि च गौरर्यम्णबुध्न्यर्क्षयो-
र्योनिः पादगयोः परस्परं महावैरं भयोन्योस्त्यजेत्।। मुहूर्ततचिन्तामणिः, अ.6, श्लो.25-26
ख. अश्वेभाजभुजङ्गभोगिशुनका मार्जारबस्ताह्वयौ
मार्जारोन्दुरुमूषिकोक्षमहिषा व्याघ्रीमहिष्यौ तथा।
शार्दूलो हरिणः कुरङ्गशुनकौ शाखामृगो गौः
कपिर्नार्यश्वौ नरगोगजाश्च कथिता भानां क्रमाद्योनयः।।
विद्यामाधवीयम्, भाग-2, पृ.सं.145, श्लो. 11
ग. अश्वेभाजफणिद्वयं च विषभुक्षस्ततो मूषिक
श्चाखुर्गौः क्रमशस्ततोऽपि महिषो व्याघ्रः पुनस्सैरिभः।
व्याघ्रैणौ मृगमण्डलः कपिरथो बभ्रुद्वयं वानरः
सिंह श्वो मृगराट्पशुश्च करटोऽयोनिस्तु भानामियम्।।
श्रीपतिः, उद्धृत, विद्यामाधवीयम्, भाग-2, पृ.सं.145
8. क. शत्रू मन्दसितौ समश्च शशिजो मित्राणि शेषा रवेः।
तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः।।
जीवेन्दूष्णकराः कुजस्य सुहृदौ ज्ञोऽरिः सितार्की समौ।
मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे।।
सुरेः सौम्यसितावरि रविसुतो मध्योऽपरे त्वन्यथा।
सौम्यार्की सुहृदौ समौ कुजगुरु शुक्रस्य शेषावरी।।
शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरस्य चान्येऽरयो। लघुजातकम्, अ.2, श्लो.
ख. मित्राणि द्युमणेः कुजेज्यशशिनः शुक्रार्कजौ वैरिणौ

सौम्यश्चास्य समो विधोर्बुधरवी मित्रे न चास्य द्विषत्।
शेषाश्चास्य समा: कुजस्य सुहृदश्चन्द्रेज्यसूर्या बुध:
शत्रु: शुक्रशनी समौ च शशभृत्सूनो: सिताहस्करौ।।
मित्रे चास्य रिपु: शशी गुरुशनिक्ष्माजः समा गीष्पते-
र्मित्राण्यर्ककुजेन्दवो बुधसितौ सत्रू सम: सूर्यजः।
मित्रे सौम्यशनी कवेः शशिरवी शत्रू कुजेज्यौ समौ
मित्रे शुक्रबुधौ शनेः शशिरविक्ष्माजा द्विषोऽन्य: सम:।।
मुहूर्त्तचिन्तामणि:, विवाहप्रकरणम्, अ.6, श्लो.27-28

9. रक्षोनरामरगणाः क्रमतो मघाहिवस्विन्द्रमूलवरुणानलतक्षराधाः।
पूर्वोत्तरात्रयविधातृयमेशभानि मैत्रादितीन्दुहरिपौष्णमरुल्लघुनि।।
मुहूर्त्तचिन्तामणि:, विवाहप्रकरणम्, अ.6,श्लो.29

10. एकराशौ शुभोद्वाह एकभांशे मृतिप्रदः। मार्तण्डवल्लभा,

11. दम्पत्योरेकनक्षत्रे भिन्नपादे शुभावहः।
दम्पत्योरेकपादे तु वर्षान्ते मरणं ध्रुवम्।। उद्धृत्, बृहद्दैवज्ञरंजनम्, 71/64

12. रोहिण्यार्द्रामघेन्द्राग्नीतिष्यश्रवणपौष्णभम्।
उत्तरा प्रोष्ठपाच्चैव नक्षत्रैक्येऽपि शोभनम्।। उद्धृत्, बृहद्दैवज्ञरंजनम्, 71/439

13. समसप्तके विवाहो भवति सखित्वं शुभं चैव। उद्धृत्, बृहद्दैवज्ञरंजनम्, 71/386

14. क. मृग: कुलीरेण घटेन सिंहो वैरप्रदः स्यात्समसप्तकोऽयम्। उद्धृत्, बृहद्दैवज्ञरंजनम्, 71/383
ख. मृग: कुलीरेण घटेन सिंह: वैरप्रदः स्यात्समसप्तकत्वम्।। उद्धृत् मुहूर्त्तचिन्तामणि:, विवाहप्रकरणम्, पियूषधाराटीका, पृ.सं.347

15. योगके सप्तके मेषतुल्ये युग्महयौ तथा।
सिंहघटौ सदा वर्ज्यौ मृतिं तत्राब्रवीच्छिवः।। उद्धृत्, बृहद्दैवज्ञरंजनम्, 71/385

16. उद्धृत् मुहूर्त्तचिन्तामणि:, विवाहप्रकरणम्, पियूषधाराटीका, पृ.सं.347

17. एकराशौ महाप्रीतिश्चतुर्थदशमे सुखम्।
तृतीयैकादशे वित्तं सुप्रजा समसप्तके।। उद्धृत्, बृहद्दैवज्ञरंजनम्, 71/347

18. क. वैरषड्काष्टकं मेषकन्ययोर्घटमीनयो:। चापक्षयोर्नृयुक्कीटभयोर्घट-कुलीरयो:।।
पञ्चास्यमृगयोर्जन्मराशेः प्रोक्तेऽशुभप्रदः। मित्रषष्ठाष्टकं कीटमेषयोर्वृष-जूकयोः।।
कर्किचापभयोर्मीनसिंहयोर्मृगयुग्मयो:। कन्यकाकुम्भयोरन्यत्प्रयत्नादिह वर्जयेत्।।
उद्धृत् मुहूर्त्तचिन्तामणि:, पियूषधाराटीका, पृ.सं.347
ख. मित्रषष्ठाष्टकं कीटमेषयोर्वृषजूकोः।
कर्किचापभयोर्मीनसिंहयोर्मृगयुग्मयो:।।
कन्यकाकुम्भयोरन्यत्प्रयत्नादिह वर्जयेत्।। उद्धृत्, बृहद्दैवज्ञरंजनम्, 71/366-367

19. मीनालिभ्यां युतकीटे कुम्भे मिथुनसंयुते।
मकरे कन्यकायुक्ते न कुर्यान्नवपञ्चकम्।। उद्धृत्, बृहद्दैवज्ञरंजनम्, 71/371

20. मेषे च चापे, मकरे वृषे च, कुम्भे च युग्मे, झष कर्कटे च।
कुम्भे तुलायां झषकीटयोश्च शत्रुत्रिकोणे वहुदुःखहानिः।।
मेषो च सिंहे, वृषभे च कन्यके युग्मे घटे वृश्चिककर्कटे च।
सिंहे च चापे, मकरे युवत्या, मित्रत्रिकोमे बहुपुत्रलाभः।।
उद्धृत् मुहूर्त्तचिन्तामणि:, पियूषधाराटीका, पृ.सं.347

21. क. वरस्य पञ्चमे कन्या कन्यायाः नवमे वर:।
एतत्त्रिकोणकं ग्राह्यं पुत्रपौत्रसुखावहम्।। बृहज्जयोतिषसार,
ख. पुंसो गृहात्सुतगृहे सुतहा च कन्या।
धर्मे स्थिता धनवती पतिवल्लभा च।। उद्धृत्, बृहद्दैवज्ञरंजनम्, 71/373

22. द्विर्द्वादशे धनगृहे धनहा च कन्या।
रिष्फे स्थिता धनवती पतिवल्लभा च।। उद्धृत्, बृहद्दैवज्ञरंजनम्, 71/380

23. सिंहः कुलीरेण मृगेण कुम्भस्तौलिः स्त्रिया चापधरेण कीटः।
वैशांरिणोजे च वृषेण युग्मं द्विर्द्वादशे भूरिधनप्रदाः स्युः।।उद्धृत्, बृहद्दैवज्ञरंजनम्, 71/379

24. क. द्विर्द्वादशं शुभं प्रोक्तं मीनादौ युग्मराशिषु।
मेषादौ युग्मंराशौ तु निर्धनत्वं न संशय:।।
उद्धृत् मुहूर्त्तचिन्तामणि:, पियूषधाराटीका, पृ.सं.347

25. आयुष्यसम्पत्सुतभोगसम्पत्पुत्रार्थसम्पत्पतिसौख्यसम्पत्।
सौभाग्यसम्पद्धनधान्यसम्पज्झषादियुग्मे क्रमतः फलानि।।
अजादियुग्मे क्रमतः फलानि वैधव्यमृत्युर्बधबन्धनानि।
वियोगसन्तापमतीव दुःखं वसिष्ठगर्गप्रमुखैः स्मृतानि।।
उद्धृत् मुहूर्त्तचिन्तामणि:, पियूषधाराटीका, पृ.सं.349

26. नाडीकूटं तु सङ्ग्राह्यं कूटानां तु शिरोमणि:।
ब्रह्मणा कन्यकाकण्ठसूत्रत्वेन विनिर्मितम्।।
उद्धृत् मुहूर्त्तचिन्तामणि:, पियूषधाराटीका, पृ.सं.356

27. ज्येष्ठार्यम्णेशनीराधिपभयुगयुगं दास्रभं चैकनाडी,
पुष्येन्दुत्वाष्टमित्रान्तकवसुजलभं योनिबुध्न्ये च मध्या।
वाय्वग्निव्यालविश्वोडुयुगयुगमथो पौष्णभं चापरा स्याद्
दम्पत्योरेकनाड्यां परिणयनमसन्मध्यनाड्यां हि मृत्युः।।
मुहूर्त्तचिन्तामणि:, विवाहप्रकरणम्, श्लो.सं.- 34

*शोधच्छात्रा*
*केन्द्रियसंस्कृतविश्वविद्यालय:, वेदव्यासपरिसर:, हिमाचलप्रदेश:*

ISSN 2456-3420

# हरिकथासम्प्रदाये श्रीहरिकथामृतस्य वैशिष्ट्यम्

डॉ. के. वरलक्ष्मीः

**कीलकपदानि-दृश्यकाव्यम्, भाणः, तौर्यत्रिकम् यक्षगानं, अभङ्ग, कथाकालक्षेपः, हरिकथा**

**शोधप्रबन्धसारः**-प्राचीनभारतीयसम्प्रदायानुसारं विद्याः चतुर्दश। अङ्गविद्याश्च चतुष्षष्टिः याः कलाः इति अभिधीयन्ते। एताः कलाः विनोदाय ज्ञानाय उपदेशाय च कल्पत इति साहित्यशास्त्रविदाम् अभिप्रायः। उपदेशात्मककलासु अन्तर्भवति हरिकथाकालक्षेपः इति अर्वाचीनसाहित्यकलाप्रक्रिया। प्रक्रियेयं नवविधभक्तिप्रचाराय सप्तदशशतके भारते प्रादुर्भूता। आन्ध्रतेलङ्गाणराज्ययोः साहित्यसङ्गीतनृत्यसमहार-विशिष्टा हरिकथा आपण्डितपामरं रञ्जयति स्म। दूरदर्शनादीनाम् आधुनिकसाधनानाम् आविष्कारेण विलुप्ता अधुनैषा कला। हरिकथावाङ्मयं तेलुगुभाषया प्रभूतं विरचितम्। तथापि उभयभाषापण्डितकवयः केचन हरिकथानिपुणाः संस्कृतेन तेलुगुभाषया च हरिकथावाङ्मयं व्यरचयन्। हरिकथानिपुणेषु श्रीमदज्जाडादिभट्ल-नारायणदासः मूर्धन्यः अस्ति। तस्य हरिकथात्रयसङ्कलनं श्रीहरिकथामृतं सर्वासु संस्कृतहरिकथाकृतिषु विशिष्यते। नातिविस्तरेण श्रीहरिकथामृतस्य विशिष्टांशाः शोधपत्रेऽस्मिन् प्रस्तूयन्ते।

परिचयः सनातनभारतीयपरम्परायां चतुर्दशविद्याः चतुष्षष्टिरङ्गविद्याश्च सन्ति। एता अङ्गविद्या एव चतुष्षष्टिकलाः इत्युच्यन्ते।

**अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरः।**

**पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश।।[1]**

**'गीतं वाद्यं नृत्यं...विद्यानां ज्ञानं इति चतुःषष्टिरङ्गविद्याः कामसूत्रावयविन्यः'।।[2]**

1. काव्यं-'कवृ वर्णने' इति धातोः निष्पन्नं 'काव्यम्' इति शब्दः। 'लोकोत्तरवर्णनानिपुणकविकर्म काव्यमि'ति उच्यते। काव्यं चतुष्षष्टिकलासु अन्तर्भवति यच्च चतुर्वर्गफलायत्तमिति साहित्यशास्त्रविदः अभिप्रयन्ति।

**इतिहासकथोद्भूतं इतरद्वा सदाश्रयम्**

**चतुर्वर्गफलायत्तं चतुरुदात्तनायकम्।।[3]**

1.1 काव्यभेदाः तच्च काव्यं दृश्यं श्रव्यमिति भेदेन द्वेधा वर्त्तते। दृश्यकाव्यमेव रूपकमिति अभिधीयते। धनञ्जयेन दशरूपकग्रन्थे नाटकं प्रकरणं भाणः प्रहसनं डिमः व्यायोगः समवकारः वीथी अङ्कः ईहामृगश्चेति रूपकस्य दश भेदाः प्रोक्ताः।

**नाटकं सप्रकरणं भाणः प्रहसनं डिमः।**

**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति।।[4]**

एतेषु दश रूपकभेदेषु भाणः इति रूपकभेदः एकनायकोपेतः भवति। नायकः निपुणः पण्डितः विटः वा भवेदिति उक्तम्।

**भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा।**

**यत्रोपवर्णयेदेको निपुणः पण्डितो विटः।।[5]**

दशरूपकग्रन्थे भाणः इति रूपकभेदस्य यानि लक्षणानि सन्ति तैर्युक्तोऽस्ति हरिकथाकलाविशेषः। पण्डिताग्रणीः कश्चन घण्टात्रयं यावत् भक्तिरसप्रपूर्णाभिः हरिसम्बद्धाभिः कथाभिः आध्यात्मिकविषयान् उपदिशति। उपदेशात्मिका हरिकथा सङ्गीतनृत्यसम्मेलनेन हृदयावर्जिका भवति।

2. भक्तिः-''भज सेवायाम्'' इति धातोः निष्पन्नोयं भक्तिः इति शब्दः। भक्तिः नवविधेति भागवते व्यासमहर्षिरुवाच।

**श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्**

**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।**

**इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा**

**क्रियते भगवद्यद्धा तन्मन्येऽधीतमुत्तमम्।।[6]**

**अनन्यममता विष्णौ ममता प्रेमसङ्गता।**

भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः।।[7] इति नारदपञ्चरात्रे भक्तेः निर्वचनमुक्तम्।

शिवानन्दलहर्यां सुन्दरैरुपमानैः भक्तितत्त्वमूचुः शङ्कराचार्यः-

**अङ्कोलं निजबीजसन्ततिरयस्कातोपलं सूचिका**

**साध्वी नैजविभुं लता क्षितिरुहं सिन्धुस्सरिद्वल्लभम्।**

**प्राप्नोतीह यथा तथा पशुपतेः पादारविन्दद्वयं**

**चेतोवृत्तिरुपेत्य तिष्ठति सदा सा भक्तिरुच्यते।।[8]**

2.2 भक्तिसम्प्रदायाः-ज्ञानादेव हि कैवल्यम् इति आर्योक्तिः। प्रशस्तोऽपि ज्ञानमार्गः तावन्न सुकरः। सुलभगम्यस्तु भक्तिमार्गः। अत एव 'कलौ भक्त्या मुक्तिरि'ति आभाणकमपि प्रख्यातिं गतम्।

सप्तदशशतके दक्षिणभारते भक्तिमार्गेण मुक्तिप्राप्तिरिति प्रचारयितुं कलाः आश्रितवन्तः पण्डिताः। संस्कृतपुराणेतिहासादिभ्यः इतिवृत्तं सङ्गृह्य लोकभाषाभिः भक्तिरसोपेतरचनाः विरचय्य लोके अभिनयन्ति स्म कलाचणाः। महाराष्ट्रे अभङ्ग नाम्ना कर्णाटदेशे यक्षगानमिति तमिळदेशे कथाकालक्षेपः इति नाम्ना आन्ध्रतेलङ्गाणराज्ययोः हरिकथा इति नाम्ना भिन्नसम्प्रदायाः प्रादुर्भूताः। रचनाशैली समाना चेदपि प्रदर्शनशैली भिद्यते इति हेतोः नामवैविध्यमस्ति। एतेषां सर्वेषां सम्प्रदायानां प्रयोजनन्तु एकमेव। आध्यात्मिकचिन्तनोन्मुखाः भवेयुः प्रजाः इति लक्ष्यं मनसि निधाय रचनाः क्रियन्ते अभिनयेन प्रदर्श्यन्ते च।

3. भक्तिरसनिस्यन्दिनी हरिकथा–आन्ध्रतेलङ्गाणाराज्ययोः अतीव लोकप्रसिद्धिं गतोऽस्ति हरिकथासम्प्रदायः। हरिकथाकलावित् पण्डितः साहित्यसङ्गीतनृत्यनिपुणः हरिसम्बद्धकथां प्रदर्शनानुकूलतया विरच्य सङ्गीतशास्त्रानुसारम् आलपन् तत्कथां तत्तत्पात्रानुगुणम् चतुर्विधाभिनयं कुर्वन् भक्तिरसार्णवे भक्तजनचेतांसि निमज्जयति।

3.1 हरिकथा–हरिकथाकथकश्च–हरिकथायाः लक्षणं प्रयोजनञ्च हरिकथाकथकस्य च लक्षणानि हरिकथापितामहः ज्जाडादिभट्लना-रायणदासः उल्लिखति।

सङ्गीतरत्नाकराख्ये ग्रन्थे वाग्गेयकारलक्षणानि[9] यानि उल्लिखितानि तेषामाधारेणैव हरिकथाकथकस्य लक्षणानि उल्लिखितानि।

* आस्तिक्यं धर्माधर्मांश्च सर्वजनमनोरञ्जकतया नृत्यगीतवाद्यैः या प्रदर्श्यते सैव हरिकथा यश्च प्रस्तौति स एव हरिकथायाः कथकः।

* दैवभक्तिः सत्यं भूतदया चेति हरिकथायाः विशेषांशाः।

* केभ्यश्चित् वर्षेभ्यः महाराष्ट्रादिषु नैकैषु राज्येषु सङ्गीतसाहित्य-विशारदाः आजीविकायै कथकवृत्तिमवलम्ब्य हरिभक्तवेषं धृत्वा दैवभक्तिं धर्माधर्मांश्च जनान् बोधयन्तः पौराणिकाः कथकाः भागवताः दासाश्चेति संज्ञाः लभन्ते।

* हरिकथाश्रवणेन श्रोतारः अखिलश्रेयोभिवृद्धिं हरिकथाकथकाश्च पुरुषार्थसिद्धिञ्च प्राप्नुवन्ति।

3.2 उत्तमकथकस्य लक्षणानि–सङ्गीतचन्द्रः इत्यादिषु सङ्गीतशास्त्रेषु वाग्गेयकारलक्षणानि यानि वर्णितानि तान्येव लक्षणानि हरिकथाकथके अपि भवेयुरिति नारायणदासः उवाच। यतो हि हरिकथाकथकः भक्तिरसोपेतकथां हरिकथां वर्णयन् हरिं कीर्त्तयेद्यत्। हरिकथाकथकः सङ्गीतशास्त्रज्ञः भवति चेदेव भक्तिरसप्रपूर्णानि कीर्त्तनानि आलपितुं शक्नोति।

"श्रुतिस्मृतिविज्ञानं शब्दानुशासनज्ञता, अभिधानप्रावीण्यं छन्दःप्रभेदवेदित्वं अलङ्कारकौशलं रसभावपरिज्ञानं देशस्थितिचातुरी नानाभाषावैशद्यं सर्वकाकुविशारदत्वं कलाशास्त्रनैपुण्यं तूर्यत्रितयचातुर्यं हृद्यशारीरशालिता लयकालसंज्ञानं प्रभूतप्रतिभोद्भूतभाक्त्वं सुभगगीयता, देशीयरागाभिज्ञत्वं अनुच्छिष्ठोक्तिनिर्बन्धः नूत्नधातुविनिर्माणदक्षता परचित्तपरिज्ञानं प्रबन्धप्रगल्भता द्रुतगीतविरचनानैपुण्यं पद्यान्तरविदग्धता त्रिस्थानगमकप्रौढिमा विविधालप्तिनैपुण्यं विशेषावधानशक्तिः रम्यरूपं स्वेच्छासञ्चारः स्वतन्त्रजीवनञ्चेति वाग्गेयकारस्य उत्तमकथकस्य लक्षणानि" इति क्रि.श. 1911 तमे वर्षे आन्ध्रपत्रिकायाः युगादिसञ्चिकायां मुद्रिते 'हरिकथा' इति प्रबन्धे स्वयं नारायणदासः व्यवृणोत्।

4. हरिकथावाङ्मयम्–सीतायाः यमलौ पुत्रौ लवकुशौ वाल्मिकिमहर्षिणा शिक्षितौ ऐदम्प्राथम्येन हरिकथागानं स्वपितुः श्रीरामचन्द्रस्य अयोध्यास्थे सभागारे चक्रतुरिति सर्वविदितविषयः। ततः हरिकथासम्प्रदायस्य आविर्भावः जात इति वक्तुं शक्यते। एषः सम्प्रदायः विभिन्नप्रान्तेषु विविधनामभिः प्रसिद्धिं गतः। आन्ध्रतेलङ्गाणाराज्ययोः श्रीमदज्जाडादिभट्लनारायणदासः हरिकथासम्प्रदायस्य विकासे महत्वपूर्णं योगदानम् अकरोत् इति निश्चप्रचं वक्तुं शक्यते। नारायणदासेन संस्कृतपुराणेतिहाससाहित्याधारेण चतुर्दश हरिकथाः विरचिताः।

1. अम्बरीषचरित्रम् 2. गजेन्द्रमोक्षणम् 3. गोवर्धनोद्धारः 4. गौरप्पपेण्ड्लि 5. जानकीशपथः 6. ध्रुवचरित्रम् 7. प्रह्लादचरित्रम् 8. भीष्मचरित्रम् 9. मार्कण्डेयचरित्रम् 10. यदार्थरामायणम् 11. रुक्मिणीकल्याणम् 12. सावित्रीचरित्रम् 13. हरिश्चन्द्रोपाख्यानम् 14. श्रीहरिकथामृतम्

एतासु हरिकथासु श्रीहरिकथामृतम् इति हरिकथात्रयसङ्कलनम् एकमेव संस्कृतेन विरचितम्।

5. श्रीहरिकथामृतम्–नारायणदासः श्रीकृष्णजननमिति हरिकथागानप्रबन्धं क्रि.श. 1898 तमे वर्षे चकारेति तस्य प्रदर्शनं क्रि.श. 1913 तमे वर्षे संस्कृताङ्गलहिन्दीभाषाभिः कोलकत्तायां विश्वकवेः रवीन्द्रस्य समक्षं चकारेति ज्ञायते। तच्च प्रदर्शनं रवीन्द्रस्य प्रशंसापात्रतां गतमिति हरिकथागानमपि शान्तिनिकेतनस्य पाठ्यांशत्वेन गृहीतमिति च नारायणदासस्य 'ना एरुक' इति जीवनचरितेन ज्ञायते। कीर्त्तनानि श्लोकाः गद्यञ्चेति त्रिविधरचनाप्रक्रियोपेतं श्रीहरिकथामृतं क्रि.श. 1930 तमे वर्षे तेलुगुलिप्या प्राकाश्यं नीतम्। 2020 तमे क्रिस्तवर्षे देवनागरीलिप्या श्रीहरिकथामृतस्य पुनः मुद्रणम् अकरोत् संस्कृत अकाडमी।

5.1 श्रीहरिकथामृतस्य इतिवृत्तम्–द्वादशस्कन्धभूषितस्य भागवतपुराणस्य दशमस्कन्धस्थं कृष्णचरितमितिवृत्तरूपेण स्वीकृत्य प्रबन्धोऽयं विरचित इति नारायणदासः उल्लिलेख।

**पुराणं श्रीभागवतं द्वादशस्कन्धभूषितम्।**
**दशमे तत्र सम्भूतं कृष्णस्यचरितामृतम्।।**[10]

श्रीकृष्णजननं पितृबन्धनमोचनं धर्मसंस्थापनञ्चेति त्रयाणां संस्कृतयक्षगानप्रबन्धानां सङ्कलनरूपमेव श्रीहरिकथामृतमिति नाम्ना प्रख्यातिं गतम्।

5.2 श्रीहरिकथामृते प्रयुक्तानि वृत्तानि–अस्मिन् ग्रन्थे पद्यं कीर्त्तनानि गद्यञ्चेति त्रिविधरचनाप्रक्रियाः लक्ष्यन्ते। श्रीहरिकथामृते गीतिः शार्दूलविक्रीडितं कोरकं वंशस्थं फलवृत्तं स्रग्धरा पञ्चचामरः मालिनी हरिणी श्लोकः मत्तेभं समवृत्तं वसन्ततिलका उपजातिः मत्तेभविक्रीडितं माधवीवृत्तं भुजङ्गप्रयातम् इन्द्रवज्रा सीसं तेटगीतिः पृथ्वी शिखरिणी महास्रग्धरा द्रुतविलम्बितं तन्वी शालिनी तोटकं दण्डकम् इति विभिन्नवृत्तैः श्लोकान् ग्रथयामास कविः।

ISSN 2456-3420

5.3 श्रीहरिकथामृते प्रयुक्ताः रागाः-नैकभाषाकुशलः नैककलाचणश्च नारायणदासः स्वसङ्गीतशास्त्रवैदुष्यं निरूपयन् श्रीहरिकथामृते नैकेषु रागेषु कीर्त्तनानि व्यरचयत्। भैरवीरागः-त्रिपुटतालः, कल्याणी-आदिः, केदारगौडः-रूपकः, खरहरप्रिया-मिश्रः, सावेरिः-एकतालः, काफी-त्र्यस्रः, झंझाटी-त्र्यस्रः, शुभपन्थवरालिः-चतुरश्रः, वसन्तः-चतुरश्रः, कमाच्-चतुरश्रः, केदारः-त्रिपुटः, धनश्रीः-त्र्यस्रः, काम्बोजी-रूपकः, बिलहरिः-त्र्यस्रः, सिंहेन्द्रमध्यः-त्र्यस्रः, श्रीः-चतुरश्रः, मुखारिः-आदिः, सुरटः-त्रिपुटः, नवरोजुः-चतुरश्रः, मञ्जरी-धनश्रीः-चतुरश्रः, मञ्जरी-आनन्दभैरवी-चतुरश्रः, यदुकुलकाम्बोजी-रूपकः, मञ्जरी-पूर्वकल्याणी-त्र्यस्रः, मधुरगतिः-वसन्तरागः-खण्डः, मञ्जुगतिः-केदारगौडः-चतुरश्रः, बेगडः-चतुरश्रः, मञ्जरी-भैरवः-चतुरश्रः, वराली-मिश्रः, कर्नाटः-एकः, मञ्जरी-मालवगौडः-मिश्रः, तोडिः-रूपकः, मञ्जरी-मलयमारुतः-खण्डः, चक्रवाकः-त्र्यस्रः, ब्रह्मा-हंसध्वनिः-त्र्यस्रः, त्र्यम्बकः-भैरवी-चतुरश्रः, दिक्पालकाः-ब्यागः-चतुरश्रः, ब्रह्मर्षयः-सावरिः-त्रिपुटः, मङ्गलमहाश्रीः, नारदः-नाटकुरञ्जी-चतुरश्रः, पूर्वकल्याणी-एकतालः, कल्याणी-रूपकः, हुसेनिः-रूपकः, असावरिः-अड्डतालः, मञ्जुगतिः-नाथनामक्रियः-चतुरश्रः, नाटकुरञ्जी-रूपकः, मञ्जरी-पूर्वकल्याणी-चतुरश्रः, पुन्नागवरालिः-त्र्यस्रः, धनश्रीः-चतुरश्रः, नीलाम्बरी-त्रिपुटः, तोडिः-रूपकः, खरहरप्रिया-चतुरश्रः, नवरोजुः-त्र्यस्रः, श्रीः-मिश्रः, अठाणः-रूपकः, बेगाडः-रूपकः, केदारगौडः-चतुरश्रजातिरूपकः, बेहाग्-मिश्रः, आनन्दभैरवी-त्रिपुटः, बिलहरिः-मञ्जरी-चतुरश्रः, तोडिः-सङ्कीर्णजातिः-त्रिपुटः, कन्नडा-मञ्जरी-चतुरश्रः, मोहनः-मञ्जरी-चतुरश्रः, सारङ्गः-रूपकः, हिन्दुस्थानीभैरवी-रूपकः, शहना-रूपकः, अमृतलहरी-चतुरश्रः इत्यादिषु रागेषु कीर्त्तनानि व्यरचयत् नारायणदासः।

5.4 श्रीहरिकथामृतस्य वैशिष्ट्यम्-हरिकथया भक्तिः धर्माधर्मौ आस्तिक्यं भूतदया पुरुषार्थाः चेत्यादयः उपदिश्यन्ते। श्रीहरिकथामृतमपि कान्तासम्मिततया एतान् श्रोतृजनान् उद्बोधयति।

ज्ञानेन मोक्षमाप्नोति भक्तिर्ज्ञानाय कल्पते।[11] इति श्लोकेन भक्तेः वैशिष्ट्यं बोधयति नारायणदासः।

सात्त्विकाहारसेवनं कुर्यात् सर्वभूतेषु दयां प्रदर्शयेत्। संसारबन्धविमुखः स्यात्। योगी भवेत् हरिदासः अथवा हरिकथाकथकः इति निर्दिशति कविः नारायणदासः।

**सात्त्विकाहारनिरतः सर्वभूतदयापरः।**

**संसारविमुखो योगी हरिदास इति स्मृतः।।[12]**

**जीवन्मुक्तो हरेर्भक्तः कर्मणा न विलिप्यते।।[13]**

प्राणिहिंसा न कार्या परान्नभुक् न भवेज्जनः इति धर्माधर्मौ उपदिशतीदं काव्यम्।

**मा कुरु प्राणिहिंसां भण देवताप्रशंसाम्।**

**स्वकष्टार्जितेनैव सन्ततमन्नेन जीव।[14]**

नवविधभक्तिविधानेषु श्रवणकीर्तने प्रामुख्यं भजतः। हरिकथासम्प्रदायः एतयोः द्वयोः विधानयोरेव प्रचारं कुरुत इति प्रामणयति श्रीहरिकथामृतम्।

**नवविधभक्तिविधानेषु मुख्ये श्रवणकीर्तने।**

**कथां शृणु हरेस्तस्य नामसङ्कीर्तनं कुरु।।[15]**

हरिकथाव्याजेन पितृसेवाविमुखः जीवन्मृत इति हरिकथाव्याजेन पुत्रधर्मम् उपदिशति कविः।

**जननीजनकौ वृद्धौ।**

**तनयान्गुरुविप्रसाधुदारादीन्।**

**यश्शक्तोऽपि न पोषति।**

**स एव जीवन्मृतो महीवलये।।[16]**

'स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवती'ति मुण्डकोपनिषद्वाक्यं क्वचिदुपदिशति कविः।

**ब्रह्मैव भवति ब्रह्मविदिति श्रुतिरब्रवीत्।**

**नारायणं विजानीहि स एव त्वमसि ध्रुवम्।।[17]**

6. आदिभट्लनारायणदासस्य संस्कृतरचनाः-नारायणदासः षट्चत्वारिंशतः सङ्ख्याकान् ग्रन्थान् रचयामास। अनुवादग्रन्थाः हरिकथागानप्रबन्धाः स्वतन्त्रकल्पनाग्रन्थाः वेदान्तग्रन्थाश्चेति नारायणदासस्य रचनाः चतुर्धा भवन्ति। नारायणदासः अधिकतया तेलुगुभाषया रचनाः लिलेख। गीर्वाणभाषया अल्पसङ्ख्याकाः रचनाः एव स चकार। परं प्रभूतं संस्कृतसाहित्यम् आन्ध्रभाषया अनूदितवान्। अपिच संस्कृतसाहित्याधारेण आन्ध्रभाषया स्वतन्त्रकल्पनारचनाः वेदान्तग्रन्थरचनाश्च चकार। 1. काशीशतकम् 2. चातुर्वर्ग्यसाधनम् (अलभ्यम्) 3. तारकम् (व्याकरणशास्त्रकाव्यम्)

4. दशविधरागनवतिकुसुममञ्जरी 5. मृत्युञ्जयाष्टकम् 6. रामचन्द्रशतकम् 7. श्रीहरिकथामृतञ्चेति रचनाः संस्कृतेन नारायणदासः रचयामास।

7. संस्कृतहरिकथासम्प्रदायपरम्परा-क्रि.श. 1919 तमे वर्षे विजयनगराधिपतिः विजयरामगजपतिः सङ्गीतकलाशालां संस्थाप्य नारायणदासं तत्प्रांशुपालं चकार। क्रि.श. 1936 तमे वर्षे कलाशालायाः अध्यक्षपदवीतः निवृत्तः। हरिकथासम्प्रदायस्य प्रचारप्रसारे कटिबद्धोऽयं बुधाग्रणीः नैकान् शिष्यान् हरिकथाविद्ययाशिक्षणेन अनुगृहीतवान्। नारायणदासस्य सुदीर्घशिष्यपरम्परा अद्यावधि विराजते आन्ध्रदेशे तेलङ्गाणादेशे च।

नारायणदासस्य प्रेरणया तूर्पुगोदावरीजनपदस्य कपिलेश्वरपुराग्रहारे सर्वराय एड्युकेशनल् ट्रस्ट इति संस्था 1973 तमे क्रिस्तवर्षतः हरिकथाकलां बोधयति। तथैव तिरुपतिस्थसर्वकारसङ्गीतकलाशालाऽपि

हरिकथासम्प्रदायम् अनुवर्त्तयितुं कटिबद्धाऽस्ति। न केवलं तेलुगुभाषया अपितु संस्कृतभाषयाऽपि अर्वाचीनाः हरिदासाः हरिकथाः रचयित्वा प्रदर्शयामासुः।

कविकथकरत्नं श्रीपेद्दिण्टिसूर्यनारायणदीक्षितदासः 1986 तमे क्रिस्तवर्षे अभिज्ञानशाकुन्तलम् इति हरिकथां, श्रीनल्लान् चक्रवर्तुल कृष्णमाचार्यः 1987 तमे क्रिस्तवर्षे मालविकाग्निमित्रम्, श्रीपेद्दिण्टि सूर्यनारायणभागवतः 1989 तमे क्रिस्तवर्षे शङ्कराचार्यः इति हरिकथां कुमारसम्भवञ्चेति हरिकथां व्यरचयन्। दालिपर्ति उमामहेश्वरी इति हरिकथाकथनकुशला देशे नैकत्र संस्कतहरिकथाः प्रादर्शयदिति हरिकथासाहित्यशोधग्रन्थेषु उल्लिखितमस्ति।

उपसंहारः-हरिकथाः यावत् पर्यन्तं तेलुगुभाषया रचयित्वा प्रदर्शिताः तावत् पर्यन्तं हरिकथासम्प्रदायः केवलं तेलङ्गाणान्ध्रराज्ययोः एव परिचित् आसीत्। यदा नारायणदासः अर्वाचीनाः हरिदासाश्च संस्कृतेन हरिकथाः रचयित्वा प्रदर्शितवन्तः प्रदर्शयन्ति च तदा हरिकथासम्प्रदायः स्थानभाषासम्प्रदायगतभेदं विना सर्वलोकादरपात्रतां गतः। संस्कतभाषायाः महिम्नैव संस्कृतकृतिभिः श्रीमदज्जाडादिभट्लनारायणदासः लोकप्रसिद्धिम् अवाप। कुलमतवर्णस्थानभेदातीता गीर्वाणभाषा चेति प्रमाणयति संस्कृतहरिकथासम्प्रदायः।

## सन्दर्भानां सूची

1. विष्णुपुराणम् 3.6.28
2. कामसूत्रम् 1.3.15
3. काव्यादर्शः 1.15
4. दशरूपकम्.1.8
5. दशरूपकम् 3.44
6. श्रीमद्भागवतम्. 7.5.23,24
7. (नारदपञ्चरात्रम् ) भक्तिरसामृतसिन्धुः-1.4.2
8. शिवानन्दलहरी.61
9. सङ्गीतचन्द्रः 3.1-11

तूर्यत्रितयचातुर्यं हृद्यशारीरशालिता।
लयतालकलाज्ञानं विवेकोऽनेककाकु 1
वाचं गेयं च कुरुते यः स वाग्गेयकारकः 2
शब्दानुशासनज्ञानमभिधानप्रवीणता
छन्दःप्रभेदवेदित्वमलंकारेषु कौशलम् 3
रसभावपरिज्ञानं देशस्थितिषु चातुरी
अशेषभाषाविज्ञानं कलाशास्त्रेषु कौशलम् 4
तूर्यत्रितयचातुर्यं हृद्यशारीरशालिता
लयतालकलाज्ञानं विवेकोऽनेककाकुषु 5
प्रभूतप्रतिभोद्भेदभाक्त्वं सुभगगेयता
देशीरागेष्वभिज्ञत्वं वाक्पटुत्वं सभाजये 6
रागद्वेषपरित्यागः सार्द्रत्वमुचितज्ञता
अनुच्छिष्टोक्तिनिर्बन्धो नूत्नधातुविनिर्मितिः 7
परचित्तपरिज्ञानं प्रबन्धेषु प्रगल्भता
द्रुतगीतविनिर्माणं पदान्तरविदग्धता 8
त्रिस्थानगमकप्रौढिर्विविधालप्तिनैपुणं
अवधानं गुणैरेभिर्वरो वाग्गेयकारकः 9
विदधानोऽधिकं धातुं मातुमन्दस्तु मध्यमः
धातुमातुविदप्रौढः प्रबन्धेष्वपि मध्यमः 10
रम्यमातुविनिर्माताऽप्यधमो मन्दधातुकृत्
वरो वस्तुकविर्वर्णकविर्मध्यम उच्यते
कुट्टिकारोऽन्यधातौ तु मातुकारः प्रकीर्तितः 11 इति वाग्गेयकारलक्षणम्

10. हरिकथामृतम् .1.46
11. तत्रैव 203
12. तत्रैव 204
13. तत्रैव 210
14. तत्रैव पृ.सं. 75
15. तत्रैव 217
16. तत्रैव 194
17. तत्रैव 211

## उपयुक्तग्रन्थसूची


1. श्रीमदज्जाडादिभट्लनारायणदासः, श्रीहरिकथामृतम्, डां. के. वरलक्ष्मीः सम्पादनम्, मुद्रणम् संस्कृतअकाडमी, हैदराबाद, 2020, ISBN no. 978-93-80171-48-7
2. डां. रामानन्दशर्मा, कामसूत्रम्, चौखम्बाकृष्णदास अकादमी, वाराणसी, ISBN no. 81-218-0167-2
3. श्रीरामचन्द्रमिश्रः, काव्यादर्शः, चौखम्बाविद्याभवन, वाराणसी
4. एस्. सुब्रह्मण्यशास्त्री, सङ्गीतरत्नाकरः, Vol.II, द अडयार लैब्ररी एणड रीसेर्चसेण्टर, मद्रास, 1976, 0-8356-7336-7
5. Ajjada Adibhatla Narayanadas, ना एरुक, autobiography of Ajjada Adibhatla Narayanadas,
6. डां. डि. शारदा, हरिकथाप्रक्रिया-सामाजिकप्रयोजनम्, वेङ्कटेश्वरपब्लिकेशन्स, भीमवरम्, आन्ध्रप्रदेश
7. डां. रविशङ्करनागर, नाट्यशास्त्रम्, परिमलपब्लिकेशन्स, न्यूदिल्ली 1998, ISBN no. 81-7110-003-01
8. डां. भोलाशङ्करव्यास, दशरूपकम्, चौखम्बा विद्याभवन, वाराणसी, 1993
9. सि.एल. गोस्वामी, श्रीमद्भागवतम्, गीताप्रेस, गोरखपूर, 1997
10. प्रो. बाबुलालशुक्लाशास्त्री, नारदपञ्चरात्रम्, खेमराज श्रीकृष्णदास, मुम्बई, 1962
11. स्वामी स्वयम्प्रकाशगिरि, शिवानन्दलहरी, श्रीदक्षिणामूर्तिमठप्रकाशन, वाराणसी
12. विष्णुपुराणम्, गीताप्रेस, गोरखपूर, 1990



***उपनिदेशिका***
***संस्कृत अकाडमी, उस्मानियाविश्वविद्यालयः***
***हैदराबाद तेलङ्गाणा***

ISSN 2456-3420

# यज्ञस्य प्रादुर्भावः

डॉ. धनेशकुमारपाण्डेयः

मानवैः स्वाभिलाषापूर्तये स्वशाक्त्यानुसारं तत्तद्द्रव्यैः कृतं श्रेष्ठततं कर्म एका आराधना विशेषा कथ्यते। यदि इयमाराधना विधिवत् स्यात् तदा फलप्रदा भवति। यदि विधिना कर्म न स्यात् तदा कोऽपि लाभः न भवति। विधिहीनेन आराधनया आराध्यः देवः सन्तुष्टो न भवति।

प्राचीनकाले ऋषिभिः आराध्यतुष्टये या या क्रिया कृता सा एव क्रिया यज्ञशब्देन अभिधीयते। ऋषिभिः स्वाभिष्टसिद्धये स्वाराध्यस्य परमेश्वरस्य यजनं कृतम्। यजनमेव यज्ञस्य स्वरूपं विद्यते। यजनकरणादेव आराध्यः देव वेदेषु यज्ञनाम्ना अभिहितो विद्यते।

मन्त्रद्रष्टृभिः ऋषिभिः दृष्टं ''यज्ञेन यज्ञमयजन्त देवाः''[1] अर्थात् देवाः यज्ञेन यज्ञस्य यजनं कृतवन्तः। आदौ प्रजापतिरूपप्राणदेवाः स्वमानसिकसंकल्पविधिना यज्ञरूपस्य प्रजापतेः यजनं पूजनं च कृतवन्तः। तस्मिन् पूजने यजने च सृष्टिरूपविकाराणां धारणकर्तृमुख्यं पंचमहाभूतमासीत्। अस्य मानसिकयज्ञस्य साकाररूपप्रदानाय भगवान् परमेष्ठिप्रजापतिः लोकसृष्टिं कर्तुं श्रेष्ठदेवानामनुग्रहप्राप्तये च स्वात्मनः अतिरिक्तदेवानामभावां ज्ञात्वा स्वयं भगवान् परमेष्ठी प्रजापतिः स्वस्य प्राणदेवस्य यजनं कृतवान्। तस्मिन् परमेष्ठिने परमेश्वरे प्रजापतौ कार्य-कारणयोः एकत्वस्य सर्वधा संभव आसीत्। तेन परमेष्ठिना यः यज्ञः कृतः सः यज्ञः आदिमः यज्ञः बभूव। तदनन्तरं अस्य यज्ञस्य प्राप्तिं कर्मदेवाः कृतवन्तः।

ये तपस्विनः श्रोत्रियाः अग्निहोत्रादिश्रेष्ठकर्मभि देवत्वं प्राप्तवन्तः ते एव कर्म देवाः बभूबुः, एवमेव इन्द्रस्य नाम शतक्रतुः बभूव। अतः एव इन्द्रस्य कर्मदेवः वक्तुं शक्यते।

बृहदारण्यकोपनिषदि कथितं विद्यते यत् दिव्यपितृगणस्य शतमानन्दाः भवन्ति, कर्मदेवस्य एकानन्दो भवति, एवमेव कर्मदेवानां शतमानन्दाः आजानसूर्यादिदेवानां कृते एकानन्दो भवति।

सृष्टिपूर्वकाले प्राणसाध्य देवाः देवत्वं प्राप्तवन्तः। अतः एव इमान् आजानदेवाः इति कथयन्ते।[2]

यज्ञस्याविर्भावः नाम उत्पत्तिः सृष्टेरुत्पतिना सह जाता। अस्मिन् विषये भगवद्गीतायां तृतीयेऽध्याये कथितं विद्यते यथा-

**सहयज्ञाः प्रजां सृष्ट्वा पुरोवाच प्रजापतिः।**
**अनेन प्रसविष्यध्वमेषवोऽस्त्विष्ट कामधुक्।।**[3]

सृष्टेः प्रारम्भकाले सृष्टिकर्ता प्रजापतिः सृष्ट्या सह यज्ञं कृतवान् प्रजाजनान् प्रति कथितवान् यत् यूयमपि सर्वे श्रौतस्मार्तविधिभिः यज्ञं कुरुत इति एभिः विधिभिः प्रसन्नदेवाः अभिष्टतफलदायकाः भविष्यन्ति। अस्मिन् विषये भगवता कृष्णेन गीतायाम् उक्तं-

**देवान् भावयताऽनेन ते देवा भावयन्तु वः।**
**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ।**[4]

श्रौतस्मार्तयज्ञविधिभिः यूयं देवेन्द्रं प्रसिद्य यज्ञैः प्रसन्नो भूत्वा इन्द्रादयः देवाः अभिष्टफलदायकाः भविष्यन्ति। अनेन विधिना परस्परं कल्याणभावनया परमं कल्याणं प्राप्नुयुः वेदेऽपि अस्मिन् विषये उक्तं विद्यते-

**देहि मे ददामिते निमेधेहि निते दधे।**
**निहारं च हरासि मे निहारं निहराणिते।।**[5]

इन्द्रः यजमानं प्रति उक्तवान् यूयं माम् हविः प्रदानं करुत तदनन्तरं युष्मान् इच्छितं फलं प्रददामि। वाक्यमिदं पुनरिन्द्र अब्रवीत् दार्ढ्येन, यदि त्वं मूल्यरूपेण हविः दास्यति तदा हविः प्रतिफलमभिष्टञ्च दास्यामि।

वस्तुतः सम्भावदस्यास्य प्रार्थ्यदेवः इन्द्रः वर्तते। पुराकाले ऋषिमहर्षिभिः कर्मदेवानामाराधना कृता अतः आराधनया तैः यज्ञः प्राप्तः। तदनन्तरं वेदवेदाङ्गेषु पारंगताः ब्रह्मवेत्तारो महर्षयः प्राप्तवन्तः। अनेन प्रकारेण परम्परागतविधिना वयं भारतीयाः यज्ञं प्राप्तवन्तः।

भगवन्तः परमेष्ठिनः सर्वविधशक्तिसम्विन्तं भूत्वापि अस्य यज्ञस्य सृष्टिं न कृतवन्तः, परन्तु ''अनादिनिधना श्रुतिरूपा आद्यन्तरहिता भगवती यथा प्रलयात् पूर्वकल्पे आसीत्। तस्याः भगवत्याः आविर्भावः परमेष्ठिना कृतः, तस्माद् कालादेव वेदः नाम्ना प्रसिद्धा गभीरा श्रुति वैदिकसाहित्ये समग्रस्य सम्पूर्णस्य संसारस्य कल्याणहेतु विविधमाङ्गलिको हेतु निहितो विद्यते।

इमां श्रुतिमवलब्य ही स्रष्टागणाः मानवीयां सृष्टिं कुर्वन्ति। जगतः आद्यास्वरूपाः इयं चिरन्तनी श्रुतिः विद्यते। इमां श्रुतिं विना संसारोऽयं धोरान्धकूपे पतितुं शक्नोति।

इयमेव श्रुतिः वेदः जगतः कल्याणाय विविध यज्ञानां विधानं करोति। विश्ववारा-विश्वस्यावरणं कर्तुं समर्था एवं च सम्पूर्णस्य संसारस्य प्रथमासंस्कृतिः विद्यते।

इयमेव संसारेऽस्मिन् सोमरसतत्त्वस्य (रसो वै सः) निष्पादिका विश्वकल्याणसम्पादिका जगतरूपत्पतेः बीजरूपा विद्यते।

अतः एव अस्य श्रुतेः विश्वारा कथयते[6]

**यज्ञस्य विकाशक्रमः-**

सृष्टेरादिकाले यज्ञस्य क्रियाकलापः अत्यन्तः संक्षिप्तः आसीत्। येन क्रमेण मनुष्याणां बुद्धिवैभवबलादयः परिवर्धिताः विकसिताश्च जाताः तदनुसारं ऊहापोहविधिना (तर्कवितर्कैः) यज्ञस्य सम्यक् विकासः जातः।

चरमबौद्धिकव्यायामाद् अनन्तरं सिद्धमिदं जातं ''सर्वं यज्ञे प्रतिष्ठितम्'' सिद्धं निहीतं सत्यं वेचनं विद्यते। तदनन्तरमेव गृह्यसूत्राणां कल्पसूत्राणां श्रौतसूत्राणां धर्मसूत्राणां कल्पसूत्राणां श्रौतसूत्राणां धर्मसूत्राणां रचना जाता।

भारतीयसंस्कृतवाङ्मये महाभारतः पञ्चमः वेदः उक्तः विद्यते। महाभारतस्य रचनायाः अनन्तरं यज्ञः विविधरूपेण विकसितः

प्रचारितश्च जातः अस्योल्लेखः महाभारते मूलरूपेण प्राप्तो विद्यते।[7] यस्य विधानं वेदे वर्तते। तस्य सर्वत्र वर्णनं प्राप्यते। यस्याः वेदे चर्चा न विद्यते तस्याः चर्चा कुत्रापि न लभ्यते। अस्मिन् सन्दर्भे वेदशब्देन पञ्चमः वेदः महाभारतं गृहितं विद्यते।

वैदिकवाङ्मायानामनुशीलनेन ज्ञायते। अस्मिन् भारतवर्षे पुराकाले एतादृशः एकः कालः आसीत् यस्मिन् विद्यानाम्ना वेदस्य एव ग्रहणमासीत्। यस्मिन् समये वेदविद्यानिपूणाः विद्वान्सः सभासु संगोष्ठीषु समाजिकव्यवहारेण आदरेण वेदस्य एव चर्चां कुवन्तः आसन्।

साधारणसामाजिकाः जनाः वेदविद्यासु निपूणानां विदुषां वचनं उपदेशरूपेण स्वीकृत्य स्वं स्वं कार्यं कुर्वन्तः आसन् एवमेव पुराकाले त्रैवणिकः ब्राह्मणक्षत्रियवैश्याः स्वस्वबालकान् गुरुकुलं प्रेषितवन्तः। एतादृशी एव परम्परा आसीत्। विद्याप्राप्तये गुरुकृपा च प्राप्तये निर्धनपुत्राः राजपुत्राश्च सर्वसाधारणरूपेण गुरुकुलं गत्वा गुरो सेवां कुर्वन्तः आसन्।

तदा एव गुरुशुश्रूषा सेवया च विद्यायाः गुढ़रहस्य प्राप्तिर्भवति स्म। अस्याः विद्यायाः गुढ़रहस्यं विना शुश्रषया सेवया न भवितुं शक्नोति। कार्यमिदं धनेन अन्यप्रयत्नैश्च च भवितुं शक्नोति। इयमेव वेदाध्ययनस्य पूर्वा परम्परा आसीत्।

प्राचीनकाले एतादृशी परम्परा आसीत् गुरुकुलेषु छात्राणां यदा अध्ययनस्य पूर्णता भवति, स्म, तदा छात्राणां समावर्तसंस्कारान् कारयित्वा स्व स्वकार्येषु गच्छन्ति स्म। स्वं-स्वं गृहं गत्वा गृहस्थधर्मं आचरन्ति स्म।[8]

पुराकाले चतुर्णां वेदानामध्ययनस्य परम्परा आसीत् अथवा जनाः वेदचतुटयस्य वेदद्वस्य अध्ययनं निश्चयेन कुर्वन्तः आसन्। अथवा स्वशाखानुसारं वेदस्य एकस्याः शाखायाः अध्ययनं कुर्वन्तः आसन्। अत एव या वेदद्वयस्याध्ययनं कुर्वतः आसन् तान् द्विवेदिनः इति कथ्यन्ते।

वेदत्रयस्य ये अध्ययनं कुर्वन्तः आसन् तान् त्रिवेदिनः इति कथ्यन्ते। ये वेदचतुष्टस्य अध्ययनं कुर्वन्त आसन् ते चतुर्वेदनः इति कथ्यन्ते।

प्राचीनकाले ब्राह्मणाः यजनं याजनं च दानं प्रतिग्रहं च अध्ययनम् अध्यापनं कुर्वन्त आसन्। पुराकाले ब्रह्मणबालकाः षडाङ्गसहितं वेदाध्ययनम् अकुर्वन् अस्याः परम्परायाः पालनं जनाः अनिवार्यरूपेण कुर्वन्तः आसन्। अतः एव भगवता भाष्यकारेणोक्तं यत् ब्रह्मणेन निष्कारेणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च[9]

यज्ञस्य प्रकाराः-भगवद्गीतायां द्रव्यादयः पञ्चयज्ञाः वर्णिताः वर्तन्ते। **द्रव्ययज्ञास्तपोयज्ञाः योगयज्ञास्तथाऽपरे।**

**स्वाध्यायः ज्ञानयज्ञश्च यतयः शंसितव्रताः।**[10]

1. द्रव्ययज्ञः-परोपकाराय देवमन्दिरधर्मशालापाठशालानाथालयादीनां निर्माणे द्रव्यदानं भवति, स एव द्रव्ययज्ञः उच्यते।

2. योगयज्ञः-प्रमाणविपर्ययविकल्पनिद्रास्मृतीनां चिन्तवृतीनां निरूद्धैकाग्रतापूर्वकमेकाग्रावस्थायां गमनं योगयज्ञः उच्यते। अष्टाङ्गयोगानां साधनमपि योगयज्ञः निगद्यते।

3. स्वाध्याययज्ञः-वेदवेदाङ्गनामध्ययनमध्यापनं ही स्वाध्याययज्ञो वा ब्रह्मयज्ञो वा गण्यते।

4. ज्ञानयज्ञः महाभारतस्य युद्धसमये अर्जुनस्य मनसि शंका आसीत् यत् भीष्मद्रोणादीनां गुरुजनानां स्वजनानां वधकरणेन उत्पन्नात् पापात् केन प्रकारेण निवृतो भवामि इति। प्रसङ्गोऽस्मिन् श्रीकृष्णेनोक्तं येन प्रकारेण-प्रदीप्ताग्निः काष्ठानि भस्मीकरोति, तद्वत ज्ञानाग्निः सर्वाणि कर्माणि दहति। ज्ञानसमं परमं पवित्रं किमपि वस्तु न विद्यते। अनेन प्राकरेण भगवता कृष्णेन अनेके उपदेशाः दत्ताः येन अर्जुनस्य शंकायाः निवृतिर्जाता। इत्थं आत्मज्ञानमेव ज्ञानयज्ञः कथ्यते।[11]

यज्ञस्य स्वरूपम्-

**अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।**

**आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रज्ञाः।**[12]

अग्नौ या आहुति दीयते सा सूर्यदेवेन प्राप्यते तदनन्तरं सूर्यात् वृष्टिर्भवति। विष्टेरन्नं भवति। अन्नात् प्रजानामुत्पत्तिः भवति। अथर्ववेदे वर्णितं विद्यते यत् यज्ञप्रभावेण प्राणीमात्रस्य समस्तस्य अन्निष्टस्य निवारणं भवति, शुभफलस्य प्राप्तिरपि भवति, यथा यद्वेवा देवहेडनम्''[13] अत एव विदितं भवति ''यज्ञै वै श्रेष्ठतमं कर्म''

अत एव प्रत्यनेन यज्ञः कर्तव्यः अस्माभिः।

## पादटिप्पणी

1. शुक्लयजुवेदः अध्यायः-31 मन्त्रः-16
2. बृहदा. उ. अ.-4, 1/35
3. भगवद्गीता अ.-3 श्लोक-10
4. भगवद्गीता अ.-3 श्लोक-11
5. शुक्लयजुर्वेद संहिता अध्याय-3, मन्त्रः-50
6. शुक्लयजर्वेद-7/14
7. यदिहास्तितदन्यत्रयन्नेहिनस्ति न कुत्रचित्
8. मनुस्मृति-10/75
9. महाभाष्य पस्पशाह्निकम्
10. भगवद्गीता-4/28
11. भगवद्गीता अ.-4 श्लोक-28
12. मनुस्मृति-4 श्लोक-76
13. अथर्ववेद 6/1/14/1

*डॉ. धनेशकुमारपाण्डेयः*
*सहायकाचार्यः कर्मकाण्ड एवं वेदः*
*हिमाचल आदर्श संस्कृतस्नातकोत्तर महाविद्यालयः*
*जांगला रोहड़ू शिमला हिमाचल प्रदेशः*

ISSN 2456-3420

# ज्योतिषशिक्षणे प्रायोजनविधेः अनुप्रयोगः

धीरजः शर्मा

वर्तमानकाले प्रद्यौगिकीयुगे समयलाभार्थं तथा च कार्यसरलताहेतोः नित्य-नूतनाविष्काराणाम्,अन्वेषणानां,नियमानां च प्रतिपादनं भवति। येषां प्रभावः शिक्षाजगति अपि द्रष्टुं शक्यते। शिक्षाजगति शिक्षणप्रक्रियायाः रुचिकरत्वसम्पादनाय बोधगम्यतानिर्माणाय च शोधकर्तृभिः शिक्षाविद्भिश्च नूतननियमानां तथा च शिक्षणविधीनां प्रतिपादनं क्रियते। शिक्षाशास्त्रे तु शिक्षणप्रक्रियायाः रुचिकरत्वबोध-गम्यताहेतोः बहुविधीनां वर्णनं प्राप्यते। परञ्च तेषां सर्वेषां विधीनां प्रयोगः सर्वेषु विषयेषु न कर्तुं शक्यते तथापि तेषां सर्वेषां विधीनां प्रयोगात्मकमध्ययनम् अन्यविषयेषु सततरूपेण प्रचाल्यमानं भवति। वस्तुतः शास्त्रशिक्षणस्य परम्परा प्राचीनकालादेव आसीत्। प्राचीनकालीन शिक्षायाः पाठ्यक्रमे चत्वारो वेदाः शिक्षादिषड्वेदाङ्गानि समाविशंति स्म। तेषां वर्णनं माण्डुक्योपनिषदि वर्तते। तद्यथा-

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।

अतः वक्तुं शक्नुमः यत् प्राचीनकाले अपि ज्योतिषशास्त्रस्य शिक्षणम् आसीत्।

शिक्षणशब्दः शिक्षं धातोः,ल्युट् प्रत्यये कृते निष्पन्नो भवति। आङ्गलभाषायां Teaching शब्दः एतत्सदृशार्थे प्रयुक्तो भवति। वस्तुतः 'शिक्षणमिति' एका प्रक्रिया विद्यते यस्याः माध्यमेन शिक्षकः कुशलतया स्व-छात्रान् ज्ञानेन अवगमयति।'शिक्षणमीति एका सामाजिका विस्तृता च प्रक्रिया विद्यते। आधुनिककाले शिक्षणं शिक्षाविदः मनोविज्ञानत्वेनापि स्वीकुर्वन्ति।'शिक्षणम्' इतिशब्दः शिक्षं धातोः निष्पन्नो जातः। ऋस्य तात्पर्यं शास्ति शिक्षते वा। आङ्गलभाषायां Teaching इति शब्दः अपि अस्य अर्थे अनुप्रयुक्तः भवति। अस्यां प्रक्रियायां शिक्षकः स्वकीयव्यक्तित्वेन छात्राणां व्यवहारे परिवर्तनमानयति। छात्राः अपि शिक्षाकस्यानुगमनं कुर्वन्ति। अनेन प्रकारेण शिक्षकछात्रयोः मध्ये शिक्षाणप्रक्रिया प्रचलति। प्रक्रियायामस्यां शिक्षकस्य चेष्टा शिक्षणम् इत्युच्यते। अतः वयं वक्तुं शक्यते यत् शिक्षणस्य तात्पर्यं कक्षायां विषयस्य ज्ञापनं परामर्शस्य च प्रदानमस्ति।

शिक्षणस्य विषये शिक्षाशास्त्रज्ञैः विभिन्नाःपरिभाषाःपरिभाषिताः-

रायबर्नमहोदयः-शिक्षणम् एका प्रक्रिया भवति यया छात्राणां शक्तीनां विकासे सहायमाचर्यते।

क्लार्कमहोदयः-शिक्षणं छात्राणां व्यवहारपरिवर्तनार्थं प्रक्रियायाः प्रारूपपरिचालनस्य व्यवस्था भवति।

वर्तमानकाले विभिन्नमनोवैज्ञानिकान्वेषणवशात् शिक्षाक्षेत्रे विभिन्ननूतनमान्यतानां समागते प्रादुर्भावो अभवत्। अधुना पुनः शिक्षायां बालकानां रुचिप्राधान्यं स्वीकृत्य शिक्षणविधीनां यथाशक्तिः सरलीकर्तुं रोचकता प्रदानं च कर्तुं बलं दीयते। ज्योतिषाध्यापनक्षेत्रे भिन्नभिन्नस्तरेषु भिन्नभिन्नविधीनां प्रयोगः क्रियते। ज्योतिषस्य पाठने विभिन्नस्तराणां छात्रैः साकं सम्बन्धो भवति। अत एव अनेकविधीनां ज्योतिषाध्यापने प्रयोगः क्रियते। परञ्च अत्र केवलं ज्योतिषशिक्षणे प्रायोजनाविधेः अनुप्रयोगः इति विषयमधिकृत्य अस्य प्रयोगः ज्योतिषशिक्षणे कथं भवितुं शक्यते इति विवेचनं अत्र प्रस्तूयते।

**प्रायोजनविधेः अर्थ परिभाषाश्च-**

प्रायोजना इति शब्दः प्र,आङ् उपसर्गपूर्वकं युज् धातोः ल्युट् प्रत्ययेन निष्पन्नः। यस्य तात्पर्यं भवति सर्वतोभावेन सुविचार्य समस्यायाः समाधानाय प्राक्कल्पितम् आयोजनम्। प्रायोजनाविधिः वहुकालाद् व्यवहारे वर्तते। अस्य प्रमाणानि वेदोपनिषद्पुराणेषु च द्रष्टुं शक्यते। यथा-यज्ञ विधानस्य संरचनया प्रायोजनायाः निर्माणम्। तदैव सर्वे मानवाः कस्मिन्नपि कार्ये यदा प्रवृताः भवन्ति,तदा ते सर्वप्रथमं कार्यस्य सम्यक् सम्पादनाय तस्मिन् विषये सर्वतोभावेन मनसि विचिन्त्य कार्यसम्पादनस्य योजनायाः निर्माणं कुर्वन्ति। तदनन्तरं प्रायोजनानुगुणं कार्यं सम्पादयन्ति। एवं प्रकारेण सिद्धयति यत् नायं विधिः अर्वाचीनः।

प्रयोजनाशब्दः आङ्गभाषायाः प्रोजेक्ट इति नाम्ना ज्ञायते। प्रयोजनाविधिः शिक्षणस्य नवीनतमः विधिः वर्तते। अस्मिन् विधौ छात्राणां जीवनस्य सम्बन्धितानां समस्यां वास्तविकरूपेण प्रस्तूयते तथा छात्राः समस्यायाम् अनुभूयन्ते एवं समस्यायाः समाधानाय योजनाः निर्मीयन्ते। अस्मिन् विधौ छात्राः अनेकाः सूचनाः एकत्री क्रियन्ते तथा च शिक्षकः तु केवलं निर्देशकस्य रूपेण कार्यं करोति। छात्राः स्वयं विषयवस्तूनाम् अध्ययनं कृत्वा समस्यासमाधानं कुर्वन्ति।

किलपैट्रिक महोदयानुसारम्-प्रयोजनाविधिः एका उद्देश्यपूर्णा क्रिया वर्तते। यत् सामाजिकवातावरणे पूर्णसंलग्नतया सम्पाद्यते।

पार्कर महोदयानुसारेण अपि प्रायोजनाविधिः कार्यस्य एका प्राथमिकावस्था वर्तते यस्मिन् छात्रान् कार्यस्य योजनायाः एवं सफलतायाश्च कृते निर्मीयते।

**परियोजनाविधेः प्रकाराः-**

1. व्यक्तिगतपरियोजना । 2. सामुहिकपरियोजना।

**परियोजनाविधेः सिद्धान्ताः-**

1. उद्देश्यसिद्धान्ताः 2. स्वतन्त्रतायाः सिद्धान्ताः 3. उपयोगितायाः सिद्धान्ताः 4. अनुभवस्य सिद्धान्ताः 5. क्रियाशीलतायाः सिद्धान्ताः 6. वास्तविकसिद्धान्तः 7. मितव्ययितायाः सिद्धान्तः 8. समन्वयस्य सिद्धान्तः 9. सामाजिकतायाः सिद्धान्तः।

परियोजनाविधेः उद्देश्यानि-1. छात्रेषु आत्मविश्वासस्य जागरणाय।

2. छात्रेषु तर्कशक्तेः कल्पनाशक्तेश्च संवर्धनाय।

3. क्रियाशीलतायाः संवर्धनाय।

4. चिरस्थायिज्ञानावाप्तिः।

5. रुचेर्विकासाय।

**परियोजनाविधेः सोपानानि-**

1. परिस्थित्युत्पादनम् 2. परियोजनायाः चयनम् 3. परियोजनाकार्यक्रमस्य निधारणम् 4. परियोजनायाः कार्यान्वयम् 5. परियोजनायाः मुल्यांङ्कनम् 6. परियोजनायाः लेखनम् ।

यथा-भिन्न-भिन् उत्पातानां विषये शिक्षणाय अयं विधिः उपयुक्तः-

1. परिस्थितेः कल्पनम्-अस्मिन् पदे शिक्षकः छात्रेषु बलात् ज्ञानं न ददाति अपितु छात्रैः सह विचारविमर्शेन तादृशीं परिस्थितिः उत्पादयति यया छात्राः स्वेच्छया समस्यां प्रति आकृष्टाः भवन्ति।

यथा-भिन्नभिन्नोत्पातानां ज्ञानम् इति विषयवस्तु अवलोक्य शिक्षकः चर्चा माध्यमेन समस्यामुपस्थापयितुं निम्नाः प्रश्नाः पृच्छति।

शिक्षकः-किन्नाम् उत्पातः ?

छात्राः-प्रकृतेः अप्राकृतिकपरिवर्तनम् एव उत्पाताः।

शिक्षकः-के के उत्पाताः सन्ति ?

छात्राः-अतिवृष्टिः, अल्पवृष्टिः, अग्निकाण्डः, भूकम्पः इत्यादयः।

शिक्षकः-भौमदैवोत्पातानां लक्षणं किं ?

छात्राः-निरुत्तराः।

एवमेव प्रकारेण अध्यापकः समस्यायाः कृते परिस्थितिनिर्माणं छात्रेभ्यः वार्तालापमाध्यमेन करोति।

2. परियोजनायाः चयनम्-अस्मिन् पदे छात्राः समस्यायाः समाधानाय विभिन्नप्रकाराणि प्रयोजनानि शिक्षकस्य समक्षे प्रस्तुवन्ति। तदनन्तरम् अध्यापकः छात्रैः प्रदत्ता प्रयोजनोपरि विचारं कृत्वा प्रयोजनायाः चयने छात्राणां सहायता करोति। यथा-शिक्षकः छात्राणां समक्षे भौमदैवश्च उत्पातानां लक्षणं किम् इमां समस्यां प्रस्तौति। अध्यापकः समस्याम् अवलोक्य छात्राणां मार्गनिर्देशनं कृत्वा एकं मतं सम्पादयति। यथा सर्वे छात्राः पुस्तकालयं गत्वा ज्यौतिषग्रन्थानाम् अध्ययनं कृत्वा भौमदैवश्च उत्पातानां लक्षणं लिखित्वा समस्यायाः समाधानं करिष्यन्ति।

3. परियोजनाकार्यक्रमस्य निर्धारणम्-अस्मिन् सोपाने प्रायोजनायाः कार्यान्वयनार्थं कार्यक्रमस्य निर्माणं भवति। छात्राः सर्वप्रथमं स्वकीय-स्वकीय निर्धारितकार्यक्रमाः प्रस्तुवन्ति। कार्यक्रमानुगुणं शिक्षकः सर्वान छात्रान विभिन्नसमूहेषु विभज्य कार्यक्रमस्य सम्पादनाय छात्रान् प्रोत्साहयति। यथा-भौमदैवश्च उत्पातानां लक्षणं ग्रन्थात् सङ्कलनस्य छात्राः पृथक्-पृथक् समूहे ग्रन्थालयं गत्वा तथ्यानां सड्कलनं करिष्यन्ति।

परियोजनायाः कार्यान्वयनम्-अस्मिन् पदे छात्राः पूर्वनिर्धारितं प्रायोजनाकार्यक्रमोपरान्तं तस्योपरि कार्यान्वयनं कुर्वन्ति तथा च शिक्षकः अपि अस्मिन् कार्ये छात्राणां सहायतां करोति। प्रयोजनाकार्यसम्पादनाय छात्राः ग्रन्थालयं गत्वा तत् सम्बन्धितानि विभिन्नपुस्तकानि पठन्ति।

प्रायोजनायाः मुल्याङ्कनम्-अस्मिन् सोपाने छात्राः शिक्षकस्य साहाय्येन सङ्कलितानां तथ्यानां परीक्षणं कुर्वन्ति। अन्ते अध्यापकः छात्राणां परियोजनाकार्यस्य मूल्याङ्कनं करोति।

परियोजनायाः लेखनम्-अस्मिन् पदे छात्राः मूल्याङ्कनस्य कृतेः प्रायोजनायाः पूर्णविवरणम् उत्तरपुस्तिकायां लिखन्ति तथा च कार्यक्रमस्य सम्पादनाय कः विधिः तथा च केषां-केषां स्त्रोतानां प्रयोगः अकरोत् तानि अपि लिखन्ति।

एवमेव तन्वादिद्वादशभावानां संज्ञानां विषय पाठनाय वर्तमानकाले अयं विधिः प्रयुज्यते।

यथा-परिस्थिते निर्माणम्-तन्वादिद्वादशभावानां नामानि इति विषये अध्यापकः वार्तालापेन समस्यां संस्थापनाय प्रश्नान् पृच्छति।

शिक्षकः-जन्मकुण्डल्यां कति भावाः सन्ति ?

छात्राः-द्वादशभावाः।

शिक्षकः-जन्मकुण्डल्याः द्वादशभावानां नामानि कानि ?

छात्राः-तनु-धन-सहज-सुहत-सुत-जाया-मृत्यु-धर्म-कर्म-आय-व्ययश्च।

शिक्षकः-द्वादशभावात् विचारणीय विषयाः के के ?

छात्राः-निरुत्तरः।

एवमेव अध्यापकः समस्यायाः परिस्थितिनिर्माणं करोति।

प्रायोजनायाः चयनम्-सोपानेऽस्मिन् छात्रः समस्यासमाधानाय विभिन्नाः योजनाः प्रस्तौति। तदन्नतरं शिक्षकः प्रस्तुतयोजनानां गुणदोषेषु विचारं कृत्वा उपलब्धसाधनानामाधारेण प्रयोजनायाः चयने सहायतां करोति तथा स्वकीयमतं प्रस्तौति।यथा सर्वे छात्राः पुस्तकालयं गत्वा समस्यासम्बन्धिपुस्तकानाम् अध्ययनङ्कृत्वा समस्यायाः सम्पादनं कुर्वन्ति।

प्रयोजनाकार्यस्य निर्धारणम्-सोपानेऽस्मिन् प्रयोजनायाः सम्पादनाय कार्यक्रमाः आयोज्यन्ते।यथा-छात्रान् विभिन्नेषु समूहेषु विभज्य द्वादशभावानां विचारणीयविषयाणां सम्बन्धेः विभिन्नेभ्यः ग्रन्थेभ्यः विषयसङ्कलनाय प्रेरणा प्रदानम्।

प्रयोजनायाः कार्यान्वयनम्-सोपानेऽस्मिन् छात्राः प्रयोजनायाः समस्यासमाधानाय विषयसम्बन्धि अनेकान् पुस्तकान् पठन्ति।

प्रयोजनायाः मूल्याङ्कनम्-सोपानेऽस्मिन् शिक्षकः छात्रसङ्कलितथ्यानां मूल्याङ्कनं करोति।

प्रयोजनायाः लेखनम्-अस्मिन् सोपाने छात्राः मूल्याङ्कनानन्तरं स्वोत्तरपुस्तिकासु प्रयोजनायाः विवरणं लिखन्ति।

**प्रायोजनाविधेः गुणाः -**

1. वर्तमानकाले अयं विधिः सर्वाधिकरूपेण प्रयुज्यते।

2. अयं विधिः छात्रेषु क्रियाशीलस्य, आत्मविश्वास्य, अनुशासनस्य, एवञ्च रचनात्मकगुणानां विकासः करोति।

3. अनेन विधिना प्रयोगेण छात्राः विषयस्य प्रायोगिकं तथा च व्यावहारिकं ज्ञानं प्राप्नुवन्ति।

4. अस्मिन् विधौ छात्राः ज्योतिषविषयं प्रति सक्रियं भवन्ति।

5. अयं विधि: वैज्ञानिकभावान् जनयति।

6. अनेन विधिना प्राप्त ज्ञानं चिरस्थायि भवति।

**प्रायोजनाविधे: दोषा:-**

1. अयं विधि: कक्षाशिक्षणे सर्वेषां विषयाणां कृते सर्वदा उपयुक्त: नास्ति।

2. अयं विधि: सर्वेषां शिक्षकाणां च छात्राणां कृते लाभकारी नास्ति।

3. अयं विधि: समयसाध्य वर्तते। अत: अस्य विधे: प्रयोग: सर्वे छात्रा: न कर्तुं शक्नुवन्ति।

4. अयं विधि: कदाचित् अनुशासनहीनता अपि जनयति।

5. अनेन विधिना प्रयोगेण विषयवस्तु सम्पादने महानक्लेशो भवति ।

निष्कर्ष:-उपरोक्ततथ्यानामाधारेण वयं वक्तुं शक्नुम: यत् शास्त्रशिक्षणं रुचिकरं कर्तुं प्राचीनकालादेव प्रयासा: क्रियन्ते।सम्प्रति शिक्षाक्षेत्रेऽपि विभिन्नमनोवैज्ञानिकान्वेषणानि अभवन्। तथा च एतेषामन्वेषणानां प्रयोग: ज्यौतिषशिक्षणेऽपि क्रियते।सम्प्रति विभिन्नबालकेन्द्रितशिक्षणविधिनान्वेषणं जातमस्ति, येन ज्यौतिषशास्त्रशिक्षणं सरलं रुचिपूर्णं च जायमानमस्ति। वयं विधिभि: छात्राणां च सहाय्येन ज्यौतिषशिक्षणमितोऽपि रुचिपूर्णं प्रभावपूर्णं च निर्मातुं शक्नुम:। कक्षायां लघुसमूहानां निर्माणं कृत्वा छात्रेभ्य: स्वयं शिक्षणं कृत्वा अधिगमस्य अवसरा: प्रदेया:।ज्यौतिषकक्षाया: वातावरणं पूर्णत: भयमुक्तं भवतु येन सर्वे बालका: विषयान् अवगच्छेयु:। तद्भिन्नं प्रोत्साहनोपहारादिभि: छात्रान् विषयं प्रति जिज्ञासा: निर्मेया:। प्रायोजनाविधे: गुणदोषाणां अवलोकनेन ज्ञायते यत् अस्मिन विधौ केचन् दोषा: अपि वर्तन्ते किन्तु तथापि अस्मिन् विधौ गुणा: अधिका: भवन्ति अत: अयं विधि: वर्तमानकाले छात्राणां कृते विशिष्टोपयोगी भविष्यति। अत: वक्तुं शक्यते यत् ज्यौतिषशिक्षणे प्रयुक्ता: विधय: छात्रेभ्य: लाभदायका: सन्ति। यदि ज्यौतिषाध्यापक: वर्तमाने एतेषां विधीनां पूर्णतया प्रयोगं करोति तर्हि स: शिक्षणमधिकं रुचिपूर्णं प्रभावपूर्णं च निर्मातुं शक्नोति।

## सन्दर्भग्रन्थानां सूची


1. भारतीय ज्योतिष का इतिहास, डॉ. गोरखप्रसाद,प्रकाशन-उत्तर प्रदेश हिन्दी संस्थान लखनऊ।
2. भारतीय ज्योतिष, नेमिचन्द्रशास्त्री, प्रकाशक-भारतीय ज्ञानपीठ नई दिल्ली।
3. ज्योतिष शिक्षणम्,डॉ. शिवकान्तमिश्र:, प्रकाशन-जगदीश संस्कृत पुस्तकालय जयपुर।
4. वैदिककालीन शिक्षा पद्धति एक अनुशीलन,डॉ. धीरेन्द्र झा,कला प्रकाशन वाराणसी।
5. संस्कृतशिक्षणम्,डॉ. सन्तोष मित्तल,नवचेतना प्रकाशन जयपुर।
6. ज्योतिष शिक्षण विधि, प्रो. नागेन्द्र झा,अभिषेक प्रकाशन नई दिल्ली।


## पादटिप्पणी

1. माण्डुक्योपनिषद 1-5
2. शिक्षा तकनीकी के तत्व एवं प्रबन्धन, एन. आर.सक्सेना, डॉ. एस. सी. ओवराय,पृ ? 33
3. शैक्षिकप्रविधि: रमाकान्तमिश्र: पृ. 30
4. सफल शिक्षण कला-पृ. 262
5. सफल शिक्षण कला-पृ. 262


***शोधच्छात्र:***

***केन्द्रियसंस्कृतविश्वविद्यालय:, वेदव्यासपरिसर:, हिमाचलप्रदेश:***

ISSN 2456-3420

# तात्पर्यनिर्णये निर्णीत बादरायणस्वरूपम्

डॉ. सुनीलः के. एस.

किञ्चित्प्रास्ताविकम्–

**भारतम् श्रुणुयान्नित्यम् भारतम् परिकीर्तयेत्।**
**भारतं भवने यस्य तस्य हस्तगतो जयः॥**

इत्युक्तदिशा ऐहिकामुष्मिकजीवने औन्नत्यमभिसाधनार्थमेवा–स्त्ययमैतिह्यम्। अक्षरशः वेदस्य हार्दमेव स्फोरयत्ययम् ग्रन्थः। यश्च जीवनस्य सकलविधक्षेत्रेषु जेतुमिच्छति तेनावश्यम् श्रोतव्यमेवायं जयः। जीवजडयोः पात्रमस्मिन्जगति अनिर्धारितम् परम् चराचरात्मकप्रपञ्चस्य व्यापारादिकम् पूर्वनिर्धारितमित्यादि विचारान् प्रासङ्गिकतया पात्रचित्रणद्वारा च ग्रथितोऽयम् भारतम्। न केवलमिदम् ऐतिह्यम् अपि तु जगतः जीवस्य जीवनस्य च वेदान्तोऽयम्। भौतिकाध्यात्मिकजीवने समत्वप्रदर्शनमेवास्य जयस्योद्देशः। तथ्यातथ्येत्यादि गुणाः पात्ररूपेणाविर्भूय विधिनिषेधयोःस्वरूपाविष्करणे निर्णयेवाभाति। तदेवोक्तम् ''समस्तशास्त्रार्थनिदर्शनात्मकम्'' इति। यस्मिन्दशार्थाः सर्वत्रनज्ञेयाः सर्वजन्तुभिः इत्यादिना अस्यवैशिष्ट्यमवगच्छामः।

यद्यप्यत्र अमूर्ततात्विकविचाराः मूर्तरूपेण भान्ति। स्वयं व्यासः कुरुभूमिरूपरङ्गमञ्चे सूत्रधारो भूत्वा नियन्त्रयामास। नाटकस्यास्य नायकः श्रीकृष्णः। स एवान्यान् नियमति च सर्वेप्यस्यैवाधीनो भूत्वा परावलम्बित्वरूपगुणस्याधेयत्वमाक्षिपति इति तु नाटकस्यास्य सारः। सदान्तरङ्गबहिरङ्गे अत्यन्तशुद्धभावमापन्नः भीमः एकमुखी एकत्र शोभते, अन्यत्र तु भीष्मद्रोणकर्णादयः द्विमुखिनः भूत्वा अर्थात् धर्माधर्मविषये अनिर्धारितस्वरूपिणः दृश्यन्ते। एवमेव दुर्योधनशकुनिप्रभृतयः नास्तिक्यान्धाभिमानिनोऽप्यत्र बहवस्सन्ति। सर्वेप्येते जीविनः भिन्नभिन्नस्वभाविनोऽपि एतेषु भासमानं तत्वम् एकमेव। एवञ्च व्यक्तिशः तत्वशः योग्यतादीनाम् आशयः सप्रमाणतया इदमित्थमेवेति निर्णयात्मक ग्रन्थ एव ''महाभारततात्पर्यनिर्णयः''। ग्रन्थेऽस्मिन् विषयविशययोः निर्णयः निर्णीतोऽस्ति श्रीमदानन्दतीर्थभगवत्पादेन।

**प्रधानविषयाः**

वस्तुतः श्रीमदाचार्येण तात्पर्यनिर्णये दशमे अध्याये व्यासस्य स्वरूपनिर्धारणे समुत्पन्न नानाविषयान् सप्रमाणतया दूरीकृत्य व्यासस्यानुग्रहमवर्षन्त। जानन्त्येव तत्र भवन्तः सन्तः, बादरायणः न केवलं महाभारतमहाकाव्यस्य प्रणेता परं भारतान्तर्गतपात्रवर्गेष्वन्यतमो धन्यतमो मुनिमूर्धन्यतमोप्यस्तीति। ''विव्यास वेदान् यस्मात्स तस्मात् व्यास इति स्मृतः'' इति पराशरसत्यवत्याम् वेदोद्दरणार्थं वा विभागार्थमेवावततार। यद्यपि वेदविभागविषये भिन्नाभिप्रायास्सन्ति।

**व्यासाचार्यस्तु पूर्वेषु चरमे स्वयमेव तु।**
**विव्यास वेदांश्चक्रे च भारतं वेदसम्मितम्॥**

इति प्रमाणानुसारेण स्वयं बादरायणः आचार्यो भूत्वा वैवस्वतमन्वन्तरस्य आद्यद्वापरे ब्रह्मणा, द्वितीये द्वापरे प्रजापतिना, तृतीये च द्वापरे शुक्राचार्येण च वेदविभागमकारयदिति जानीम । अपि च व्यासावतारः वारचतुष्टयमभूदित्यप्यनेन समर्थयति । केचन ;

**''तृतीये सप्तमे चैव षोडशे पञ्चविंशके।**
**अष्टाविंशयुगे कृष्णः सत्यवत्यामजयत''॥**

इति सत्यवत्यामेव व्यासः तृतीये, सप्तमे, षोडषे, पञ्चविंशति तथा अष्टाविंशतितमे द्वापरे अवततारेति अभिप्रैन्ति। परं पितर्णां मानसपुत्री अच्छोदा एव सत्यवती भूत्वा भूमौ यदा अवातरत् तत्र शाप एव मुख्यो विषयः न पुनः संख्या। तथात्वे प्रमाणाभावात्। एवञ्च यथोक्तं विष्णुपुराणे अष्टाविंशतितमे द्वापरे भगवान् व्यास एव विभागकर्ता तथा निदेशकश्च तृतीये सप्तमेत्यादिषु विष्णोः विशेषावेश इत्यवगन्तव्यम्। यद्यपि भगवतः व्यासस्यावतारविषयम् नितरां विस्तरेण भारते अंशावतरणे निरूपितमस्ति तथापि संक्षेपतः श्रीमदाचार्याः एतान् विषयान् प्रतिपादयन्ति निर्णये;

* ब्रह्मसूत्राणां निर्माणं मेरुपर्वते सञ्जातम् ।
* ब्रह्मसूत्रादीनां निर्माणानन्तरं चतुर्मुखादीनां च देवानां कृते उपदेशः कृतोऽस्ति ।
* समस्तशास्त्रार्थनिर्णयार्थं ब्रह्मसूत्राणां रचना चेत् सकलशास्त्रार्थनिदर्शनात्मकरूपेण महाभारतस्य निर्माणं कृतमस्ति।
* महाभारतस्यानुशासनपर्वणि त्रिष्वध्यायेषु निरूपित कीटोद्धरणप्रसङ्गम् अन्यथैव व्याख्यादिषु अनुसन्धानं कुर्मः परं निर्णये सप्रासङ्गिकतया केवलं श्लोकपञ्चकेषु कीतस्यैतिह्यं तथा व्यासेनकृत परमानुग्रहविचारम् असदृशमेव।

नन्वत्र ऋग्वेदस्याष्टमे मण्डले परामृष्ट ''भिनत् कनीन ओदनं पच्यमानं'' इत्यस्य मन्त्रस्य चिन्तनं कुर्मः। मन्त्रोऽयं व्यासं कनीन इत्युल्लिखितः। जिज्ञासा चात्र व्यासः कानीनो वा नवेति। खण्डार्थनिर्णये मन्त्रस्यास्य व्याख्यावसरे श्रीमदाचार्याः कनीन शब्दस्य कानीनेति उल्लिख्य ''भगवान् बादरायणो कानीनः'' अर्थात् कन्यावस्थायामेव सत्यवत्यां पाराशरो समवतरदिति सिद्धान्तितः। विषयेऽस्मिन् पाणिनेः सम्मतिरपि पश्याम यथा–''कन्यायाः कनीन च'' इति सूत्रस्य विवरणावसरे भट्टोजिदीक्षितः वृत्यां कन्याशब्दस्य कनीनं निर्दिश्य ततः वृद्धि विधाय कानीनेति रूपं समर्थयति। उदाहरणोपि ''कानीनः व्यासः कर्णश्च'' इत्युल्लेख्य ''अनूढायाः एव अपत्यं'' इत्यर्थः विहितवान्नस्ति। अत्र दीक्षितस्याभिप्रायमेवमस्ति; व्यासः अविवाहितकन्यायां समजनि,

कर्णस्तु सत्यपि कुन्ती कन्या भास्करेण समुत्पन्नत्वात् स भवति कानीनः न व्यासः इति। परं श्रीमद्वादिराजश्रीमच्चरणाः ''भावप्रकाशिकाख्य'' व्याख्यायां व्यासः न कानीनः यश्च तथेति चिन्तयति स निरयमवाप्नोति इति निर्णेति। वस्तुतः प्राचीनोपलब्ध केचन मातृकासु सत्यवतीपराशरयोः विवाहप्रसङ्ग एव प्रक्षिप्तोस्ति, यतः महाभारतस्य आदिपर्वणि एव 114 तमे अध्याये व्यासस्यावतारः प्रस्तुतोऽस्ति तत्र भीष्मं प्रति सत्यवती स्वकथाकथनसमये पराशरेण सह स्वास्याः विवाहविषयमेव न प्रस्तौति, अर्थात् स्वां कन्येत्येव निर्दिश्य पराशरसमागमवृत्तं,

**ततस्तदा महात्मा स कन्यायां मयि भारत।**

**प्रहृष्टोऽजनयद् पुत्रं द्वीप एव पराशरः॥** इति कथयति

अपि च ''पराशर्यो महायोगी स बभूव महान्षः। कन्यापुत्रो मम पुरा द्वैपायन इति श्रुतः''॥ इत्यपि व्यासम् कन्यापुत्र शब्देन निर्दिशति सत्यवती।

अन्यासु मातृकासु ''वसिष्टयाज्ञवल्क्यादीनां आधिपत्ये प्रतिगृहीतायां अस्यां भार्यात्वसिद्धये विवाहहोमं करिष्ये'' इति सङ्कल्प्य ''अग्न आयूंषि'' इत्यादिमन्त्रः विवाहप्रधानाज्यहोमं कृत्वा राजा वसुः कन्यादानं यदा अकारयत्, ततः यमुनातीरे सत्यवत्या सह पराशरः विहरच्चेति सूचना लप्स्यते। एवं सत्यवती न दाशराजकन्या परं क्षात्रकन्या अभूत् ततश्च कथं व्यासः कानीनो भवति?

**याज्ञ्यवल्क्यस्मृतावपि-**

''वसिष्ठ याज्ञ्वल्क्यादीनां सदसि विवाहहोमे कृते स, पित्रा वसुचक्रवर्तिना धारापूर्वकम् दानानन्तरं'' इति भारते प्रसिद्धकथां स्मारयति, तस्मात् ''कानीनो'' व्यास इति यत् अविदुषां वचनं तद्धारतकथापरिज्ञानशून्यत्वनिमित्तम्''

एवमेवनिर्दिष्टोऽस्ति। तथा ''कानीनः कन्यकाजातः मातामहसुतो मतः'' (2-129) इति श्लोकस्य व्याख्यावसरे, यदि कन्या गृहे एव अन्यसवर्णीयेन रहसि सन्तानमाप्नोति चेत् स सुतो माताकहसम्बन्धी-त्युच्यते, यदि च विवाहिता तर्हि भर्तुः सन्तानः इति चिन्तनीयं। एवं अनूढकानीन ऊढकानीनेति भेदद्वयमस्ति। अनूढकानीनः कर्णः ऊढकानीनस्तु व्यासः इति निर्णयः। मनुरपि; ''पितृवेश्मनि कन्यातु यं पुत्रं जनयेद्रहः। तं कानीनं वदेत् नाम्ना वोढुः कन्यासमुद्धवम्''॥ इत्यादिना अविवाहिता कन्या पितृवेष्मनि रहस्यतया सुतमाप्नोति चेत् स सुतो कानीन इत्येव व्यवहर्तव्यः इत्यकथयन्। व्यासस्तु पितृवेश्मनि सत्यवत्यां रहसि पराशरेण न अजनयत् परं यथोक्तम् स ''ऊढकन्यापुत्रः''। वस्तुतः सत्यवत्याः विवाहः सञ्जातोपि सा पुष्पवती नासीत्, तथा च तस्याम् व्यासः अवातरत्वात् स ऊढकन्यापुत्र एव अभवत्। अविवाहितायां च अपुष्पवत्यां सत्यवत्यां व्यासस्याविर्भावः सञ्जातः इति स न ''अनूढकन्यापुत्रः''। इदमेव श्रीमदाचार्याः ऊढकन्यापुत्रेत्यर्थे कानीनेति शब्दप्रयोगः कृतवन्तः सन्ति, वादिराजश्रीचरणैः भावप्रकाशिकायां-''यश्च व्यासं अनूढकन्यापुत्रेत्यर्थे कानीन शब्दप्रयोगं करोति स निश्चयेन निरयमाप्नोति वा मूर्खः'' इत्युक्तं न पुनः तत्र आपादितम् इति तु दिक्॥

*आचार्यः*

*श्रीभगवानमहावीरजैनमहाविद्यालयः, बेंगलूरु*

ISSN 2456-3420

# गृहनिर्माणे द्वारस्थापनप्रक्रियायाः विवेचनम्

डॉ. हरिनारायणधर द्विवेदी

सर्वासां विद्यानां मूलभूतः वेद एव वर्तते। वेदे ज्ञान-विज्ञान राशयः निहिताः वर्तन्ते। सर्वेषां धर्माणां मूलः वेद एव, अत एव वेदानां प्रतिष्ठा सर्वत्र उपलभ्यते। स एव वेदः पुरुषरुपेण उपदिष्टः वर्तते। तस्य वेद पुरुषस्य षडङ्गाः भवन्ति। वेदपुरुषस्य नेत्रं ज्योतिषं शास्त्रं भवति। स्कन्धत्रयात्मकस्य ज्योतिषशास्त्रस्य संहिताभागे गृहवास्तोः विषये विवेचनं वर्तते।

अखिल श्रौत-स्मार्त कर्माणि ज्योतिषशास्त्रं बिना नैव सम्भवन्ति, इत्यस्मात् कारणात् ब्रह्मणा ज्योतिषशास्त्रं निगदितम्। अस्मिन् विषये उक्तं श्रीनारदेन-

**सिद्धान्त संहिताहोरा रुपस्कन्धत्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुर्ज्योतिः शास्त्रमकल्मषम्।।**
**विनैतदखिलं श्रौतस्मार्त कर्म न सिद्धयति।**
**तस्मज्जगाद्धितायेदं ब्रह्मणा निर्मितं पुरा।।**[1]

तदा प्रश्नः भवति श्रौत-स्मार्त कर्माणि कुत्र कर्त्तव्यानि। अस्मिन् विषये समाधानं प्राप्तं विद्यते-स्वगृहे एव श्रौत-स्मार्त कर्माणि कर्त्तव्यानि। अन्यस्य गृहे कर्तव्यानि श्रौत-स्मार्त कर्माणि निष्फलानि भवन्ति।

यस्य गृहे इमानि पूर्वोक्तानि कर्माणि भवन्ति ते एव कृतानां कर्मणां फल भोक्तारः भवन्ति। अर्थात् गृहस्वामिनः एव फलानि प्राप्नुवन्ति। अस्मिन् विषये उक्तं विद्यते वृहद्वास्तुमालायाम्-

**परगेहकृतास्सर्वाः श्रौतस्मार्त क्रियाः शुभाः।**
**निष्फलाः स्युर्यतस्तासां भूमीशः फलमश्नुते।।**[2]

अस्मिन शास्त्रे गृहनिर्माणस्य प्रयोजनवर्णनावसरे उक्तं च ग्रन्थकारैः गृहं हि सुखाप्रदायकं-दुखाप्रदायकं पुरुषार्थ चतुष्टय-प्रदायकं, प्राणिनां रक्षकं, शीतात् रक्षकं, आतपात् रक्षकं गृहं भवति।

यदि गृहस्य निर्माण सम्यक्तया भवति तदा देवालयनिर्माणे यत्पुण्यं भवति एवं च वावली निर्माणे यत्पुण्यं मिलति तत्पुण्यं गृहनिर्माणेऽपि मिलति। अस्मिन् विषये उक्तं विद्यते वृहद्वास्तुमालायाम्-

**स्त्री पुत्रादिक भोगसौख्य जननं धर्मार्थ कामप्रदम्।**
**जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम्।।**
**वापीदेव गृहादिपुण्यमिखलं गेहात्समुत्पद्यते।**
**गेहं पूर्वमुशन्ति तेन विवुधाः श्रीविश्वकर्मादयः।।**[3]

गृहनिर्माणे स्थानचयनादारभ्य गृहप्रवेश पर्यन्तम् अनेके विषयाः अस्मिन् शास्त्रे वर्णिताः वर्तन्ते। गृहनिर्माणे द्वारस्थापनस्य महत्वपूर्णं स्थानं विद्यते, यथा मानवानां शरीरे मुखास्यस्थानं भवति तद्वत् गृहनिर्माणे द्वारस्थापनस्य महत्वपूर्णं स्थानं विद्यते। वास्तुशास्त्रे द्वारस्थापनस्य प्रक्रियायाः पञ्चभागेषु विभक्तुं शक्यते। यथा-

1. मुख्यद्वारस्य दिशा का स्यात्।
2. मुख्यद्वारस्य कियतं परिमाणं स्यात्।
3. केन प्रकारेण द्वारस्थानस्य निर्धारणं स्यात्।
4. द्वारवेधः तस्य निवारणं च केन प्रकारेण स्यात्।
5. द्वारस्थापनस्य मुहुर्तम्।

1. गृहद्वारस्य दिक्निर्धारणं चतुर्भिर्प्रकारैः कर्तुं शक्यते। यथा-

वास्तुसम्बन्धी, मास-सम्बन्धी, नक्षत्र-सम्बन्धी, आय-सम्बन्धी च कर्तुं शक्यते उपर्युक्तेषु चतुर्षुमध्ये कस्यापि एकस्य मुख्यत्वं स्वीकृत्य मुख्यद्वारस्य दिक्-निर्धारणं कर्तुं शक्यते। अस्मिन् विषये उक्तं विद्यते वास्तुरत्नाकरे-

**''द्वारं चतुर्विधं प्रोक्तं वास्तु संक्रान्तिमायजम्।**
**कृत्वाचान्यतमं मुख्यं गवाक्षाद्यैः पराणि च।।''**[4]

सौरचान्दयोः मासेक्यात् पूर्वादिधिक्षु गृहद्वारस्य दिङ्गनिर्धारणं यथा- कुंभराशीस्थः यदि सूर्यः स्यात् एवं च मासः फाल्गुन स्यात् तदा गृहद्वारं पूर्वदिशि व प्राचीदिशि भवति। कर्कस्थः सिंहस्थः वा यदि सूर्यः स्यात्, एवं च श्रावणमासः स्यात् तदापि गृहद्वारं पूर्वदिशि, प्राचीदिशि च भवति। मकरराशीस्थः सूर्यः स्यादेवं च पौषमासः स्यात् तदा गृहद्वारं पूर्वदिशि व प्राचीदिशि दिशि च शुभं भवति। यदि मेषस्थः सूर्यः वा वृषस्थः सूर्यः वैशाखामासश्च स्यात् तदा गृहद्वारं उत्तरदिशि दक्षिणकादिशि वा शुभं भवति। तुलास्थः वा वृश्चिकस्यः यदि सूर्यः एवं च मार्गशीर्षमासः स्यात् तदापि उत्तरदिशि, दक्षिणदिशि वा गृहद्वारं कर्तुं शक्यते उक्तं हि मुहूर्तचिन्तामणौः-

**''कुंभेऽर्के फाल्गुने प्रागपरमुखागृहं श्रावणे सिंह कर्कयोः।**
**पौषेनक्रे च याम्योत्तरमुखसदनं गोजगेऽर्के च राधे।।**[5]

**गृहस्वामिनः राशेरनुसारं गृहकारनिर्धारणम् यथा-**

वृश्चिक-मीन-सिंह राशीनां जातकानां कृते शास्त्रेषूक्तं विद्यते एषां गृहद्वारं पूर्वदिशि स्यात्। कन्या-कर्क-मकर राशीनां जातकानां कृते गृहद्वारं दक्षिणदिशि स्यात्। धनु-तुलना-मिथुन राशीनां जातकानां कृते गृहद्वारं प्रतीची दिशि स्यात्। कुंभ-वृष-मेष राशीनां जातकानां गृहद्वारं उत्तरदिशि स्यात्। अस्मिन् विषये उक्तं विद्यते राजवल्लभमण्डनग्रन्थेः-

**''राशीनामलिमीनसिंहभवनं पूर्वामुखं शोभनम्-**
**कन्या कर्कटनक्रराशिगृहीणां याम्याननं मन्दिरम्।**
**राशेर्धन्वतुलायुगस्य सदनं शस्तं प्रतीचीमुखं**
**पुसां कुंभवृषाजराशिजनुषां सौम्याननं स्याद्गृहम्।।**[6]

**आय सम्बन्धात् वर्णसम्बन्धाच्च गृहद्वारनिर्धारणम्**-अस्मिन् शास्त्रे अष्टविधानाम् आयानां चर्चा विद्यते। यदि ध्वजआय स्यात् तदा

सर्वदिशि द्वारनिर्माणम्। यदि सिंह आयः स्यात् तदा दक्षिणदिशि पूर्वदिशि, उत्तरदिशि च द्वारं स्यात्। वृषायः स्यात् तदा पश्चिमदिशि द्वारं स्यात्। यदि गजायः स्यात् तदा पूर्वदक्षिण दिशि द्वारं भवति।

**वर्णसम्बन्धात् द्वारस्य दिङ्निर्धारणम्**-ध्वजाय युक्तस्य ब्राह्मणस्य गृहद्वारं प्राचीदिशि भवति। सिंहाय-युक्तस्य क्षत्रियस्य गृहद्वारं उत्तरदिशि भवति।

वृषाय-युक्तस्य वैश्यस्य गृहद्वारं पूर्वदिशि भवति। गजाययुक्तस्य शूद्रस्य गृहद्वारं दक्षिणदिशि भवति अस्मिन् विषये उक्तं मुहूर्तचिन्तामणौः-

**''ध्वजादिकाः सर्वदिशि ध्वजेमुखं कार्यं हरौ पूर्वयमोत्तरे तथा।**

**प्राच्यांवृषे प्राग्यमयोर्गजेऽथवा पश्चादुदक्पूर्वयमेद्विजादितः**[7]

**गृहद्वारस्यपरिणाणम्**-गृहद्वारस्य परिमाणं यदि गृहविस्तारस्य तुल्याङ्गुले पञ्चाशत् योगे कृते कनिष्टद्वारस्य उच्छ्रिति भवति एव मेव गृहविस्तारतुल्याङ्गुले षष्ठिपरिमितस्य अङ्गुलेः योगे मध्यम द्वारस्य उच्छ्रितिः भवति। यदि विस्तार तुल्याङ्गुले सप्तति परिमितस्य अङ्गुलेः योगे उत्तमद्वारस्य उच्छ्रितिः भवति।

गृहस्य षोडशांशे दैर्घ्यार्द्ध युक्तं उत्तमस्य द्वारस्य विस्तारः भवति। गृह दैर्घ्यात् तृतीयांश न्यूनं कृते सति मध्यद्वारस्य विस्तारः भवति। गृहदैर्घ्यार्द्धतुल्याङ्गुलं निकृष्ट द्वारस्य विस्तारः भवति। अस्मिन् विषये उक्तं विद्यते राजवल्लभमण्डने-

**''षष्ट्यावाऽथशतार्ध सप्तति युतैर्व्यासिस्यहस्ताङ्-**
**गुलैर्द्वारस्योदयको भवेच्चभवने मध्यः कनिष्ठोत्तमौ।**
**दैर्घ्यार्द्धेन च विस्तर शशिकलाभागेधिकः शस्यते।**
**दैर्ध्यं त्र्यंशविहीनमर्द्धरहितं मध्यंकनिष्ठं क्रमात्।।''**[8]

**द्वारस्थाननिर्धारणम्-**

वास्तुपदचक्रे वाह्यभित्तौ द्वात्रिंशत्पदानां संख्या भवति। प्रतिपदस्थाने एकस्यदेवस्य स्थानम्भवति, अतः द्वात्रिंशत्देवताः भवन्ति। एकस्मात् कोणात्-द्वितीयकोण पर्यन्तं प्रत्येकदिश अष्टौ देवाः भवन्ति। कस्मिन् पदे कस्य देवस्य स्थानम्भवति इत्यस्यापि विचारः वर्तते। अनेन प्रकारेण निर्मितं यद्द्वारं भवति तद्द्वारं प्रशस्तं भवति। इदं वर्णितं वर्तते-बृहत्संहितायाम्-

**''अनिलभयं स्त्रीजनं प्रभूतधनता नरेन्द्रवाल्लभ्यम्।**
**क्रोधपरतानृतत्वं क्रौर्यं चौर्यं च पूर्वेण।।**
**अल्पसुतत्वं प्रैष्यंनीचत्वं भक्ष्यपानं सुतवृद्धिः।**
**रौद्रंकृतघ्नमधनं सुतवीर्यघ्नं च याम्येन।।**
**सुतपीडा रिपुवृद्धिर्नसुतधनाप्तिः सुतार्थफल सम्पत्।**
**धनसम्पन्नृपतिभयं धनक्षयो रोग इत्यपरे।।**
**बधबन्धोरिपुवृद्धिः सुतधनलाभः समस्तगुणसम्पत।**
**पुत्रधनातिर्वैरं सुतेन दोषाः स्त्रियाः नैः स्वम्।।''**[10]

**द्वारस्थानस्य निर्धारणं प्रचलितविधिना निम्नेन प्रकारेण भवति**-यस्यांदिशि द्वारनिर्माणमपेक्षितम्भवति तस्यांदिशि गृहविस्तारस्य (दैर्घ्यस्य) समं नवमांशंकृत्वा पञ्चभागं दक्षिणं विहाय, भागत्रयं वामे च त्यक्त्वा शेषः यः भागः तस्मिन् भागे गृहद्वारं शुभं भवति। दक्षिणवामयोः विचारः गृहप्रवेशकाले यः दक्षिणः भवति स दक्षिणः यः वामः भवति स वामः। यथोक्तं-

**वास्तुरत्नावल्याम्-**

**नवभागं गृहं कुर्यात् पंचभागं तु दक्षिणे।**
**त्रिभागमुत्तरे कृत्वा शेषेद्वारं प्रकल्पयेत।।**
**विशतां यथा भवनं भवन्ति तान्येवदक्षिणतः।**
**दक्षिणाङ्गः स वै प्रोक्तेः मन्दिरान्निः सृते सति।**
**यो भूयादक्षिणे भागे वामे भूयात्सवामगः।।''**[11]

**द्वारवेधः निवारणञ्च**-मुख्यद्वारस्य सम्मुखे मार्गः, वृक्षः, कूपः, स्तम्भः, भ्रमः इमे यदि स्युः तदा शुभदायकाः न भवन्ति। किन्तु यदि गृहउच्छ्रितितः द्विगुणितं दूरं स्यात तर्हि दोषो न भवति।

**वेधजन्यानि शुभाशुभ फलानि-**

मार्गस्य सम्मुखं द्वारं स्यात् तदा गृहस्वामिनः नाशः भवति। यदि द्वार सम्मुखं वृक्षः स्यात् तदा गृहस्वामिनः बालकानां दोषकारकः भवति। यदि द्वारस्य सम्मुखं पङ्कं स्यात् त्तदा शोककारकं भवति। यदि द्वारस्य सम्मुखं जलवहति तदा अपव्ययः भवति। द्वारस्य सम्मुखे कूपः स्यात् तदा अपस्मारः रोगः भवति। यदि देवमन्दिरं स्यात् त्तदा विनाशः भवति। यदि स्तम्भः स्यात् स्त्रीणां दोषकारकः भवति। यदि ब्राह्मणस्य गृह सम्मुखे द्वारं स्यात् तदा कुलस्य विनाशः भवति। यथोक्तं वृहत्संहितायाम्।

**''मार्ग तरुकोण कूपस्तम्भभ्रमविद्धमशुभदं द्वारम्।**
**उच्छ्रायाद्द्विगुणमितां त्यक्त्वा भूमिं न दोषाय।।**
**रथ्याविद्धंद्वारं नाशाय कुमारदोषदं तरुणा।**
**पङ्कद्वारे शोकोव्ययोऽबुंनिः स्राविणी प्रोक्तः।।**
**कूपेनास्मारो भवति विनाशश्च देवता विद्धेः।**
**स्तम्भेन स्त्रीदोषाः कुलनाशो ब्राह्मणोऽभिमुखे।।**[12]

यदि द्वारस्य कपाटः स्वमेव उद्घटितः स्यात् तदा उन्मादस्य वृद्धिः। यदि स्वमेव पिहितः स्यात् तदा कुलस्य विनाशः। यदि परिमाणादधिकं स्यात् तदा राजभयम्। परिमाणान्यूनं स्यात् तदा चोरभयम्, व्यसनं च भवति। यदि द्वारस्योपरिदारं स्यात् तदा अमङ्गलं भवति। यदि कपाटं अधिकं स्थूलं वा अधिकं दुर्बलं स्यात् तदा विनाश कारकं भवति। यदाधिकं युक्तम्भवति तदा गृहस्वामिनः कृते दुःखप्रदम्/ यदि बहिः अवनति स्यात् तदा विदेशवासः। यदि अन्तः अवनति स्यात् तदा गृहस्वामिनः मरणम् भवति। यदि गृहे दिशायाः ज्ञानं सम्यक्‌यता न स्यात्तदा चौरभयं पीडा च भवति।

ISSN 2456-3420

**यथोक्तं च ग्रन्थे-**

**''उन्मादः स्वयमुद्घटितेऽथपिहिते स्वयं कुलविनाशः**
**मानाधिकेनृपभयं दस्युभयंव्यसनमेवनीचे च।।**
**द्वारं द्वारं द्वारस्योपरि यत्तन्नशिवाय सङ्कटं यच्च।**
**अव्यक्तं क्षुदभयदं कुब्जं कुलनाशनं भवति।।**
**पीडाकरमतिपीडितमन्तर्विनतं भवेद्भावाय।।**
**वाह्यविनते प्रवासे दिग्भ्रान्ते दस्युभिः पीडा।।**[13]

**द्वारस्थापन मुहूर्तः-**

पीयूषधाराटीकायामुक्तं विद्यते अश्विनी, उत्तरात्रयं, हस्त, पुर्तय, श्रवण, मृगशिरा रोहिणी स्वाती, रेवती, एतेषु एकादशनक्षत्रेषु द्वारशाखायाः (चौखट) स्थापनं भवति। यथोक्तं च ग्रन्थे-

**अश्विनी चोत्तरा हस्तपुष्यश्रुतिमृगेषु च।**
**रोहिण्यां स्वातिभेऽन्त्ये च द्वारशाखां प्ररोपयेत।।''**[14]

**द्वारस्थापन मुहूर्तस्यवर्णनक्रमे सफलद्वारचकस्य वर्णनम्-**

सूर्याधिष्ठात् नक्षत्रात् यस्मिन् नक्षत्रे द्वारस्थापनं कर्तव्यं वर्तते तन्नक्षत्रपर्यन्तं गणनाकृते प्रथमात् चतुर्थ पर्यन्तं लक्ष्मी-प्राप्तिः भवति। पुनः अष्टषु नक्षत्रेषु उद्वासः। पुनः अष्टषु नक्षत्रेषु सुखम्। पुनः त्रिषु नक्षत्रेषु गृहस्वामिनः मृत्युः। पुनः चतुर्षु नक्षत्रेषु सौख्यं भवति।

**यथोक्तं च मुहूर्तचिन्तमणौ-**

**''सूर्यर्क्षाद्युगभैः शिरस्थफलं लक्ष्मीस्ततः कोणभै-**
**र्नागैरुद्वसनं ततो गजमितैः शाखासु सौख्यं भवेत्।**
**देहल्यां गुणभैर्मृतिर्गृहपतेर्मध्यस्थितैर्वेदिभैः-**
**सौख्यं चक्रमिदं विलोक्य सुधियाद्वारं विधेयं शुभम्।।**[15]

**सारांश-**

उपर्युक्तेन परिमाणेन ज्ञायते मूल द्वारस्यदिशा परिमाणं स्थानं वास्तुशास्त्रसम्मतं स्यात्तदा शुभ-कारकम्भवति। सर्वेषां वेधानां फलं शुद्धवायोः, प्रकाशस्य च अवरोधः भवति, एवं च वातावरणं च दूषितम्भवति, एवं च दुर्घटना, उद्विग्नता, उत्पादकं च तत् गृहं भवति। अत एवं गृनिर्माणे आवश्यकाष्ठः शिलादीनां च चयनं कर्तव्यम्, एवं च गृहस्वामीना गृहनिर्माणकाले गृहद्वारस्यापि शास्त्रसम्मतं निर्माणाय प्रयासः कर्तव्यः। प्रवेशद्वारस्य भूमिका वास्तुशास्त्रे सुखाप्रदायकः सौभाग्यप्रदायकः, समृदिप्रदायकः, ऐश्वर्यप्रदापकश्च स्यात्। यदि गृहनिर्माणे द्वारवेध (दोषः) अनुचित प्रमाण-युक्तः तदा दुःखदारिद्द्रय व्याधीनां कारकः भवतीति। शम्।

## सन्दर्भग्रन्थाः


1. पं. श्रीसीताराम झा, दैवज्ञ वराहमिहिराचार्यविरचितं ''बृहज्जातकम्'' सावित्री ठाकुर प्रकाशन, रथयात्रा, चौराहा वाराणसी।
2. श्रीब्रह्मानन्दत्रिपाठी, श्रीरामनिहोद्विवेदी ''बृहद्वास्तुमाला'' चौखम्भा सुरभारती प्रकाशन, के-37/117। गोपालमन्दिर लेन पो. बा. नं. 1129, वाराणसी।
3. श्री विन्ध्येश्वरी-प्रसाद द्विवेदी ''वास्तुरत्नाकरः'' चौखम्भा संस्कृत सीरीज आफिस के-37/99, गोपालमन्दिर लेन गोलघर (मैदागिन) पो. बा. नं.-1008, वाराणसी-221001
4. श्री विन्ध्येश्वरीप्रसाद द्विवेदी, श्रीमद्रामदैवज्ञविरचितः ''मुहूतचिन्ता-मणि'' चौखम्भा संस्कृत प्रतिष्ठान 38 यू. ए. बंगलोरोड, जवाहर नगर पो. बा. नं. 2113, दिल्ली-110007।
5. डॉ. (श्रीमती) शैलजापाण्डेय, श्रीसूत्रधारमण्डनविरचितं ''राजवल्लभमण्डनम'' चौखम्भा सुरभारती प्रकाशन, के-37/117 गोपालमन्दिरलेन पो. बा. नं. 1129, वाराणसी-221001।
6. पण्डित श्री अच्युतानन्द झा, वराहमिहिर विरचिता ''बृहत्संहिता'' चौखम्भा विद्याभवन, चौक, पो. बा. नं. 1069, वाराणसी-221001।
7. डॉ. श्रीकृष्ण 'जुगनू'', पण्डित प्रवर श्रीजीवनाथ दैवज्ञविरचिता ''वास्तुरत्नावली'' चौखम्भा पब्लिशर्स, गोकुलभवन, के-37/109, गोपालमन्दिरलेन, वाराणसी-221001


## पादटिप्पणी

1. बृहज्जातकम्, प्राक्कथन पृ.-1
2. वृ. वा. मा., पृ. 2, श्लो.-7
3. तत्रैव श्लो.-4
4. वा. र., द्वा. प्र., श्लो.-45
5. मु. चि. म., वा. प्र., श्लो.-15
6. रा. ब. म., प्र. अ., श्लो.-12
7. मु. चि. म., वा. प्र., श्लो.-4,5
8. रा. व. म., प. अ., श्लोक.-13
9. वृ. सं., वा. पि. अ., श्लो.-25
10. वृ. सं. वा., वि. अ. श्लो.-72.75
11. वा. र. गृ. द्वा. नि. अ. श्लोक-1
12. वृ. सं. वा. वि. अ. श्लो.-76-78
13. तत्रैव श्लो. 79-81
14. वा. र. द्वा. प्र. श्लोक.-64
15. मु. चि. म. वा. प्र. श्लो.-29

*सहायकाचार्यः*
*केन्द्रियसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, हिमाचलप्रदेशः*

ISSN 2456-3420

# योगपद्धतौ ध्यानसङ्कल्पना

डॉ. रणजीतकुमारः

**भूमिका-**

भारतीयचिन्तनवीथिकायां प्रसिद्धोऽयं ध्यानशब्दः पतञ्जलि-योगसूत्रमाध्यमेन "**ध्येयमात्रे एव वृत्तिप्रवाहः ध्यानमिति**" विबोधयति। अष्टाङ्गयोगे ध्यानमिति अन्तरङ्गम् अङ्गम् इति सुविदितमेव। योगसूत्रानुसारं चित्तवृत्तेर्निरोधो योग[1] इति कथ्यते। तथैव भगवद्गीतायामपि निरुद्धचित्तस्य अवस्था कीदृशी भवतीति निरूपितम्। तद्यथा-

**यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।**
**योगिनो यतचित्तस्य युञ्जतो योगमात्मनः।।**[2]

परमेतामुच्चस्थितिमवाप्तुं प्रप्रथमतया चित्तवृत्तिनिरोधः आवश्यकः। तत्र सन्ति नैकानि साधनानि येषां वर्णनं षष्ठाध्याये उपलभ्यते। मुख्यः प्रश्नः कथं स्याद् वृत्तिनिरोधः ? गीतायामपि प्रकारान्तरेण अर्जुनः प्रश्नमेतं भगवन्तं श्रीकृष्णं पृच्छति यत्-

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।**[3]
**असंशयं महाबाहो मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।**[4]

तथैव योगदर्शने-**अभ्यासवैराग्याभ्यां तन्निरोधः।**[5]

अत्र अभ्यासवैराग्याभ्याम् इदं दुर्निग्रहं चलं मनो गृह्यते इति उपदिशति भगवान् वासुदेवः। समाधानम् उपायो वायं योगदर्शनानुगुणमेव दृश्यते। तत्रापि उभे अभ्यासवैराग्ये प्रति वृत्तिनिरोधाय साधनत्वेन सङ्केतो दृश्यते।

**अभ्यासः**-अभ्यासविषये विस्तरेण योगसूत्रे उक्तं यत्-**तत्र स्थितौ यत्नोऽभ्यासः।**[6]

तत्र (अभ्यासवैराग्ययोः) स्थितौ चित्तस्थिरतायै प्रयत्नः एव अभ्यासः। व्यासभाष्यानुसारं रजस्तमोगुणाभ्यां चाञ्चल्यं भवति। तावपनीय अवृत्तिकं चित्तं भवितुम् अर्हति। सैव प्रशान्तवाहिता स्थितिः। एतामवाप्तुं साधको यं प्रयत्नं करोति नाम तत्संपिपादयिषया तत्साधनानुष्ठानं करोति सोऽभ्यासः। **अयम् अभ्यासः दीर्घकालसेवितो निरन्तरसेवितः अथ च सत्कारसेवितः भवेत्।**[7] तदा अभ्यासे दार्ढ्यम् आगच्छति। एतादृशोऽभ्यासः एव उपकारी भवति। योगस्य विघ्नोपविघ्नानां निवारणाय एकस्य ईश्वरतत्त्वस्य पौनःपुन्येन अभ्यासः कर्तव्यः। तद्यथा-

**तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः।**[8]

चित्तविक्षेपस्य बाधाय तत्र अन्ये अपि उपायाः सन्ति सूत्रेषु। यथा-

**मैत्रीकरुणामुदितोपेक्षाणां सुःखदुःखपुण्यापुण्य-विषयाणां भावनातश्चित्तप्रसादनम्।**[9]
**प्रच्छर्दनविधारणाभ्यां वा प्राणस्य।**
**विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी।**[10]
**विशोका वा ज्योतिष्मती।**[11] **वीतरागविषयं वा चित्तम्।**[12]
**स्वप्ननिद्राज्ञानालम्बनं वा।**[13] **यथाभिमतध्यानाद्वा।**[14]

एवम् अभ्यासस्य अत्यन्तम् उपयोगिता उपर्युक्तविवेचनेन विज्ञायते।

**वैराग्यम्**-इदानीं द्वितीयं साधनं वर्तते वैराग्यम्। वैराग्यविषये योगदर्शनं निर्दिशति यत्-

**दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्।**[15]
**तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्।**[16]

ये सांसारिकाः दृष्टविषयाः सन्ति अथ च स्वर्गादिफलविषययुताः आनुश्रविकविषयाः सन्ति। उभयोः वितृष्णचित्तसाधकः यां मनोऽनुभूतिं करोति तन्नाम अपरवैराग्यम्। विषयेऽस्मिन् अग्रिमसूत्रे परवैराग्यस्य विवेचनं विहितम्। यत् उदितख्यातेः पुरुषस्य गुणवैतृष्ण्यं भवति एतदेव परवैराग्यम् उच्यते, यत्र ज्ञानस्यैव पराकाष्ठा भवति। गीतानुगुणमपि यदा पुरुषः इन्द्रियाणाम् अर्थेषु नाम विषयेषु कर्मसु च अनासक्तो भवति तदा सर्वसङ्कल्पसंन्यासी योगारूढः उच्यते।

**यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।**
**सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते।।**[17]

अत्र सरलरीत्या वैराग्यसङ्कल्पना अवबुद्ध्यते यत् सर्वसङ्कल्प-संन्यस्तं चित्तं वैराग्यपदमारूढं भवति। एवम् अभ्यासवैराग्ये ध्यानावाप्तये आवश्यकसाधने स्तः। तस्मात् उभयोर्ग्रन्थयोः अनयोः निर्देशः उपलभ्यते।

**गीतायां ध्यानस्थितिः**-योगदर्शनानुसारं धारणा-ध्यान-समाधीत्येतत्त्रयं संयम इत्युच्यते। तस्मात् ध्यानाय धारणोपयोगिनी स्थितिरपि आवश्यकी। ततोऽपि पूर्वं यम-नियम-आसन-प्राणायाम-प्रत्याहारादीनि अङ्गानि बहिरङ्गत्वेन महत्त्वपूर्णान्येव। एवं किमत्र गीतायामपि तथाभूता चर्चा विद्यते उत न इति चिन्तनावसरे दृश्यते यत् अत्रापि बहिरङ्गसाधनानाम् अन्तरङ्गसाधनानाञ्च विचारः उपलभ्यते। एवमत्र क्रमेण एतेषां साधनानां निर्देशाः उद्देश्यपुरस्सरम् अत्र प्रस्तूयन्ते।

**गीतायाः उद्देश्यम्**-गीतायाः मुख्यम् उद्देश्यं वर्तते यत्-संसारे तु परिवर्तनं भवेदेव तथा च अस्माकं परमकल्याणमपि भवतु एव यथोक्तं तत्र-

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।**
**शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।।**[18]
**कर्मणैव हि संसिद्धिमास्थिताः जनकादयः।**
**लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि।।**[19]
**असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः।**[20]

एवमेतेषु श्लोकेषु वयं विद्यायाः कृते अविद्यायाः उपयोगित्वं बोद्धुं शक्नुमः।

**उद्देश्यप्राप्त्यर्थं मार्गः**-अध्यात्मदृष्ट्या भक्तिनिमित्तं द्विविधः मार्गः अत्र दृश्यते। 1 कर्मसंन्यासः 2 कर्मयोगश्च। कर्मसंन्यासमार्गः-कर्मणां पूर्णतया त्यागः। कर्मयोगमार्गः-तादृशयुक्त्या कर्माणि कुर्मः येन कर्मबन्धनं न भवेत्।

**यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः। गी.3.9**

कर्माणि एव बन्धनस्य कारणम्। तर्हि कर्म एव न कुर्मः। परन्तु लोके स्थातव्यं वर्तते। अतः कर्माणि तु करणीयानि एव।

**न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।**
**कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।।**[21]

परन्तु स्वरूपतः कर्माणि त्यक्तुं न शक्नुमः। अतः कर्मयोग एव मार्गः। कर्मयोग नाम अस्माकं चिन्तनं सम्यक् भवेत् तथा च इन्द्रियाणि अस्माकम् अधिकारे भवेयुः। कर्मणाम् आरम्भः कदा भवति यदा वयं इन्द्रियाणां वशे भवामः, विचिन्त्य कार्यं न कुर्मः। इन्द्रियाणि उत्तमानि कार्याणि कुर्युः कर्मयोगस्य आचरणं कुर्युः। परन्तु इन्द्रियाणि तदा उत्तमानि कार्याणि कुर्वन्ति यदा मनः व्यवस्थितं भवति। यदि मनसि किमपि अन्यत् चिन्तयति तदा इन्द्रियाणि अपि उत्तमं न आचरन्ति। यदि इन्द्रियाणि बलात् उत्तमं कर्म कुर्युरपि तदापि मानसिकं कर्म तु वयम् अन्यथा एव कुर्वन्तः स्मः, तस्मात् मनसः शिक्षणं भवतु तदर्थं षष्ठे अध्याये युक्तयः उक्ताः सन्ति। मनसः प्रशिक्षणं भवतु मनसि अन्यथा विचाराः न आगच्छेयुः तन्निमित्तं निरन्तरम् अभ्यासस्य आवश्यकता अस्ति। ते अभ्यासाः षष्ठे अध्याये उक्ताः सन्ति। तथा च भगवतः कृष्णस्य दृष्टौ तु यः पूर्णरूपेण कर्मयोगः स एव वास्तविकरूपेण कर्मसन्न्यासः वर्तते। यदि तादृशं कर्म कुर्मः येन बन्धनं न भवेत् तर्हि तेषां फलं तु सन्न्यास एव। तानि कृतानि अपि कर्माणि अकृतानि इव। तस्य सिद्धिनिमित्तं मनसः सिद्धता करणीया अस्ति। एष विषयोऽपि षष्ठे अध्याये उक्तोऽस्ति। कर्माणि तु करणीयानि सन्ति यदा वयं निरन्तररूपेण करणीयानि कर्माणि कुर्वन्तः भवामः तदा एव अस्माकं शुद्धता भवति, तदा योगस्य स्थितिः भवति योगारूढस्य स्थितिः भवति। अत एव उक्तम्–

**आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।**
**योगारूढस्य तस्यैव शमः कारणमुच्यते।**[22]

ईशावास्योपनिषदि अपि–**कुर्वन्नेवेह कर्माणि जीजिविषेच्छतं समाः।**[23]
गीतायाम् अपि

**यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्।**
**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।**[24]
**एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।**
**कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्।।**[25]

तस्मात् कर्माणि वस्तुतः द्विविधं फलं यच्छन्ति–तस्मिन्न समये तु कर्माणि फलन्ति एव परन्तु कर्मबन्धनात् मुक्तिनिमित्तम् अपि सहायकानि भवन्ति। ततः एव वयं कर्मसन्न्यासमार्गे भवामः तेन नैष्कर्म्यसिद्धिः भवति।

योगदर्शने पूर्वं मनसः प्रशिक्षणं तदनन्तरं बुद्धेः प्रशिक्षणम्। सत्त्वशुद्धिः पुरुषख्यातिः यदा द्वयमपि भवति तदा कैवल्यं भवति कैवल्यात् पूर्वं सत्त्वशुद्धिः। पुरुषख्यातिमात्रं कैवल्यं नास्ति। सत्त्वशुद्धिः ततः पूर्वं आवश्यकी। सत्त्वशुद्धिः नाम अन्तःकरणस्य पूर्णतया शुद्धता। पूर्णतया शुद्धता तु कर्मयोगेन एव भवति।

**ध्यानार्थम् आवश्यकव्यवहारः–**

साधकस्य आहारविहारः कथं स्यात् इत्यत्रापि उपयोगिनिर्देशाः अत्र उपलभ्यन्ते। यथा–

**दिनचर्या एवम् आहारः–**

यथायोग्यं आहारकर्तुरेव योगः दुखहा भवति नाम दुःखानां नाशकर्ता भवति। तर्हि आहारमेव न कुर्मः किम्। न तन्नोचितम् यतोहि–

**नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।**
**न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन।**[26]
**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।**[27]

अतः आहारः कीदृशः स्यात् अस्मिन् विषये उच्यते–**आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।**

**सात्त्विकः आहारः–**

**आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।**
**रस्याः स्निग्धाः स्थिराः हृद्या आहाराः सात्त्विकप्रियाः।।**[28]

ध्यानात् पूर्वं स्थानम् आसनञ्च अवश्यं निरीक्ष्य परीक्ष्य च ध्याने गन्तव्यम् ।

**आसनम्**

**शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।**
**नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्।।**[29]

शुद्ध भूमौ चैलाजिनकुशोत्तरम् (चैलम् वस्त्रम्, अजिनम्–चर्म, कुशासनम्) न अत्युच्छ्रितं न च अतिनीचम् आत्मनः आसनं स्थिरं प्रतिष्ठाप्य

**तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।**
**उपविश्यासने युञ्ज्याद्योगात्मविशुद्धये।।**[30]

तत्र आसने उपविश्य यतचित्तेन्द्रियक्रियः–चित्तस्य इन्द्रियाणां च क्रियाः संयम्य मनः एकाग्रं कृत्वा आत्मविशुद्धये अन्तःकरणशुद्धतायै योगाभ्यासं कुर्यात्।

**ध्यानपरिभाषा**–गीतानुसारं किं नाम ध्यानं तत्र शरीरस्य मनसश्च कीदृशी स्थितिः, अवस्था च भवेत् इति अत्यन्तं स्पष्टतया निर्दिष्टमस्ति। तद्यथा–

**समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।**
**सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्।।**[31]

कायं, शिरः, ग्रीवां समानस्थितौ अचलं धारयन् ऋजु उपविश्य नासिकाग्रं सम्प्रेक्ष्य दिशः अनवलोकयन्–

शरीरस्थितिः एतेन अवगम्यते। शरीरस्य एषा विशिष्टा स्थितिः ध्याने सहायिका भवति। अस्यां शरीरस्थितौ मनसः स्थितिः कथं स्यात् यां ध्यान इति रूपेण विज्ञास्यामः। एतदर्थं नैके श्लोकाः उपलभ्यन्ते। तद्यथा–

**प्रशान्तात्मा विगतभीर्ब्रह्मचारीव्रते स्थितः।**
**मनः सयंम्य मच्चित्तो युक्त आसीत मत्परः।।**[32]
**सङ्ल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः।**
**मनसैवेन्द्रियग्रामं विनियम्य समन्ततः।।**[33]

**शनैः शनैः उपरमेद्बुद्ध्या धृतिगृहीतया।**
**आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्।।**[34]
**यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।**
**ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्।।**[35]

एवमेतेन ध्यानेन या फलप्राप्तिर्भवति तस्यापि निर्देशः एवं वर्तते-

**प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।**
**उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्।।**[36]
**युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः।**
**सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते।**[37]
**तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।**
**कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन।।**[38]

एवं गीतानुसारं योगदर्शनानुसारं च ध्यानस्य सङ्कल्पना बहुधा साम्यमुपैति। साधनानां विशदं नूतनं च विवेचनं गीतायाम् उपलभ्यते।

इति शम्

## पादटिप्पणी

1. योगश्चित्तवृत्तिनिरोधः। योगदर्शनम् 1.2 (पातञ्जलयोगप्रदीप 047 गीताप्रेस गोरखपुर सं 2069 तैंतीसवाँ पुनर्मुद्रण)
2. श्रीमद्भगवद्गीता 6.19 (गीताप्रेस गोरखपुर 2 सं. 2065 छिहत्तरवाँ पुनर्मुद्रण)
3. श्रीमद्भगवद्गीता 6.34
4. श्रीमद्भगवद्गीता 6.35
5. योगदर्शनम् 1.12
6. योगदर्शनम् 1.13
7. स तु दीर्घकालनैरन्तर्यसत्काराऽऽसेवितोदृढभूमिः। योगदर्शनम् 1.14
8. योगदर्शनम् 1.32
9. योगदर्शनम् 1.33
10. योगदर्शनम् 1. 35
11. योगदर्शनम् 1.36
12. योगदर्शनम् 1.37
13. योगदर्शनम् 1.38
14. योगदर्शनम् 1. 39
15. योगदर्शनम् 1.15
16. योगदर्शनम् 1.16
17. श्रीमद्भगवद्गीता 6.3
18. श्रीमद्भगवद्गीता 3.10
19. श्रीमद्भगवद्गीता 3.20
20. श्रीमद्भगवद्गीता 3.19
21. श्रीमद्भगवद्गीता 3.5
22. श्रीमद्भगवद्गीता 6.3
23. शुक्ल यजु. 40.1 (शुक्लयजुर्वेदसंहिता, चौखम्बा विद्याभवन वाराणसी संस्करण 2003)
24. श्रीमद्भगवद्गीता 18.5
25. श्रीमद्भगवद्गीता 18.6
26. श्रीमद्भगवद्गीता 6. 16,17
27. श्रीमद्भगवद्गीता 17.7
28. श्रीमद्भगवद्गीता 17.8
29. श्रीमद्भगवद्गीता 6.11
30. श्रीमद्भगवद्गीता 6.12
31. श्रीमद्भगवद्गीता 6.13
32. श्रीमद्भगवद्गीता 6.14
33. श्रीमद्भगवद्गीता 6.24
34. श्रीमद्भगवद्गीता 6.25
35. श्रीमद्भगवद्गीता 6.26
36. श्रीमद्भगवद्गीता 6.27
37. श्रीमद्भगवद्गीता 6.28
38, श्रीमद्भगवद्गीता 6 46

*सहायकाचार्यः, संस्कृतविभागः,*
*हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः,*
*धर्मशाला, हिमाचलप्रदेशः*

ISSN 2456-3420

# अवस्थात्रयविनिर्मुक्तः तुरीयः

**डॉ. मंजुनाथ एस. जी.**

अद्वैतवेदान्ते प्राधान्येन जीवः, जगत्, परमात्मा चेति विषयत्रयं विचार्यते। विषयः इत्युक्तौ प्रमेयः भवति। प्रमेयः सर्वदा प्रमाणाधीनः, 'मानाधीना मेयसिद्धिः' इति। अद्वैतवेदान्ते षट्प्रमाणानि सन्ति। उक्तं यथा- **तानि च प्रमाणानि षट्, प्रत्यक्षानुमानोपमानागमार्थ-पत्त्युपलब्धिभेदात्**[1] इति। एतादृशप्रमाणैः प्रमेयं निरूप्यते। वेदान्तानां मुख्यं प्रमेयं ब्रह्मैव। तत्रापि जीवब्रह्मैक्यमेव मुख्यं प्रमेयम्। अतः जीवः ब्रह्म इत्युभयं विचार्यते वेदान्ते। तन्मध्यपतितत्वेन जगद्विचारोऽपि भवति।

तत्र जीवः कः भवति इत्युक्तौ सर्वेषामनुभवसिद्धः जीवः अस्मदादीनां सर्वेषामपि जीवत्वव्यवहारः 'अहं' 'मम' इत्यादिबुद्धि-पूर्वको भवति। एतादृशस्य अहं ममेति अध्यासस्य कारणमनादि अविद्या एव। तर्हि का नाम अविद्या इति चेत् 'अनादित्वे सति भावरूपा ज्ञाननिवर्त्या अविद्या' इति कथ्यते। अविद्या एव अज्ञानम्। तस्य लक्षणम्-

**अनादि भावरूपं यद्विज्ञानेन विलीयते।**
**तदज्ञानमिति प्राज्ञाः लक्षणं सम्प्रचक्षते।।**[2]

अज्ञानमनादि। वेदान्तमते षडनादयः भवन्ति। यथा-**जीव ईशो विशुद्धाचित्तथा जीवेशयोर्भिधा। अविद्या तच्चितोर्योगः षडस्माकमनादयः।।**[3] इति। अज्ञानं भावरूपं भवति, यतोहि अभावरूपत्वे अभावस्य परिणामासम्भवाज्जगतस्तदुपादनत्व-प्रतिपादनमसम्भवं स्यात्। अपि चाज्ञानं ज्ञानेन निवर्तते, विद्यमानस्य भावरूपस्यैव निवृत्तिः भवति। किञ्च, ज्ञानमावृणोत्यज्ञानम्, न अभावस्यावरकत्वम्। तस्मात् भावरूपमेवाज्ञानम्।

अविद्या कारणादेवाध्यासः भवति। तर्हि कोऽयमध्यासः ? इति चेत् अध्युपसर्गाद् अस् धातोरचिप्रत्यये अध्यासः, अधिकृत्य आस्ते, अधारमाश्रित्य तिष्ठातीति अर्थः। अस्य लक्षणं **स्मृतिरूपः परत्र पूर्वट्टष्टावभासः, तदभाववति तत्प्रकारको अवभासः, अतस्मिन् तद्बुद्धिः**[4] इति च। यथा मन्दान्धकारे गच्छतः पुरुषस्य मध्ये मार्गे पतितां रज्जुं दृष्ट्वा सर्पोऽयमिति भ्रान्तिः भवति। एवमेव वस्तुतश्चेतनः जीवः अनाद्यविद्यावशात् स्वस्वरूपं विस्मृत्य अन्यथा जानाति। जीवः अनादिः, तस्मात् कदारभ्यैतादृशव्यवहारः इति वक्तुं न शक्यते।

**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः**[5]**, अजो नित्यः शाश्वतोऽयं पुराणः**[6]**, स वा अयमात्मा ब्रह्म विज्ञामयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः**[7] इत्यादीनि जीवस्वरूपप्रतिपादकानि वाक्यानि। अन्तःकरणावच्छिन्नं चैतन्यं जीवः इति अवच्छेदवादिनः, अन्तःकरणे चित्प्रतिबिम्बितं चैतन्यं जीवः इति प्रतिबिम्बवादिनः चैतन्यस्याभास एव जीवेत्याभासवादिनश्च प्रतिपादयन्ति। कर्मणः कर्तृत्वं सुखदुःखयोश्च भोक्तृत्वमस्मिन्नेव जीवे सम्भवति। जाग्रत्स्वप्नसुषुप्तिषु तिसृष्ववस्थासु युक्तः स्थूलसूक्ष्मकारणशरीराभिमान्ययं जीवः देहेन्द्रियैः सह तादात्म्यसम्बन्धेन सुखदुःखानां भोक्ता भवति। आत्मज्ञानेनाज्ञाननाशे स्वस्वरूपमधिगच्छति। तदेवानन्दात्मकब्रह्मावाप्तिरेव जीवस्य मोक्षः।

जीवस्यैकत्वं नानात्वञ्चेति पक्षद्वयमस्ति। एकजीववादे अविद्याप्रतिबिम्बो जीवः, अनेकजीववादे अन्तःकरणप्रतिबिम्बः। अयं जीवः विभुपरिमाणः। तत्र केचित् द्वैतिनः जीवः अणुपरिमाणः इति, केचित्वार्हताः देहपरिमाण इति कथयन्ति। श्रुत्यैकशरणाः अद्वैतवेदन्तिनस्तु जीवः विभुपरिमाण इति श्रुतिप्रमाणपुरस्सरं प्रतिपादयन्ति। तत्र श्रुतिस्मृत्यादिप्रमाणान् दर्शयन्ति। यथा- **सवा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु**[8]**, नित्य सर्वगतः स्थाणुरचलोऽयं सनातनः**[9]**।**

**घटसंवृतमाकाशं नीयमाने यथा घटे।**
**घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः।।**[10] इति।

उपनिषत्सु जीवस्य स्वरूपविषये तत्र तत्र वर्णनं दृश्यते। तत्रापि मुण्डकोपनिषदि अवस्थात्रयं निरूप्य तद्रव्यतिरिक्तः आत्मा इति प्रतिपाद्यते। अवस्थात्रयविचारं यदा कुर्मः तदा जीवस्य नैजं स्वरूपं किमिति ज्ञायते। तत्र तावदभिधीयते- जीवस्तावदवस्थात्रयवान्।

अवस्थात्रयं च जाग्रदवस्था, स्वप्नावस्था, सुषुप्त्यवस्था इति। अवस्थात्रययुक्तः, अवस्थात्रयवान् जीवः। अर्थात् अवस्थात्रयसहितः यदा भवति तदा 'जीवः' इति व्यवहारः। एतादृशावस्थात्रयमपेक्ष्य 'तुरीयः' इत्युच्यते। तुरीयः परमात्मा इत्युक्तौ तदेव जीवस्य परमार्थस्वरूपम्। तादृशपरमार्थस्वरूपज्ञानाय जीवस्य अवस्थात्रयविचारः क्रियते।

**जाग्रदवस्था**-इन्द्रियजन्यविषयगोचरापरोक्षान्तः करणवृत्त्यवस्था जाग्रदवस्था।'' अस्यामवस्थायां सर्वेषामिन्द्रियाणां व्यापारः भवति। अतः इन्द्रियजन्यज्ञानं यत्र भवति तादृशेन्द्रियव्यापारघटि व्यवहारः जाग्रद्व्यवहारः। तादृशजाग्रद्व्यवहारे स्थूलदेहः वर्तते। अत्र 'अहम्' इति बुद्धिरस्ति। 'अहं गच्छामि', 'अहं तिष्ठामि' इति अनात्मधर्मान् देहधर्मानात्मनि अध्यस्य व्यवहरति इति जाग्रद्व्यवहारः। अत्र वस्तुतः जीवस्य स्वरूपं देहादिव्यतिरिक्ततया स्पष्टतया न ज्ञायते। देहे एवात्मबुद्धिरस्ति।

**स्वप्नावस्था- इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरण-वृत्त्यवस्था स्वप्नावस्था।**'' अस्यामवस्थायां चक्षुरादिपञ्चज्ञानेन्द्रियैः विना ज्ञानं जायते। स्वप्ने स्थूलदेहः न भवति। जाग्रति यथा अहमस्मि, मद्भिन्नरूपेण शरीराण्यपि सन्ति, अन्ये द्रष्टारः श्रोतारः जीवाश्च भवन्ति, तथा स्वप्नावस्थायां न भवति। अत्रैक एव भवति। परन्तु सः दर्शनस्पर्शनश्रवणादिव्यवहारं करोति। स्वप्नावस्थायामिदं शरीरं नास्ति। शरीराभावे शरीराश्रितबहिरिन्द्रियाण्यपि नैव सन्ति। बहिरिन्द्रियाणि न सन्ति चेदपि सः पश्यति, श्रुणोति, स्पृशति, जिघ्रति, आस्वादयति इत्यादिरूपेण पञ्चेन्द्रियाणां व्यवहारः जात इव भवति।

इन्द्रियाणामभावेऽपि एतत्सर्वमपि भवतीत्युक्तौ तत्र कारणं किम्? एतस्य सर्वस्यापि कारणं भवति मनोरूपमन्तरिन्द्रियम्। मनोरूपमन्तरिन्द्रियमुपाधिमनुसृत्य अयमेव चेतनः तदानीं व्यवहरति। उच्यते यथा-**बहिष्कुलायादमृतश्चरित्वा**[11] इति। कुलायो नाम 'देहः'। अस्मिन्देहे विद्यमानोऽपि तस्माद् देहाद् बहिरिव, व्यवहरति। अत्रैव सुप्तः योजनानां शतं दूरंगत इवात्मानं मन्यते। तत्र कालविसंवादः, देशविसंवादः एतत्सर्वमपि दृश्यतेति कृत्वा, तत्रापि विद्यमानः जीवः अन्तरिन्द्रियसंयुक्तः एव।

स्वुप्नावस्थायां यद्यपि स्थूलदेहाद् विमुक्तश्चेदपि शुद्धं स्वरूपं पृथग्रूपेण सर्वथा नैव भासते। अन्तरिन्द्रियरूप उपाधिसम्बन्धरूपेण उपहितमेव तदानीमनुभूयते इति स्वाप्निकी स्थितिः।

**सुषुप्त्यवस्था**-जाग्रत्स्वप्नभोगद्वयेन श्रान्तस्य जीवस्य तदुभयकारणकर्मक्षये ज्ञानशक्त्यवच्छिन्नस्य सवासनान्तःकरणस्य कारणात्मनावस्थाने सति विश्रामस्थानं सुषुप्त्यवस्था। **यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्**[12] इति कथनेन गाढनिद्रावस्था एव सुषुप्त्यवस्थेति ज्ञायते। गाढनिद्रायां यत्र स्वप्नः अपि न दृश्यते, केवलं परं निद्रया अभिभूतः आनन्दमनुभवति।'सुखमहमस्वाप्सं न किञ्चिदवेदिशम्' इत्यस्ति सर्वेषामनुभवः। सुखस्वरूपेण आत्मना सह सः लीनः भवति सुषुप्तिदशायाम्। **सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति**[13] इति छान्दोग्ये उच्यते। तदा सता सम्पन्नो भवति इत्युक्ते 'सद्रूपेण परब्रह्मणा सह लीनः भवति' इत्यर्थः। सुषुप्तौ आनन्दात्मकपरब्रह्मणा सह लीनः भवतीति कारणात् **आनन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः**[14] इत्युच्यते।

परमानन्दस्वरूपे ब्रह्मणि लीनः, एकताङ्गतः इत्युक्तौ मुक्तिरेव वा ? इति चेत्, न। सुषुप्तिमुक्त्योः भेदः वर्तते। यथा 'सुखमह्मस्वाप्सम्' इति सुषप्त्यनुभवः, तथैव 'न किञ्चिदवेदिशम्' इति परामृशति सुप्तादुत्थितः। अनुभूतस्यैव विषयस्य स्मरणमथवा परामर्शः भवति किल ? अर्थादज्ञानानुभवः तत्र वर्तते। अज्ञानं वर्तते सुषुप्तौ सूक्ष्मरूपेण। तदेव कारणशरीरमित्युच्यते। जीवस्य तावत् स्थूलशरीरम्, सूक्ष्मशरीरम्, कारणशरीरञ्चेति त्रिधा व्यवहारोस्ति वेदान्ते।

**स्थूलशरीरम्**-पञ्चकर्मेन्द्रियैः पञ्चज्ञानेन्द्रियैः पञ्चप्राणैः मनोबुद्धिभ्यां पञ्चीकृतपृथिव्यप्तेजोवाय्वा-काशैर्युक्तं शरीरम्, भूम्याद्यतलादिचतुर्दशभुवनात्मकब्रह्माण्डे विवर्तमानं जरायुजाण्डजस्वेद-जोद्भिजरूपं चतुर्विधं स्थूलशरीरम्। उच्यते यथा-

**स्यात्पञ्चीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः।**
**लिङ्गेतु राजसैः प्राणैः प्राणः कर्मेन्द्रियैः सह।।**[15] इति।

**सूक्ष्मशरीरम्**- सूक्ष्मशरीरं तावत् परलोकगामी। अस्मात् शरीरात् निर्गत्य जीवः यदा परलोकं गच्छति तदा परलोकयात्रानिर्वाहकं सूक्ष्मशरीरं भवति। सूक्ष्मशरीरं मोक्षपर्यन्तं स्थायी। सूक्ष्मशरीरात् मुक्तिः ज्ञानं विना न भवति। अत्र दशेन्द्रियाणि पञ्चप्राणाः मनोबुद्धिश्च भवन्ति। इदं लिङ्गशरीरमित्यप्युच्यते। यथा-

**कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते।**
**स सप्तदशकेनापि राशिना युज्यते पुनः।।**[16]
**पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्।**
**अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्।।**[17]

**कारणशीरम्**-स्थूलसूक्ष्मशरीरादिकारणभूतमज्ञानमेव कारण-शरीरम्। अविद्यारूपं कारणशरीरं तत्त्वज्ञानात् विनश्यति। ईश्वरस्येयं समष्टिरखिलकारणत्वात् कारणशरीरमित्युच्यते। यथा-

**अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा।**
**सा कारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान्।।**[18] इति।

एवमेतादृशावस्थात्रयं विचार्य किं ज्ञातुं शक्यते इति चेत्, जीवः अवस्थात्रयवान्। जाग्रति स्थूलशरीरसम्बन्धः स्वप्ने इन्द्रियैः सह सम्बन्धः, सुषुप्तौ अज्ञानेन सह सम्बन्धः वर्तते। सर्वस्याप्यवस्थासु अनुस्यूततया चैतन्यमात्रं विद्यते। स्थूलशरीरं स्वप्ने नास्ति। इन्द्रियाणि सुषुप्तौ न सन्ति, परमज्ञानमवशिष्यते। मुक्तौ अज्ञानं नास्ति। किन्तु सर्वत्रानुस्यूततया चैतन्यमात्रमनुवर्तते। 'येषु व्यावर्त्यमानेषु यदनुवर्तते तत्तेभ्यो भिन्नम्, यथा कुसुमेभ्यः सूत्रम्' इति नियमः। यथा अनेकानि कुसुमानि एकस्मिन् सूत्रे ग्रथितानि, तादृशकुसुमेषु गृथ्यमानं सूत्रमेकमेव। तत्सूत्रं कुसुमेभ्यो भिन्नम्। येषु व्यावर्त्यमानेषु, कुसुमेषु व्यावर्त्यमानेषु, यदनुवर्तते, सूत्रमनुवर्तते, तत्सूत्रं तेभ्यो भिन्नम् इति कुसुमस्य सूत्रात् व्यावृत्तिः भेदः ज्ञायते। एवमेव अवस्थात्रये अपि स्थूलशरीरं व्यावर्त्यते। परन्तु चैतन्यमात्रं सर्वत्रानुवर्तते। अतः तच्चैतन्यं एतेभ्यः भिन्नम्। इत्थमवस्थात्रयविचारद्वारा अवस्थात्रयस्यापि साक्षीभूतः परमात्मा विचार्यते।

जाग्रति वयं मधुरपदार्थं भक्षययामश्चेत् मधुरभक्षणसुखं वयमनुभवामः, अनुभवेन सह तज्जानीमश्च। स्वप्नेऽपि तथैव। परन्तु सुषुप्तौ विषयजनितोनुभवः नास्ति। परन्तु 'किमपि नावेदिशम्' इति त्वस्ति। तस्मादेतादृशरूपेण सुषुप्तौ तावदज्ञानसाक्षिकः कश्चित् भवति। स एव '**तुरीयः**' परमात्मा। अवस्थात्रयविनिर्मुक्तः यदा भवति, अज्ञानरूपमुपाधिमपि यदा परित्यजति सः तुरीयः। अत एव **अद्वैतं चतुर्थं मन्यन्ते, स आत्मा, स विज्ञेयः**[19] इत्युच्यते। वस्तुतः सः चतुर्थः इति नार्थः। अवस्थात्रयविनिर्मुक्तः इत्युक्त्वा, अवस्थात्रयादयं तुरीयः। तुरीयो नाम अवस्थात्रयविक्षणः इत्येव तात्पर्यम्।

## सन्दर्भग्रन्थसूची


1. ईशाद्युपनिषत्, गीताप्रेस, गोरखपुरम्
2. छान्दोग्योपनिषत्, कैलासाश्रमः, ऋषीकेशः
3. शाङ्करवेदान्तकोशः, सं. सं. वि. वाराणसी
4. वेदान्तपरिभाषा, कैलासाश्रमः, ऋषीकेशः
5. सर्वदर्शनसंग्रहः, चौखम्बा, विद्याभवनम्, वाराणसी
6. पञ्चदशी, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली
7. सिद्धान्तसंग्रहः, सं. सं. वि. वाराणसी
8. उपनिषद्वाक्यमहाकोषः चौखम्बाविद्याभवनम्, वाराणसी।
9. श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुरम्।
10. ब्रह्मसूत्रम्, केलासाश्रमः, ऋषिकेशः


## पादटिप्पणी

1. वेदान्तपरिभाषा प्र. प.
2. चित्सुखी 1/9
3. अभियुक्तोक्तिः
4. ब्रह्मसूत्रम् अ. भा.
5. कठोपनिषत् 1/3/4
6. तत्रैव 1/2/8
7. बृहदारण्यकोपनिषत् 4/4/5
8. तत्रैव 4/4/22
9. श्रीमद्भगवद्गीता 2/24
10. ब्रह्मबिन्दूपनिषत् 13
11. बृहदारण्यकोपनिषत् 4/3/2
12. माण्डूक्योपनिषत् 5
13. छान्दोग्योपनिषत् 6/8/1
14. माण्डूक्योपनिषत् 5
15. पञ्चदशी 1/34
16. ब्र. सू. शां. भा. 2/3/47
17. वेदान्तपरिभाषा वि. प.
18. पञ्चदशी 1/17
19. माण्डूक्योपनिषत् 7

*सहाचार्यः,*
*केन्द्रियसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, हिमाचलप्रदेशः*

ISSN 2456-3420

# THE ART AND ARCHITECTURE OF VEDARANYAM VEDARANYESWARAR TEMPLE - A STUDY

K. SATHEESHKUMAR, N. MARISAMY


**Abstract**

The Vadarnyam salt swamp covers a tract about 28,567 hectares. It filled by two periodical high tides or floods called 'Chitraparvam' and Visakavellam' occurring on or about the full moon in may and june respectively and retains the sea water to a depth of 2 feet over a considerable area. The thousands of very old saiva temples that have come down to this day as the heritage of our hoary past, due to the dedication and sacrifice of thousands of sivachariyas, dharmarakarata , paricarakas, oduvars, adhayayana brahmanas and temple musicians for thousands of years. It is our difficult duty to involve our little bit in this succession of history and protect this precious tradition so that our future generations may continue to enjoy and benefit from these spiritual powerhouses. The temple of Vedaranyesvar at Vedarnyam is one of great antiquity. Its origin dates back to the post-Sangam Age. It is such a giant Saiva Centre of worship and sacred by the Saiva Saint poets Appar, Gnanasambandar (Seventh Century A.D.) and Sundarar (Eighth Century A.D) respectively. Nagapattinam is a city in the Indian state of Tamil Nadu and the administrative head quarters of study District. The town came to consequence all through the period of Medieval Cholas (Ninth and twelfth century CE) and served as their significant port for trade and east-bound naval expeditions. The a great many antiquated saiva sanctuaries that have boiled down right up 'til today as the practice of our aged past, because of the dedication and penance of thousands of Sivacharyas, Dharmakartas , Paricarakas, Oduvars, adhyayana brahmanas and sanctuary artists for millennia. It is our bounden obligation to contribute our little piece in this progression of history and secures this valuable custom with the goal that our people in the future might proceed to appreciate and profit from these profound forces to be reckoned with.


**Keywords:** Cultural Systems, Epigraphically, Puajas, Puranas and Sangam Age

## Introduction

A Hindu is an adherent of the philosophies and scriptures of Hinduism, a set of religious, philosophical and cultural systems that originated in the Indian subcontinent. Man with the given tool has converted this world to his own advantage and left as a landmark to spark his own glory and as a entity to preserve the culture of the human society. One such creation, the landmark left by human beings in Tamilnadu is temple institution which played a vital role exposing the greatness of our culture, civilization, art and architecture juxtaposed with social conditions. It is not only the architect's hard work for congregation but it is the hub of the life of Tamils. Art historian A.J. Toyenbee says it as, 'The main source of a country's civilization is its Architecture. The Vadarnyam salt swamp covers a tract about 28,567 hectares. It filled by two periodical high tides or floods called 'Chitraparvam' and Visakavellam' occurring on or about the full moon in may and june respectively and retains the sea water to a depth of 2 feet over a considerable area. The water evaporates and salt is formed in large translucent blocks. The salt thus got is called Vedaranyam Spontaneous Salt. The salt is excellent, clean, heavy, well-knit together and very pure containing 99 % of sodic chloride. It was some decades ago transported to Nagapattinam depot by the Vedarnyam Canal, now gone out of use. India is a land of the Hindus who form the majority of the population and who subscribe to Hinduism. Indians have stood together in unity and co-operation though there might have been certain incidents because of the activities of the less educated and extremist elements.

## Background of the Study

The temple of Vedaranyesvar at Vedarnyam is one of great antiquity. Its origin dates back to the post-Sangam Age. It is such a giant Saiva Centre of worship and sacred by the Saiva Saint poets Appar, Gnanasambandar (Seventh Century A.D.) and Sundarar

(Eighth Century A.D) respectively. The temple occupies an area of 692 feet east west by 372 feet north-south. It faces the east and has two enclosures. The temple-complex consists of five big shrines and a under ones for the secondary deities. Entrance to the temple can be had from the west and the east as well. The entrances are surmounted by five-tired towers.

**Objectives of the Study**

1. To study the profile of the study area.
2. To know the importance of temples
3. To study the History of the temple of Vedaranyesvar at Vedarnyam and its art and architecture.
4. To discuss the administration and festivals of the temple.

**Area of the study**

Vedaranyeswarar sanctuary is a popular Lord Shiva sanctuary, at Vedaranyam in Tamil Nadu, India. According to Hindu legend, the Vedas loved God Shiva here, giving the name "Vedaranyam" to this unassuming community. As indicated by another Hindu legend, the seventh symbol of god Vishnu, Rama, is accepted to have visited Vedaranyam to exculpate himself of the transgressions submitted during the conflict against the Sri Lankan King Ravana, who stole Rama's significant other Sita. TI is accepted that the Ramar Padam close to Vedaranyam has impressions of Rama.

**Sources for this study**

The primary sources of this study are the epigraphical evidences and contemporary literary works. There are many inscriptions found on the walls of the temple. They give details about the gifts made to the temple for the arrangement of pujas and festivals. Most of the towns and villages where there are temples, they have 'Sthalapuranam' .They applaud the Lord of the place and other features in mostly panegyric way. The dependability of the puranas as a source of history is very less. The temple administrative records are found in the office of the Executive officer of the particular temple. Archaeological survey of India. Apart from the primary and secondary sources, journals and articles are also the sources of information about the particular temples. Information Technology also provides many research papers which are available in web sites. They give lot of information's about temples and sacred places. Literary sources provide a data of a different nature especially in reconstructing the social and economic conditions prevalent in the area of study. Historians are skeptical about the historical value of the literary works, as they are tainted by a tendency to exaggerate the status of the subject. Besides testifying to the existence of these temples in the seventh century, they provide a description of the sacred centre and of the deity enshrined in them. Books of historical value, published by several erudite scholars after a studious perusal of the sources on individual temples and collective ones could be termed as secondary sources. Some scholars have published comparative accounts of some or all aspects of the temples concerned.

**Scope of the Study**

The Generally Siva Temple has a combined study of science, art, astronomy, astrology, religion and mysticism, and also deals with the influence of climatic elements like temperature, pressure, wind velocity and way, sunshine, dampness, emission and other weather conditions, space, time, dynamics and man's place in nature. Everyone these forces have a distinct result on a building and its dweller. Vastushastra strives at reaching a balance between the human beings and their environment.

**Limitation of the Study**

1. The limitation of this study is the paucity of published data about the spread effects of the temple.
2. The literature connected with the temple mostly deals with the traditions, cultural, spiritual aspects and sentiments of the people.
3. Consequently they do not throw much light on the economic aspects of the people.
4. There are many traditions relating to the history of the temple. But there are not many authentic records to separate the fact from tradition.

**Profile of the Study Area**

Nagapattinam is a town in the Indian province of Tamil Nadu and the regulatory base camp of Nagapattinam District. The town came to unmistakable quality during the time of Medieval Cholas (ninth twelfth century CE) and filled in as their significant

ISSN 2456-3420

